२३४२ । सः स्यार्द्धधातुके । ७ । ४ । ४९ ॥

सस्य त. स्यात्सादावार्धधातुके । घत्स्यति । घसतु । अघसत । घसेत । लिङाद्यभावादाशिष्य स्याप्रयोग ॥

2343 त् is substituted for the final स of a root before an Ardha dhâtuka affix beginning with स ॥

As घस् + स्यति = घत + स्यति = घत्स्यति । Why do we say 'when ending in स'? Observe वक्ष्यति ॥ Why do we say 'beginning with स'? Observe घास , वास ॥ Why an ardhadhâtuka ? Observe आस्से, वस्से, from आस् 'to sit' and वस्, to cover', both Adâdi roots

२३४३ पुषादिद्युताद्यॢदितः परस्मैपदेषु । ३ । १ । ५५ ॥

श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् ॥

2343 अङ् is the su bstitute of च्लि, after the verbs पुष 'to nourish' and the rest, द्युत 'to shine', and the rest, and the verbs having an indicatory लृ, when the affixes of the Parasmaipada follow

Thus अघसत् । The verbs classed as पुषादि, are a sub-division of the 4th conjugational verbs, and द्युतादि verbs belong to the 1st conjugation As पुष अपुषत् 'he nourished', द्युत्, अद्युतत 'he shone', गम्लृ, अगमत् 'he went' But not so in the Atmanepada, as व्यद्योतिष्ट, अलोतिष्ट

जर्ज ७४८, चर्च ७४९, झर्झ ७५० परिभाषणहिंसातर्जनेषु ।

748 √Jarja, 749 √Charcha, 750 √Jharjha, to say, 2, to injure, 3, to threaten

The roots चर्च and झर्झ belong to the Tudâdi class also, and give rise to the same forms. The difference is in the accent only 'चर्च to study' is Churâdi Pre चर्चति ॥

749. √Charcha, Pre. चर्चति ॥

750 √Jharjha, Pre झर्झति । Noun झर्झरः ॥

पिसृ ७५१, पेसृ ७५२, विसृ ७५३, वेसृ ७५४, पिशृ ७५५, पेशृ ७५६ गतौ । पिपिसतुः । पिपेसतुः ॥

751, √Pisri, 752 √Pesri, to go, to move The root पिस would become पेस by guna, the reading two roots separately is for the sake of कित affixes, such a those of Perfect Pre. पेसति । Per पिपेस । पिपिसतु. । Caus पेसयति, Aor, अपिपेसत् । the Inten, पेपिस्यते । Nouns —पेस्वरः । (III 2 175)

752 √Pesri, Pre पेसति । Per पिपेस । पिपेसतु । Inten पेपेस्यते ॥

753. √Visri, to go, Pre वेसति । Per. विवेस । विविसतुः । Inten वेविस्यते ॥

754 √Vesri, to go Pre वेसति । Per, विवेस । विवेसतु. ॥

755. √Pisri, to go, to move Pre पेशति । Per. पिपेश । पिपिशतुः । Inten. पेपिश्यते ।

756 √Pesri, to go, Pre, पेशति । Per पिपेश । पिपेशतु. । Inten पेपेश्यते ॥

हसे ७५७ हसने । ह्म्यन्तक्षणश्वस०... (हसे) एदित्त्वान्न वृद्धिः । अहसीत् ॥

757. √Hase, to laugh Pre हसति । Per. जहास । I Fut हसिता । Aorist. अहसीत । (There is no Vriddhi, as the root has got an indicatory ए । VII 2. 5) Nouns :—हसः , हासः । हासिन' । हसतः । हसी । हासिकम् । हसम् ॥

णिश ७५८ समाधौ । तालव्योष्मान्तः । प्रणिशति ॥

758 √Ṇiśa, to meditate This root begins with a dental न and ends with a sibilant of the palatal class Pre नेशति or प्रणिशति । Per निनेश । I Fut नेशिता । Caus नेशयति, Aorist अनीनिशत् । Desi निनिशिषति, or निनेशिषति । Inten नेनिश्यते । Yan luk नेनेष्टि । Ger निशित्वा । नेशित्वा । Nouns निशा । नेशम् ॥

मिश ७५९, मश ७६० शब्दे रोषकृते च । तालव्योष्मान्तौ ॥

759 √Miśa, 760 √Maśa, to make a sound or noise, 2 to be angry These two roots end in a palatal sibilant. Pre मेशति । Per मिमेश । I Fut मेशिता ॥

760 √Maśa, Pre मशति । Per ममाश । I Fut मशिता ॥

शव ७६१ गतौ । दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति । अशवीत्-अशावीत्

761 √Śava, to go, approach This root begins with a palatal Sibilant and ends with a dentolabial व । Pre शवति । Per शशाव । I Fut शविता । Nouns. शवम् । शवा ॥

शश ७६२ प्लुतगतौ । तालव्योष्माद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ ॥

762 √Śaśa, to leap bound, jump The root ends in the palatal sibilant Pre शशति । Per. शशाश । शेशतु । शेशु. । शेशिथ । I Fut. शशिता । Nouns शश शशन. ॥

762 A √Kasa, or √Kasha, to go. Some read this root here But it belongs to Adadi class properly Pre कशति । Per चकाश ॥

शसु ७६३ हिंसायाम् । दन्त्योष्मान्तः ।न शसदद-(२२६३) इत्येत्त्व न । शशसतुः । शशसुः । शशसिथ ॥

763 √Śasu, to injure, kill This root ends in a dental sibilant, Pre शसति । Per शशास । शशसतुः । शशसु । शशसिथ । There is no ए nor elision of the reduplicate, because of the prohibition of VI 4 126 S 2263 Noun शस्त्रम् । Ger शसित्वा or शस्त्वा ॥

शंसु ७६४ स्तुतौ । अयं दुर्गतावपीति दुर्गः । नृशंसो घातुकः क्रूर' इत्यमरः । शशंस । आशिषि नलोपः । शस्यात् ॥

764. √Śaṃsu, to praise Durga says 'the root means misfortune also, Pre, शंसति । Per शशंस । I Fut शंसिता । Bene शस्यात् । The nasal is elided by VI 4, 24 Caus शंसयति । Aor. अशशंसत् । Desi शिशंसिषति । Inten शाशस्यते । Yan luk शाशंसित । The nasal is not elided. Dual शाशस्तः । Here the nasal is dropped. Imperative 2nd Per. S. शाशन्धि । Past Part Pass शस्तम् । Past Part Act शंसितवान् । Ger. शंसित्वा or शस्त्वा । Nouns नृशंसः 'cruel' नराशंस' । शस्त्रम् ॥

चह ७६५ परिकल्कने । कल्कनं शाठ्यम् । अचहीत् ॥

765. √Chaha, to cheat, deceive. The word parikalkana means duplicity Pre, चहति । Per. चचाह । चेहतुः । I Fut. चहिता । Aorist अचहीत् । Desi, चिचहिषति । Inten, चाचह्यते । Yan luk, चाचढि । The ह is changed to ढ by VIII. 2. 31, then applies VIII. 2. 40, then 4 41 and VIII. 3. 13.

मह ७६६ पूजायाम् । अमहीत् ॥

766 √Maha, to honor, respect Pre महति । Per, ममाह । Aorist अमहीत् Nouns महाजातीया, महिष., महिमा, महिष्मान् देश., माहिषम् । महान् । महती ॥

रह ७६७ त्यागे ।

767 √Raha, to quit, abandon, Pre रहति । Per रराह । I Fut रहिता Nouns रह. । रहसी । रहस्यम । राहु । अवरहम् । तप्तरहम ॥

रहि ७६८ गतौ । रंहति । रंह्यात् ॥

768 √Rahi, to move with speed, hasten Pre रंहति । Per ररंह । I Fut रंहिता । Noun रंह ॥

दृह ७६९, दृहि ७७०, बृह ७७१, बृहि ७७२ वृद्धौ । दर्हति । ददर्ह । ददृहतुः । दृंहति । बर्हति । बृंहति । बृहि शब्दे च । बृंहित करिगर्जितम् इत्यमर । बृहिर् इत्येके के । अबृहत्—अबर्हीत् ॥

769 √Driha, 770 √Drihi, 771 √Briha, 772 √Brihi, to grow, increase The root बृहि (772) means also 'to make sound' As बृंहित करिगर्जितम "the sound of an elephant' (A K II, 8 107) Some read it as बृहिर् । The aorist therefore will अबृहत् or अबर्हीत । Pre दर्हति । Per ददर्ह । ददृहतु. । I Fut दर्हिता । Caus दर्हयति । Aor अददर्हत or अदीदृहत् । Desi दिदृर्हिषति । Inten दरीदृह्यते । (VII 4 90 S. 2644) Yan luk दर्दृर्हीति or दर्दर्ढि । Past Part Pass दृर्हितम् । Past Part. Act दृर्हितवान् । Ger दर्हित्वा । Nouns दृढ. । द्रढिष्ठ॰ ॥

770 √Drihi, Pre दृंहति । Per ददृंह । I Fut दृंहिता । Desi दिदृंहिषति । Inten दरीदृंह्यते । Yan luk दर्दृंहीति । दर्दृंढि । दर्दृंध. । Imperfect अदर्दृन् । Past Part Pass दृंहितम or दृढ. । Past Part Act दृंहितवान् । Ger दृंहित्वा ॥

771 √Briha, Pre बर्हति । Per बबर्ह । I Fut बर्हिता ॥

772 √Brihi, Pre बृंहति । Per बबृंह । I Fut बृंहिता ॥

तुहिर् ७७३, दुहिर् ७७४, उहिर् ७७५ अर्दने । तोहति । तुतोह । अतुहत्—अतोहीत् । दोहति । अदुहत्—अदोहीत् । अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतु. । ओहिता । मा भवानूहत् । औहीत् ॥

773 √Tuhir, 774 √Duhir 775 √Uhir, to distress pain Pre तोहति । Per तुतोह । I Fut तोहिता । Aor अतोहीत or अतुहत (III 1 57) Caus तोहयति । Aor अतूतुहत् । Desi तुतुहिषति । । तुतोहिषति । Inten तातुह्यते । Yan luk तोतोढि । तोतूढ . Past Part Pass तुहितम् । Past Part Act तुहितवान् । Ger तुहित्वा । तोहित्वा । (I 2 26)

774 √Duhir, According to Maitreya and others this root should not be included in the anit list Pre दोहति । Per. दुदोह । I Fut. दोहिता । Aorist अदुहत् or अदोहीत् ॥

775, √Uhir, Pre ओहति । Per उवोह । ऊहतु । ऊहु । I Fut ओहिता । Aorist औहत् or औहीत् मा भवानुहत् । Here the aorist is formed by अङ् of इरितो वा (III. 1, 57) The other form is औहीत् ॥

अर्ह ७७६ पूजायाम् । आनर्ह ॥

776 √Arha, to honor, worship Pre अर्हति । Per आनर्ह । I Fut. अर्हिता । Desi, अर्जिर्हिषति । Nouns सुपार्ह । दुरार्ह । अर्घ. ॥

Here ends this sub-section

अथ कृपूपर्यन्ता अनुदात्तेतः ॥

The roots up to कृप् are anudâtteta

द्युत ७७७ दीप्तौ । द्योतते ॥

777. द्युत दीप्तौ 'To shine' Pre द्योतते । In the Perfect, the following applies.

२३४४ । द्युतिस्वाप्योः सम्प्रसारणम् । ७ । ४ । ६७ ॥

अनयोरभ्यासस्य स प्रसारणं स्यात् । दिद्युते । दिद्युताते । द्योतिता ॥

2344 There is vocalisation of the half-vowel of the reduplicate of द्युत् and स्वापि (Causative of स्वप्) ॥

As दिद्युते । वि दिद्योतिषते, विदिद्युतिषते, (I 2 26) वि देद्युत्यते ॥

In forming the aorist the following sûtra applies.

२३४५ । द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

द्युतादिभ्यो लुङ परस्मैपदं वा स्यात् । पुषादिसूत्रेण परस्मैपदेऽङ् । अद्युतत्-अद्योतिष्ट ॥

2345 After the verbs dyut 'to shine,' and the rest the terminations of the Parasmaipada are optionally employed, when the affixes of lun (aorist) follow

The Dyutâdi verbs are 22 in number (Bhuâdi 777 and twenty one that follow it up to घट 'to try.' By the the use of the word द्युद्भ्य, in the plural in the sutra, the force is that of "and the rest" These verbs are anudâtteta and so by sutra, I. 3 12 they would have been invariably âtmanepadi, this aphorism makes them optionally so.

777 √Dyuta, to shine The roots beginning with dyut and ending with Kripû are udatta and anudâttet Pre द्योतते । In forming the Perfect there is vocalisation by VII 4, 67 S 2344 Per दिद्युते । दिद्युताते । I Fut द्योतिता । II Fut द्योतिष्यते । Impera द्योतताम् । Imper अद्योतत । Pote द्योतेत । Bene द्योतिषीष्ट । Aorist अद्युतत् or अद्योतिष्ट । The root is optionally Parasmaipadi by I. 3 91 S. 2345 When Parasmaipadi the Aorist is formed by अङ्, because it belongs to पुषादि class Caus द्योतयति, Aor अदिद्युतत् । Desi. दिद्युतिषते, दिद्योतिषते । Inten. देद्युत्यते । Yan luk देद्युतीति or देद्योत्ति । Ger, द्युतित्वा or द्योतित्वा । Nouns. विद्युत् । दिद्युत् । द्योति ॥

श्विता ७७८ वर्णे । श्वेतते । शिश्विते । अश्वितत्-अश्वेतिष्ट ॥

778 √Svitâ, to become white, be white Pre श्वेतते । Per. शिश्विते । I Fut श्वेतिता । Aorist, अश्वितत् or अश्वेतिष्ट । Past Part Pass. श्वितम् । (VII. 2 16) श्वितितम् (VII 2 17)

ञिमिदा ७७९ स्नेहने । मेदते ॥

779 √ñimidâ, to be unctuous or greasy. This root is found in the Divâdi and the Churâdi classes also. Pre. मेदते । In forming the Perfect, the following sutra 2346 required guna but it is not so See explanation. Per. मिमिदे । I Fut. मेदिता । Aorist अमेदिष्ट or अमिदत् । Past Part, Pass. मिन्न । Nouns. मेदुरः । मिन्न ॥

२३४६ । मिदेर्गुणः । ७ । ३ । ८२ ॥

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ । 'शः' इति शित्वाभावान्नेन गुणः । मिमिदे । अमिदत् - अमेदिष्ट ॥

2346 For ऋ in मिद् there is substituted a guṇa before such a शित affix, where the indicatory श stands in the beginning of the affix

Note —As मेद्यति, मेद्यतः, मेद्यन्ति ॥ Why मिद् only? Observe क्लिद्यन्ति क्लिद्यन्ति। The root ञिमिदा belongs both to the Bhvâdi and the Divâdi classes The Bhvâdi मिद will get guna before by शप virtue of VII 3 86 but the Divâdi मिद् would not have got guṇa before श्यन्, as this affix is ङित् (I 2 4). hence the necessity of this sûtra Before non शित् affixes there is no guṇa, as मिद्यते, मेमिद्यते ॥

The phrase शिति 'where the affix has an indicatory श' is understood here from the preceding Ashtâdhyâyi sutra VII 3 75. The word शित should be explained as a Karmadharaya compound meaning श indicatory (शश्चासौ इच्चेति)। Then शिति would mean by यस्मिन् विधि स्तदादौ and the affix that *begins* with an indicatory श। Therefore the affix शश् (III, 4 81) though a शित affix, does not *begin* with an indicatory श, and hence before this affix there will be no guna Hence we have मिमिदे in the Perfect.

ञिष्विदा ७७४ स्नेहनमोचनयोः। मोहनयोः इत्येके। स्वेदते। सिष्विदे। अस्विदत्—अस्वेदिष्ट। ञिक्ष्विदा च इत्येके। अक्ष्विदत्—अक्ष्वेदिष्ट॥

780 √ Ñi shvidâ, to be greasy, to be disturbed. Some give the reading as मोहनयो.। Some read here the root ञिक्ष्विदा also. Its forms in the aorist are अक्ष्विदत or अक्ष्वेदिष्ट। Pre स्वेदते। Per सिष्विदे। I Fut स्वेदिता। Aorist अस्विदत् or अस्वेदिष्ट। Caus. स्वेदयति, Aor असिष्विदत्। Desi सिस्विदिषते। Inten सेष्विद्यते। Yan luk सेष्वेत्ति। Past, Part Pass स्विन्न. ॥

रुच ७८१ दीप्तावभिप्रीतौ च। रोचते सूर्यः। हरये रोचते भक्तिः। अरुचत्—अरोचिष्ट ॥

781 √ Rucha, to shine, to like, to be pleased, Pre, रोचते, as रोचते सूर्यः। हरये रोचते भक्ति.। Per रुरुचे। I Fut रोचिता। Aorist अरुचत or अरोचिष्ट। Caus रोचयति, रोचयते, Desi रुरुचिषते, रुरोचिषते, Ger, रोचित्वा or रुचित्वा। Nouns, रोचनम्। रोकः। रुक्मम्। रोचक ॥

घुट ७८२ परिवर्तने। घोटते। जुघुटे। अघुटत्—अघोटिष्ट ॥

782. √ Ghuṭa, to barter, exchange Pre घोटते। Per जुघुटे। I Fut घोटिता। Aorist. अघुटत् or अघोटिष्ट। Caus घोटयति, Aor अजूघुटत्, Desi, जुघुटिषते। Inten जोघुट्यते। Yan luk जोघोट्टि। Past. Part, Pass, घुटित or घोटितम्। Ger. घोटित्वा or घुटित्वा। Nouns घुटिका। घोटक.। घोटः ॥

रुट ७८३, लुट ७८४, लुठ ७८५ प्रतिघाते। अरुटत्—अरोटिष्ट ॥

783. √ Ruta, 784 √ Luṭa, 785 √ Lutha, to strike against, resist The roots rut and lut end with ṭ ट, the last लुठ luṭh ends with ṭh ठ। Pre, रोटते। Per रुरुटे। I Fut रोटिता। Aorist अरोटिष्ट or अरुटत ॥

784. √ Luta, Pre. लोटते। Per लुलुटे। I Fut लोटिता। Aorist, अलुटत ॥

785 √ Luṭha, Pre. लोठते। Per, लुलुठे। I Fut, लोठिता। Aorist. अलुठत् or अलोठिष्ट ॥

शुभ ७८६ दीप्तौ ।

786 √Śubha, to shine Pre. शोभते । Per. शुशुभे । Aor. अशुशुभत् । Caus शोभयति । Desi शुशुभिषते । शुशोभिषते । Inten शोशुभ्यते । Yan luk शोशोब्धि । Ger शोभित्वा or शुभित्वा ॥

क्षुभ ७८७ संचलने ।

787 √Kshubha, to shake, tremble, to be agitated or disturbed.

Mâdhavîya gives the meaning of sanchalana as "प्रकम्पित पर्यन्तो गमन च" । This root belongs to Divâdi and Kryadi classes also Pre क्षोभते । Per चुक्षुभे । Aorist अक्षोभिष्ट or अक्षुभत् । Past Part Pass क्षुब्ध or क्षुभितः ॥

णभ ७८८, तुभ ७८९ हिंसायाम् । आद्योऽभावेऽपि । 'नभन्तामन्यके समे' । 'मा भूवन्नन्यके सर्वे' इति निरुक्तम् । अनभत् । अनभिष्ट । इमौ दिवादौ क्र्यादौ च ॥

788 √nabha, 789 √Tubha, to injure, to hurt णभ means 'deprivation' also Thus in the Nirukta we find "नभन्ताम् अन्यके समे" explained as "मा भुवन्नन्यके सर्वे" । So also the Bhâshya explains the word नभन्ताम् by माभवन्तु in the following नभन्तामन्यके । मा ज्याका अधिधन्वसु = अन्यकेषा ज्या या धन्वसु स्थिता ज्याका. छिन्ना मा भवन्तु । Pre नभते (प्रणभते) । Per नेभे । Aorist अनभिष्ट or अनभत् । Noun नभः "sky," 'Ocean'

789 √Tubha, to hurt, injure This and the last root belong to Divâdî and Kryâdî classes also Pre तोभते । Per तुतुभे । I Fut तोभिता । Aorist अतुभत् or अतोभिष्ट

स्रंसु ७९०, ध्वंसु ७९१, भ्रंसु ७९२ अवस्रंसने । ध्वंसु ७९३ गतौ च । अङि न लोपः । अस्रसत्—अस्रंसिष्ट । 'नास्रसत्करिणां ग्रैवम्' इति रघुकाव्ये । 'भ्रशु' इत्यपि केचित्पेठुः । अत्र तृतीय एव तालव्यान्त इत्यन्ये । 'भ्रंशु भ्रशु अधःपतने' इति दिवादौ ॥

790, √Sransu, 791 √Dhvansu, 792 √Bhransu, to fall or drop down, slip off or down ध्वंसु means 'to go' also Before the Aorist in अङ् there is elision of the nasal, and the form is अस्रसत as in the following verse of Raghuvansa, नास्रसत् करिणा ग्रैवम् । Some read here भ्रशु also Pre स्रंसते । Per. सस्रंसे । I Fut. स्रंसिता । Aorist अस्रसत् or अस्रंसिष्ट । Desi सिस्रंसिषते । Inten. सनीस्रस्यते । Yan luk सनीस्रंसीति । सनीस्रस्त । Past Part Pass स्रस्त । Gerund स्रंसित्वा or स्रस्त्वा । Noun. स्रस्तम् ॥

791 √Dhvansu, to fall down. Pre ध्वंसते । Per दध्वंसे । I Fut ध्वंसिता ॥

792 √Bhransu, to fall down. Pre भ्रंसते । Per बभ्रंसे । I Fut भ्रंसिता ॥

793 √Dhvansu, to go Pre. ध्वंसते । Per दध्वंसे । I Fut ध्वंसिता ॥

स्रम्भु ७९४ विश्वासे । अस्रभत्—अस्रम्भिष्ट । दन्त्यादिरयम् तालव्यादिस्तु प्रमादे गतः ॥

794 √Srambhu, to confide This root begins with a dental sibilant (स), that which begins with a palatal sibilant (श) has already been taught before in the sense of carelessness See root no 420. Pre स्रम्भते । Per सस्रम्भे । I Fut स्रम्भिता । Aorist अस्रभत or अस्रम्भिष्ट । Caus स्रम्भयति । Aor असस्रम्भत् । Desi. सिस्रम्भिषते । Intensive सास्रभ्यते ।Ger स्रम्भित्वा or स्रब्ध्वा । Noun विस्रम्भः ॥

of its indicatory long ऊ (VII. 2 44) For this 'option' is an antaranga operation because it applies to *all* ârdhadhâtuka affixes, while the 'prohibition' of the present sûtra is a bahiranga, because it applies to those affixes only which begin with स। So that the 'prohibition' of this sûtra would not have debarred the 'option' of VII 2 44 and in the Parasmaipada स्यन्द् would have had two forms, which, however, is not the case because of the word चतुर्भ्यः by which the 'prohibition' is extended to स्यन्द् also Thus in the Parasmaipada, we have only one form, as, स्यन्त्स्यति, but in the Atmanepada we have *two* forms स्यन्दिष्यते or स्यन्त्स्यते॥

The word Parasmaipada' is understood in this sûtra, so that the prohibition does not apply to âtmanepada affixes as वर्त्सीष्ट, वर्त्स्यते, अवर्त्स्यत, विवर्त्स्यते, स्यन्दिषीष्ट or स्यन्त्सीष्ट। Moreover, with regard to Atmanepada also, the इट् is added to these roots when they stand in the same 'pada' with the affixes. But when the Atmanepada affixes are added not to the *roots* 'vrit &c,' but to the *roots* which are derived from the *nominal* bases formed from 'vrit &c,' then the '*root*' is not in the same pada with the affix, and the prohibition of this sûtra will apply. As विवृत्सिषीयते। Moreover, the rule applies, as we have said, to the affixes standing in the same 'pada' with the 'roots', therefore it will apply to Desiderative roots, as विवृत्सति, though सन् here intervenes between the ârdhadhatuka affix सन् and the Parasmaipada तिप्, so also, an ekâdeśa though sthânivat and therefore an intervention, will not be considered so for the purposes of this rule, as विवृत्सिष्यति, so also in विवृत्सयति। The prohibition, moreover, applies, to सन् affixes, and where there is luk elision of Parasmaipada affixes. As विवृत्सिता ३ and विवृत्सतम् where the Imperative हि is luk-elided, and being so elided, the force of Parasmaipada does not here remain by न लुमताङ्गस्य (I. 1. 63), hence the above *Isht.*

वृधु ७९६ वृद्धौ।

796 √Vṛidhu, to grow, increase The conjugation is like that of द्युत्। Pre. वर्धते। Per ववृधे। I Fut वर्धिता। Noun. वर्धिष्णुः। वर्धनः। वृद्धः॥

शृधु ७९७ शब्दकुत्सायाम्। इमौ द्युतिवत्॥

797. √Śridhu, to break wind downwards. Conjugated like द्युत्। Pre. शर्धते। Per शशृधे। I Fut शर्धिता॥

स्यन्दू ७९८ प्रस्रवणे। स्यन्दते। सस्यन्दे। सस्यन्दिषे-सस्यन्त्से। सस्यन्दिध्वे-सस्यन्द्ध्वे। स्यन्दिता-स्यन्ता। 'वृद्भ्यः स्यसनोः' (२३४०) इति परस्मैपदे कृते ऊदित्त्वप्राप्तमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यात् 'न वृद्भ्यः' (२३४८) इति निषेधः। स्यन्त्स्यति-स्यन्दिष्यते-स्यन्त्स्यते। स्यन्दिषीष्ट-स्यन्त्सीष्ट। 'द्युद्भ्यो लुङि' (२३४५) इति परस्मैपदपक्षेऽङ्। नलोपः। अस्यदत्-अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्स्यत्-अस्यन्दिष्यत-अस्यन्त्स्यत॥

798 √Syandû, to ooze, trickle, drop, distil The स is changed to ष optionally when preceded by अनु &c. See VIII 1. 72 S. 2349. Pre स्यन्दते। Per. सस्यन्दे। सस्यन्दिषे or सस्यन्त्से। सस्यन्दिध्वे or सस्यन्द्ध्वे। सस्यन्दिवहे or सस्यन्द्वहे। I Fut. स्यन्दिता or स्यन्ता। II Fut. स्यन्दिष्यते or स्यन्त्स्यति or स्यन्त्स्यते। Impera स्यन्दताम्।

Imper अस्यन्दत । Poten. स्यन्देत । Bene स्यन्दिषीष्ट or स्यन्त्सीष्ट। Aorist (1) अस्यन्दिष्ट । (2) अस्यदत् or (3) अस्यन्त । (1) अस्यन्त्साताम् or अस्यन्त्सत । (2) अस्यदताम् । [When the root takes the affixes of the Parasmaipada, then the Aorist is formed by अङ् (S 2345), before which the nasal is elided] Condi (1) अस्यन्दिष्यत or (2) अस्यन्त्स्यत or (3) अस्यन्त्स्यत् । Desi सिस्यन्दिषते, सिस्यन्त्सते, सिस्यन्त्सति । Inten सास्यन्द्यते । Past. Pass स्यन्न. । Ger स्यन्दित्वा or स्यन्त्वा । Nouns सिन्धु । सैन्धव ॥

२३४९ । अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । ८ । ३ । ७२ ॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते – अनुस्यन्दते वा जलम् । 'अप्राणिषु' किम् । अनुस्यन्दते हस्ती । 'अप्राणिषु' इति पर्युदासात् 'मत्स्योदके अनुष्यन्देते' इत्यत्रापि पक्षे षत्वं भवत्येव । 'प्राणिषु न' इत्युक्तौ तु नस्यात् ॥

2349. ष is optionally the substitute of the स् of स्यन्द्, after the prepositions अनु, वि, परि, अभि and नि, when the subject is not a living being.

The root स्यन्दू प्रस्रवणे is anudâtta Thus अनुष्यन्दते । विष्यन्दते । परिष्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । Thus अनुष्यन्दते or अनुस्यन्दते जलम् ॥

Why do we say 'when the subject is not a living being'? Observe अनुस्यन्दते हस्ती । The option of this sûtra will apply, when the subject is a compound of living and non living beings Thus अनुस्यन्देते or अनुष्यन्देते मत्स्योदके । The subject here is a Dvandva compound, and it is not in the singular number because of II 4 6. The word अप्राणिषु is a Paryudâsa and not a Prasajya-pratishedha. If it be the latter sort of prohibition, then the force will be on the word *living*, and in a compound like मत्स्योदके, consisting of *living* and *non living* beings, the prohibition will apply because it has a *living* being in it, and so there will be no षत्व । In the other view, the force is on the word *non living*, and because the compound contains a non living being, therefore the option will be applied, and the presence of the living being along with it will be ignored

The anuvritti of परि, नि and वि is understood here from VIII 3 70 So these words could well have been omitted from the sûtra, which might have then been अन्वभिभ्याच स्यन्दतेरप्राणिषु, and by the force of च we would draw in the anuvritti of परि &c

799 कृपू सामर्थ्ये । In conjugating this root, the following applies

२३५० । कृपो रो लः । ८ । २ । १८ ॥

'कृपः' 'उः' इति छेदः । 'कृप' इति लुप्तषष्ठीकम् । तच्चावर्तते । कृपो यो रेफस्तस्य लः स्यात् । कृपेर्ऋकारस्यावयवो यो रो रेफसदृशस्तस्य च लकारसदृशः स्यात् । कल्पते । चक्लृपे । चक्लृपिषे – चक्लृपुम इत्यादि स्यन्दिवत् ॥

2350 For the र of the root कृप there is substituted ल ॥

The word कृपो is compounded of कृप + उ । The term कृप is used with the force of the genitive, the case ending is considered as latent It is repeated, The meaning is 'In the place of the र of कृप there is ल । In the place of the र-sound which is a portion of the ऋ of कृप and therefore which may be considered as like र, there is substituted something which is like ल । That is when कृप assumes by

guna &c the form कर्प् &c, then for र is substituted ल and we have कल्प। But even with कृप, a l-sound like ऌ is substituted for ऋ, and we have क्लृप"। As कल्पते, चक्लृपे &c like स्यन्दि ॥

The र here merely indicates the sound, and includes both the single consonant र and the same consonant of the vowel ऋ। So also with ल। So that for the single र there is substituted ल, and for र when a portion of ऋ, the ऌ is substituted, i e ऋ becomes ऌ। Thus कृप्=क्लृप्, as in the sutra लुटि च क्लृपः (I 3 93) कल्प्ता, कल्प्तारौ, कल्प्तारः। क्लृप्तः। क्लृप्तवान् ॥

The word कृपा is derived from the root कृप् by vocalisation, as it has been enumerated in Bhidâdi class (कृपे. संप्रसारणं च III 3 104). The vocalised root form कृप is not to be taken here, as it is a lâkshaṇika form.

Vârt —The words कृपण, कृपाण, कृपीट, कर्पूर &c, are also from कृप्। Or by the Unâdi diversity, the ल change does not take place

Vârt —Optionally so of बाल &c As, बाल or बारः, मूलम् or मूरम्। लघु or रघु, असुरः or असुलः, अलम् or अरम्, अङ्गुलि or अङ्गुरि. ॥

Vârt —Optionally so in the Vedas, or when names, of कपिलका &c, as कपिरक. or कपिलक, तिल्पिलीकम् or तिर्पिरीकम्, लोमाणि or रोमाणि, पांसुर or पांसुल, कर्म or कल्म, शुक्रः or शुक्ल, कल्मषं, कर्मषं ॥

Some say 'र and ल are one' and operations regarding र may be performed with regard to ल ॥

In forming the FirstFuture, the next sûtra applies.

२३५१। लुटिचक्लृपः। १। ३। ९३ ॥

लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात् ॥

2351 After the verb klip 'to be fit', Parasmaipada is optionally employed, when lut (1st Future) is affixed, as well as when sya and san are affixed.

The verb क्लृप् is one of the five verbs of the sub class, वृतादि। (I. 3. 92 S. 2347) Therefore it will take both Parasmaipada and Atmanepada, when the affixes स्य or सन् follow The present sûtra makes the additional declaration in the case of the 1st Future or लुट् Thus in Lu we have —कल्प्तासि or कल्प्तासे, in the 2nd Future we have —कल्प्स्यते or कल्प्स्यति, in the Desiderative we have —चिक्लृप्सति or चिकल्पिषते, in the Conditional we have —अकल्प्स्यत् or अकल्पिष्यत ॥

२३५२। तासि च क्लृपः। ७। २। ६० ॥

क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे। कल्प्तासि। कल्प्तास्थः। कल्पितासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट–क्लृप्सीष्ट। अक्लृपत्–अकल्पिष्ट–अक्लृप्त। अकल्प्स्यत्–अकल्पिष्यत–अकल्प्स्यत। वृत्। वृत्तः सद्योर्थ द्युतादिर्वृत्–तादिश्चेत्यर्थः ॥

2352. The (Parasmaipada) ârdhadhâtuka affixes beginning with स, and the affix तास् (the sign of the Periphrastic Future) do not get the augment इट्, after the root क्लृप except in the Atmanepada affixes.

Thus कल्प्ता, कल्प्स्यति, अकल्प्स्यत्, चिक्लृप्सति। But कल्पितासे, कल्पिषीष्ट, कल्पिष्यते, अकल्पिष्यत, चिकल्पिषते in the Atmanepada.

In the case of कॢप् also, the इट् is added to the ârdhadhâtuka affixes in the Atmanepada, when the root stands in the same pada with the affixes and there is prohibition everywhere else So also there is prohibition before krit-affixes, and the luk-elision of Parasmaipada As चिकॢप्सिता, चिकॢप्स त्व ॥

According to Padamanjari, these two sûtras could have been shortened thus – (1) न वृद्भ्य॰ पञ्चभ्यः, (2) तासि च, and "कृप" could well have been omitted The तास् comes only after कॢप and not after other roots of Vritâdi class, in Parasmai pada [1 3 92 and 93] Therefore, there is no fear that the prohibition तासि च will apply to the other roots of vritâdi, but only to 'klip,' because the word परस्मैपदेषु is understood here, and as no roots of vritadi class take Parasmaipada in the Periphrastic Future except 'klip', there is no fear of any ambiguity

कृप ७९९ सामर्थ्ये ।

799 √Kripû, to be fit or adequate for By VIII 2 18 S 2350 the र of this root is changed to ल । Pre कल्पते । Per चकॢपे । चकॢपिषे or चकॢप्से । I Fut कल्प्ता । कल्प्तारौ । कल्प्तारः । कल्प्तासि or कल्पितासे or कल्प्तासे । कल्प्तास्थ । कल्प्तास्थे । II Fut कल्पिष्यते । कल्प्स्यते । कल्प्स्यति । Imperative कल्पताम् । Imper अकल्पत । Pote कल्पेत । Bene कल्पिषीष्ट । कॢप्सीष्ट । Aorist अकॢप्त or अकॢपत् or अकल्पिष्ट । Condi. अकल्पिष्यत or अकल्प्स्यत । Inten चलीकॢप्यते । Yan luk चल्कल्प्ति or चलिकल्प्ति or चलीकल्प्ति ।

वृत् । *"Vrit" here means that the Dyutâdi and the Vritâdi roots end here.*

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च ॥

Now the thirteen roots ending with त्वरति No 812 are anudatteta and shit

घट ८०० चेष्टायाम् । घटते । जघटे । घटादयो मितः इति वक्ष्यमाणेन मित्सञ्ज्ञा । तत्फलं तु णौ मितां ह्रस्वः (२५६८) इति चिण्णमुलोर्दीर्घोऽन्यतरस्याम् (२७६२) इति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव' इत्यादि । शृणु । घट सङ्घाते इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषो मित्त्वार्थमनुवादोऽयमिति वाच्यम् । नान्ये मितोऽहेतौ इति निषेधात् । अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः ॥

800 √Ghaṭa, to be busy with, strive after The Ghatâdi roots are मित्, a designation which will be explained further on The result of their being मित् is that the root is shortened in the causative by VI 4 92 S 2568, and there is optional lengthening before the affixes चिण् and णमुल् by VI 4 93 S 2762 As घटयति, विघटयति । If so, how do you explain the lengthening in घाटनं and प्रविघाटयिता in "कमलवनोद्घाटनं कुर्वते ये" । and "प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव" There is a घट सङ्घाते belonging to the Churadi class (No 183) The above forms are from that root It should not be said that that root is only a particular case of the present root, the sense of सङ्घात being a species under the genus चेष्टा, and therefore that root is also mitâdi This we say because there is a specific prohibition "no other roots of the Churadi which take णिच् are मित् ।" The meaning of अहेतौ is that except the five roots ज्ञप &c no Churadi root which takes णिच् without change of sense is a मित् । For, the अहेतु or स्वार्थ णिच् is added only to Churâdi roots Pre. घटते । Per. जघटे । I Fut. घटिता । II Fut. घटि-

ष्यते । Bene घटिषीष्ट । Aorist अघटिष्ट । Condi अघटिष्यत् । Pass घट्यते । Aor अघाटि or अघटि । Caus घटयति । Aor अजीघटत् । Before स्य, सन &c the lengthening is optional as घटिष्यते or घाटिष्यते &c Desi जिघटिषते । Inten जाघट्यते । Yan luk जाघट्टि । Nouns घटा । घटिका । घटना ॥

व्यथ ८०१ भयसंचलनयोः । व्यथते ॥

801 व्यथ भयसंचलनयोः ॥

In conjugating this root in the Perfect, the following applies

२३५३ । व्यथो लिटि । ७ । ४ । ६८ ॥

व्यथोऽभ्यासस्य स प्रसारणं स्याल्लिटि । हलादि शेषापवादः । यस्य हलादिः शेषेण निवृत्तिः । विव्यथे ॥

2353 There is vocalisation of the half vowel of the reduplicate of व्यथ् in the Perfect.

As विव्यथे, विव्यथाते, विव्यथिरे । This ordains the vocalisation of य, which otherwise would have been elided as being a non initial consonant (VII 4 60) The vocalisation of व is prevented by VI 1 37 Why do we say in the Perfect? Observe वाव्यथ्यते ॥

801 √Vyatha, 1 to be afraid, 2 to tremble Pre व्यथते । As व्याघात्व्यथते । In forming the Perfect, the sûtra VII 4 68 S 2353 applies, which causes vocalisation Per विव्यथे । I Fut व्यथिता । Caus व्यथयति, Aor अविव्यथत् । Inten. वाव्यथ्यते । Yan luk वाव्यथीति or वाव्यत्ति । Nouns विथुर । विथुर । व्यथा ॥

प्रथ ८०२ प्रख्याने । पप्रथे ॥

802 √Pratha to become famous or celebrated Pre प्रथते । Per पप्रथे । I Fut प्रथिता । Pass प्रथ्यते । Aor अप्रथि or अप्राथि । Caus प्रथयति, Aor अपप्रथत् । Nouns पृथिवी । पार्थिव । पार्थिवी । पृथु । प्रथिमा ॥

प्रस ८०३ विस्तारे । पप्रसे ॥

803 √Prasa to spread Pre प्रसते । Per पप्रसे । Pass, प्रस्यते । Aor अप्रसि or अप्रासि । Caus प्रसयति, Aor अपिप्रसत् । Desi, पिप्रसिषति, Inten पाप्रस्यते । Yan luk, पाप्रस्ति । Imperfect 3rd S अपाप्रद् । 2nd. S. अपाप्रत् or अपाप्रः । Noun, प्रसा ॥

म्रद् ८०४ मर्दने ।

804 √Mrada, to pound, crush, grind Pre. म्रदते । Per मम्रदे । I Fut. म्रदिता । Caus म्रदयति, Aor. अमम्रदत् । Desi मिम्रदिषते । Inten माम्रद्यते । Yan luk. माम्रदीति or माम्रत्ति । Nouns म्रदुः । मार्दवम् । म्रद्वी । म्रदिका । म्रदिमा ॥

स्खद् ८०५ स्खदने । स्खदनं विद्रावणम् ॥

805 √Skhada, to cut, to tear to pieces Pre. स्खदते । Per चस्खदे । I Fut. स्खदिता । Pass स्खद्यते । Aor. अस्खदि or अस्खादि । Caus स्खदयति, स्खादयति, Aor अचिस्खदत ॥

क्षजि ८०६ गतिदानयोः । मित्त्वमामर्थ्यादनुपधात्स्यऽपि 'चिण्णमुलोः—' (२७६२) इति दीर्घविकल्पः । अक्षञ्जि—अक्षाञ्जि । क्षञ्जं क्षञ्जम् । क्षाञ्जं क्षाञ्जम् ॥

806 √Kshaji, 1 to go 2 give Pre क्षञ्जते । Per. चक्षञ्जे । I Fut क्षञ्जिता । Pass. क्षञ्ज्यते । Aor अक्षञ्जि or अक्षाञ्जि । With णमुल् we have क्षञ्जम् क्षञ्जम् or क्षाञ्जम् क्षाञ्जम् । See S 2762 Caus. क्षञ्जयति, क्षञ्जयते । Aor. अचक्षञ्जत् । Desi. चिक्षञ्जिषते, । Inten चाक्षञ्ज्यते । Yan luk. चाक्षङ्क्ति ॥

दक्ष ८०७ गतिहिंसनयोः । योऽयं वृद्धिशैघ्र्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्त्वार्थोऽनुवादः ॥

807 √Daksha, 1 to go, 2, to injure The root दक्ष meaning वृद्धिशैघ्र्ययोः (No 639) read in the anudattet class is also a मित् root, that meaning being included in the meaning of the present root Pre दक्षते । Per ददक्षे । I Fut दक्षिता । Pass. दक्ष्यते । Aor अदाक्षि or अदक्षि । Caus दक्षयति, दक्षयते । Aor अददक्षत् ॥

क्रप ८०८ कृपायां गतौ च ।

808 √Krapa, 1 to pity, 2 to go. Pre क्रपते । Per चक्रपे । I Fut क्रपिता । Pass. क्रप्यते । Aor अक्रपि or अक्रापि । Caus क्रपयति, Aor अचिक्रपत् । Desi चिक्रपिषते । Inten चाक्रप्यते । Yan luk चाक्रप्ति । Nouns कृपण । कृपूरः । कृपीट ॥

कदि ८०९, क्रदि ८१०, क्लदि ८११ वैक्लव्ये । वैकल्ये इत्येके । त्रयोऽप्यनिदित इति नन्दी । इदित इति स्वामी । कदि क्रदी इदितौ क्लद क्लद इति चानिदितावपि मैत्रेयः । कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च ॥

809 √Kadi, 810 √Kradi 811 √Kladi, to be confounded or perplexed, to confound. Some read it as वैकल्ये । According to Nandi, all these three roots are without the indicatory इ । According to Swami they have an indicatory इ । According to Maitreya कदि and क्रदि have an indicatory इ, while क्रद and क्लद are without it. These three roots have been read in the Parasmaipada subclass See *ante* Their repetition here is for the sake of showing that they are मित and also atmanepadi Pre. कन्दते । Per चकन्दे । I Fut कन्दिता । Pass कन्द्यते । *Aor* अकान्दि or अकन्दि । Namul. कन्दं कन्दं । or कान्दं कान्दम् । Caus कन्दयति, कन्दयते । *Aor* अचकन्दत् । Desi चिकन्दिषते । Inten चाकन्द्यते । Yan luk चाकन्ति ॥

810 √Kradi, to confound Pre क्रन्दते । Per चक्रन्दे । I Fut. क्रन्दिता ॥

811 √Kladi, to confound, When these three roots are अनिदित् then we have कदयति, अकादि &c Pre क्लन्दते । Per चक्लन्दे । I Fut क्लन्दिता । Nouns क्रन्दन । क्रन्दल । कदनी ॥

ञित्वरा ८१२ संभ्रमे । घटादयः षितः । षित्वादङ् क्तस्तु वक्ष्यते ॥

812 √Itvara, to hurry, make haste Pre त्वरते । Per तत्वरे । I Fut त्वरिता । Pass त्वर्यते । *Aor* अत्वरि or अत्वारि । Namul त्वरंत्वरं or त्वारंत्वारं । Caus. त्वरयति । त्वरयते । *Aor* अतत्वरत । Desi तित्वरिषते । Inten. तात्वर्यते । Yan luk तातूर्ति । तातूर्तः । तातरीषि । तातूर्षि । तातूर्थ । तत्वरीमि । तातूर्मि । Imperative तातूर्हि । Past. Part. Pass त्वरित or तूर्ण । Nouns तुरः ॥

Here end those Ghatâdi roots which are षित् । The force of षित् will be mentioned hereafter in the Kit subdivision

अथ फणान्ताः परस्मैपदिनः ॥

Sub section Now the roots that are given here after upto फण् *are Parasmaipadi*

ज्वर ८१३ रोगे । ज्वरति । जज्वार ॥

813 √Jvara, to be diseased, to be feverish Pre ज्वरति । Per जज्वार । I Fut ज्वरिता । II Fut ज्वरिष्यति । Imperative ज्वरतु । Imper अज्वरत । Pote ज्वरेत् । Bene ज्वर्यात् । Aorist अज्वारीत् । Condi' अज्वरिष्यत् । Pass. ज्वर्यते । *Aor.* अज्वारि or

अज्वारि । Caus ज्वरयति, ज्वरयते । *Aor* अजिज्वरत् । Desi जिज्वरिषति । Inten जाज्वर्यते । Yan luk जाजूर्त्ति, जाजूर्त्त । Past. Part Pass ज्वरित. । ज्वरितवान् । Nouns जूः, जुरौ जुरः । सज्वारी ॥

गड ८१४ सेचने । गडति । जगाड ॥

814 √Gada, to distil, draw out Pre गडति । Per जगाड । I Fut गडिता । Pass गड्यते । *Aor* अगाडि or अगडि । Caus गडयति, गडयते । *Aor.* अजीगडत् । Desi जिगडिषति । Inten जागड्यते । Yan luk जागड्डि । Nouns गडुल ॥

हेड ८१५ वेष्टने । हेडृ अनादरे इत्यात्मनेपदिषु गतः स एवोत्सृष्टानुबन्धोऽनूद्यतेऽर्थविशेषे मित्त्वार्थम्। परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैपदम्। हेडति। जिहेड । हिडयति । अहिडि—अहीडि । अनादरे तु हेडयति ॥

815 √hedा, to surround. The root हेड अनादरे is âtmanepadi. That very root without its indicatory ऋ is repeated here for the sake of including it in the मित्त्व class. That root ought to have been included in the preceding list which gives atmanepadi roots, and not here in the Parasmaipadi subdivision? The very fact of its so given here shows that it is Parasmaipadi also Pre हेडति । Per. जिहेड । I Fut हेडिता Pass हेड्यते । Aor अहिडि or अहीडि । Caus हिडयति, Aor, अजीहिडत् । But from the root हेडृ अनादरे (No 304) we have हेडयति । Desi जिहेडिषति ॥

वट ८१६ भट ८१७ परिभाषणे । वट वेष्टने भट भृतौ इति पठितयोः परिभाषणे मित्त्वार्थोऽनुवादः ॥

816 √vaṭa 817 √bhata to speak, converse These two roots have already been taught before in वट वेष्टने no 322, and भट भृतौ no 329 They are repeatedly here, in order to give them the additional meaning of paribhâshana, and make them मित् । Caus. वटयति । भटयति । No lengthening Aor अवटि or अवाटि । अभटि or अभाटि ॥

नट ८१८ नृत्तौ । इत्थमेव पूर्वमपि पठितं तत्राय विवेकः । पूर्वं पठितस्य नाट्यमर्थः । यत्कारिषु नटव्यपदेशः । वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृत्तं नृत्यं चार्थ. । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ नट नतौ इति पठन्ति । नतौ इत्यन्ये । णिच्येवार्थं दासवादयेभाष्य-ज्ञता नाटि इति दीर्घपाठाद्बुटादिर्णोपदेश एव ॥

818 √naṭa to dance This root has also been taught before, See No. 332 The difference is this, the root taught before means nâtyam or dramatic representation and a person who does that is called naṭa 'an actor' The representation on the stage by spoken words to express the sense of something is nâṭyam or drama But the root given here means to dance, the appropriate verbal nouns being nrityam or nrittam, and not natyam, The person who does this is called नर्तक. 'a dancer', and not नट: 'an actor' The difference between nrityam and nrittam is this Representing of an action or object such as by pantomime or gesticulation is nrityam, while nrittam is dancing pure and simple, mere movement of the body.

Some read नट नतौ 'to bend, to bow", in the Ghatâdi list, and say the ghatâdi nata means to bow They give the illustration नटयति शाखां 'He causes the branch to bend'. Others say that it means to go

The ghatâdi naṭa (i e, the present root) is to be understood to have been enunciated with an initial ण, that is it is णट नृत्तौ। The reason for this is that in the exceptions to the roots that are taught with an initial ण, the author of the Mâhabhâshya gives नाटि, i e the nâta with long आ। The मित root can never have long आ in the causative See VI 1, 65 already gone before In other words, the present root नट् andthe root no 342 are both णोपदेश andthe Churâdi root नट् is not so and is the root mentioned in sûtra VI I 65

Note —The representation on scene may be by words (vakyârtha abhinaya) and then it is drama or nâṭyam. Or it may be by gesticulation without words (padârtha abhinaya), and then it is called nṛityam Or there may be no representation at all, but mere rhythmic movements of limbs according to rules and then it is called nritta Then respective nouns are nata 'an actor,' and narttaka 'a pantomime' or 'a dancer'

The Causative of the Ghatâdi नट is नटयति 'he causes to dance' The aorist is अनटि or अनाटि ॥

ष्टक ८१९ प्रतीघाते । स्तकति ॥

819 √ Shtaka to resist, repel, push back, strike against Pre स्तकति। Per तस्ताक। I Fut स्तकिता। Caus स्ताकयति, स्तकयते। Aor अतिष्टकत्। Pass aor अस्तकि or अस्ताकि। Desi तिस्तकिषति। Inten तास्तक्यते। Yan luk तास्तक्ति ॥

चक ८२० तृप्तौ । तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोऽनुवादः। आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् ॥

820 √ Chaka to be satiated, satisfied This root has already been taught before as चक तृप्तौ प्रतिघाते। No 93 'to be satisfied', and 'to resist' It is âtmanepadî there It is repeated here in order to make it a मित् root, and then to confine its meaning to satisfaction only It is moreover Parasmaipadi now because of its repetition in this list Pre चकति। Per चचाक। I Fut चकिता। Aorist अचाकीत् or अचकीत। Caus चकयति, चकयते। Aor अचीचकत। Pass aor. अचकि or अचाकि।

कखे ८२१ हसने । एदित्वान्न वृद्धिः। अकखीत् ॥

821 √ Kakhe to laugh As it has an indicatory ए, there is no Vṛiddhi in the aorist As अकखीत्। Pre कखति। Per. चकाख। चकखतु। I Fut कखिता। Aorist अकखीत्। Caus कखयति, कखयते। Pass. Aor अकखि or अकाखि। Desi चिकखिषति। Inten चाकख्यते। Yan luk चाकक्ति ॥

रगे ८२२ शङ्कायाम् ।

822 √ Rage to doubt Pre रगति। Per रराग ॥

लगे ८२३ संगे ।

823. √ Lage to adhere or stick to Pre लगति। Noun लग्नः ॥

ह्रगे ८२४, ह्लगे ८२५, षगे ८२६, ष्ठगे ८२७ संवरणे ।

824 √ Hrage 825 √ Hlage, 826 √ Shage, 827 √ Shthage 'to hide, cover' Some read स्थगे instead of ष्ठगे। But it is incorrect, Pre. ह्रगति। Per. जह्राग।

Aorist अह्रगीत् । Caus ह्रगयति, ह्रगयते । Aor अजिह्रगत् । Pass Aor अह्रागि । c अह्रगि । Desi जिह्रगिषति । Inten जाह्रगयते । Yan luk जाह्रग्ति ॥

825. √Hlage, Pre ह्लगति । Per जह्लाग । I Fut ह्लगिता । Aorist अह्लगीत् ॥

826 √Shage, Pre सगति । Per ससाग । सेगतु । सेगु । Aorist असगीत् । Caus सगयति, सगयते । Aor असीसगत् । Pass Aor असगि or असागि । Desi सिसगिषति । Inten. सासगयते । Yan luk सासग्ति ॥

827. √Shṭhage Pre स्थगति । Per तस्थाग । I Fut स्थगिता । Aorist अस्थगीत् । Caus स्थगयति, स्थगयते । Aor. अतिस्थगत् । Pass Aor अस्थगि or अस्थागि । Desi तिस्थगिषति । Inten तास्थगयते । Yan luk तास्थग्ति ॥

कगे ८२८ नोच्यते । अस्यायमर्थ इति विशिष्य नोच्यते। क्रियासामान्यार्थत्वात् । अनेकार्थत्वादित्यन्ये ॥

828 √Kage to act, perform The word no'chyate means 'nothing is said That is we do not give any specific meaning to the √Kage, because it denotes action in general Some say it has many meanings and therefore no particular meaning is assigned Pre कगति । Per चकाग । I Fut कगिता । Aorist अकगीत । Desi चिकगिषति ॥

अक ८२९, अग ८३० कुटिलायां गतौ ।

829 √Aka, 830 √Aga To go or move tortuously like a serpent Pre अकति । Per आक । I Fut अकिता । Aorist आकीत, as मा भवानकीत् । C us आकयति । Aor मा भवान् अचकत । Pass Aor मा भवान अकि or आकि । Desi अचिकिषति ॥

830 √Aga, Pre अगति । Per आग । I Fut अगिता । Aorist आगीत् । Caus. आगयति, आगयते । Desi अजिगिषति ॥

कण ८३१, रण ८३२ गतौ । चकारौ । ररास ॥

831 √Kana, 832 √Rana to go, to move These two roots have the meaning 'to make noise' also See Nos 176 and 472 When they have that sense their causative is काणयति and राणयति । Pre कणति । Per चकाण । I Fut कणिता । Caus कणयति, कणयते । Pass Aor अकणि or अकाणि । Desi चिकणिषति ॥

832. √Rana, to go. Pre रणति । Per रराण । I Fut रणिता । Caus रणयति । रणयते ॥

चण ८३३, शण ८३४, श्रण ८३५ दाने च । शणा गतौ इत्यन्ये ॥

833 √Chana, 834 √Sana, 835 √Srana To go as well as to give According to some √Sana means to go Pre चणति । Per चचाण । चेणतु । चेणु: I Fut. चणिता । Aorist अचाणीत् or अचणीत् । Caus चणयति, चणयते । Aor अचचणत् । Pass Aor अचणि or अचाणि । Desi चिचणिषति । Inten चाचणयते । Yan luk चञ्चणिः ।

834 √Sana Pre शणति । Per शशाण । I Fut शणिता । Aorist अशणीत् । अशाणीत् ॥

835 √Srana, Pre श्रणति । Per शश्राण । I Fut श्रणिता । Aorist अश्राणीत् । अश्रणीत् ॥

श्रथ (श्नथ) ८३६, (क्नथ) श्लथ ८३७, क्रथ ८३८, क्लथ ८३९ हिंसार्था: ।
जासिनिप्रहण—(६१३) इति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते । क्राथयति । मित्त्व तु निपातनात्परत्वात् मिटामृलो —(२७६२) इति दीर्घे चरितार्थम् । अक्रथि—अक्राथि । क्रथं क्रथम् । क्राथं क्राथम् ॥

836 √Śratha (√Śnatha), 837 √Ślatha (√Knatha) 838 √Kratha, 893 √Klatha To injure Though the root √क्रथ is a मित root, yet it takes vriddhi in the Causative, because it has been particularised so in the sutra II 3 56 S 613 As क्राथयति । The मित operation takes place on this root in the चिण्‌ and णमुल affixes by VI 4 93 S 2762, because that is a sûtra subsequent to the nipâtana sûtra II 3 56 This मित causes the lengthening before चिण्‌ and णमुल । As अक्रथि or अक्राथि । क्रथंक्रथम or क्राथंक्राथम् । Pre श्रथति । Per शश्राथ । I Fut श्रथिता । Caus श्रथयति, श्रथयते । Aor अशिश्रथत । Pass aor अश्रथि or अश्राथि । Desi शिश्रथिषति । Inten शाश्रथ्यते । Yan luk शाश्रत्ति ॥

837 √Ślatha, Pre श्लथति । Per. शश्लाथ । I Fut श्लथिता । Desi शिश्लथिषति । Inten शाश्लथ्यते ॥

838 √Knatha, to injure Pre क्नथति । Per चक्नाथ । I Fut क्नथिता ॥

839 √Klatha, Pre क्लथति । Per चक्लाथ । I Fut क्लथिता ॥

'चन ८४० च' । हिंसायामित्ति शेषः ॥

840 √Vana (chana) to injure By the force of the word च, the meaning of 'to injure' is drawn into it from the last. Some read it as √Chana, Pre चनति । Per चचान । I Fut चनिता । Caus चनयति, चनयते । Pass Aor अचनि or अचानि ॥

वनु च ८४१ नोच्यते । 'वनु' इत्यपूर्व एवाय धातुर्न तु तानादिकस्यानुवादः । उदित्करणसामर्थ्यात् । तनेः क्रियासामान्य वनतीत्यादि । प्रवनयति । अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते ॥

841 √Vanu And √Vanu also is not mentioned. That is to say that this √Vanu is an original root and not a repetition of the Tanâdi root √Vanu to beg (VIII 8) This we say because this √Vanu has an indicatory उ and scope must be given to it. For had it been merely a repetition of the Tanâdi √Vanu, that root has already an indicatory उ so that letter need not have been repeated here The conjugation is वनति and not वनुते । With a preposition we have प्रवनयति without lengthening When the root does not take any preposition, it is optionally मित and then the Causative is वनयति or वानयति । See Gana sûtra ज्वलहृवलह्मलनमामनुपसर्गाद्वा lower down The root √Vanu means action in general Pre वनति । Per ववान । I Fut वनिता । Caus प्रवनयति । Aor, प्रावीवनत् । Pass Aor प्रावनि or प्रावानि ॥

ज्वल ८४२ दीप्तौ । णप्रत्ययार्थं पठिष्यमाणा एवाय मित्त्वार्थमनूद्यते । प्रज्वलयति ॥

842 √Jvala to shine With this root also begins a sub class called jvalâdi which by III 1 140 take ण in forming verbal nouns, and it will be taught later on, see No 884 That root, to be taught subsequently, is repeated here in order to make it मित् । As प्रज्वलयति । When it does not take a preposition it is optionally मित् । See Gana Sûtra later down. Pre ज्वलति । Caus प्रज्वलयति । Pass Aor, प्राज्वालि or प्राज्वलि ॥

ह्वल ८४३, ह्मल ८४४ चलने । प्रह्वलयति । प्रह्मलयति ॥

843 √Hvala, 844 √Hmala to walk, move, Pre ह्वलति । Per, जह्वाल ।

I Fut ह्मलिता । Aorist अह्मालीत । There is no optional vriddhi See VII 2 2 Caus प्रह्मलयति । Without any preposition the root is optionally मित् । See below, Aorist Pass प्राह्मलि or प्राह्मालि । Desi जिह्मलिषति । Inten जाह्मल्यते । Yan luk जाह्मलीति ॥

844 √Hmala, Pre ह्मलति । Per जह्माल । I Fut ह्मलिता ॥

'स्मृ ८४५ आध्याने' । चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादः । आध्यानमुत्कण्ठापूर्वकं स्मरणम् ॥

845 √Smri To remember with regret or anxiety This root is taught further on in the sense of 'remembering' It is repeated here for the sake of making it मित् when it has the sense of remembering with regret. Adhyâna means 'remembering with anxiousness' Pre. स्मरति । Caus मात्. स्मरयति । Pass Aor. अस्मरि or अस्मारि ॥

दृ ८४६ भये । 'दॄ विदारणे' इति क्र्यादेरयं मित्त्वार्थोऽनुवादः । दृणन्तं प्रेरयति दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दरतीत्यादि । कौविह्वुटादौ 'ऋत्स्मृदृत्वर–' (२५६६) इति सूत्रे च 'दॄ' इति दीर्घस्थाने ह्रस्वं पठन्ति तच्चिन्त्यमिति माधवः ॥

846 √Dri to fear Deva, Dhanapala and Purna Chandra are of opinion that this is an original root But Maitreya holds that it is the same root as दॄविदारणे 'to burst' of the Kryâdi class No 23 and that it is repeated here to give it the designation of मित् । This is the opinion endorsed by the anthor of Siddhanta Thus the causative दरयति means दृणन्तं प्रेरयति "Causes to burst or split up'. When it has not the meaning of fear, we have दारयति । According to those who hold it to be a Bhuâdi root, it is conjugated as दरति &c Some read this root as दृ with a short ऋ in the sutra VII 4 95 S 2566 instead of long ॠ ॥ But that is wrong according to Mâdhava, Pre दरति Per ददार । दद्रतु or ददरतु । I Fut. दरिता । Caus दरयति ॥

नॄ ८४७ नये । क्र्यादिषु पठिष्यमाणस्यानुवादः । नयादन्यत्र नारयति ॥

847 √Nri to lead. This is a repetition of the root which will be taught in the Kryâdi class When the meaning is not that of to lead, the causative is नारयति । See Kryâdi No 25 Pre नरति or नृणाति । Per ननार । I Fut नरिता । Aorist अनारीत् । Caus. नरयति । Pass Aor. अनरि or अनारि ॥

श्रा ८४८ पाके । श्रै इति कृतात्वस्य 'श्रा' इत्यदादिकस्य च सामान्येनानुकरणम् ॥

× लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ×

× लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् × इति परिभाषाभ्याम् । श्रपयति विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः ॥

848. √Srâ, to cook. The √Srai to cook will be taught later on. See No. 966 It is that root with its ऐ changed to आ, so that Srâ may include both the Bhuâdi No. 966, and the Adâdi Sra No 44. The following two Paribhâshâs should be remembered in connection with forms like these,

Paribhâshâ 1 —If a root occurring in a rule be such that it belongs to two classes, one in which there is no elision of the characteristic (Vikarana), and the other in which there is an elision of the vikarana (such as the roots of the Adâdi class), then we must interpret the rule to mean the root which is not Adâdi Thus here श्रा belongs both to Bhuâdi and Adâdi we must take it to mean Bhuâdi, and not Adâdi, in accordance with this maxim.

Paribhâshâ 2 —Whenever a term is employed which might denote both something original and also something else resulting from a rule of Grammar—or when a term is employed in a rule which might denote both something by an other rule in which the same individual term has been employed, and also some thing else formed by a general rule—such a term should be taken to denote, in the former case, only that which is original, and in the latter case, only that which is formed by that rule in which the same individual term has been em ployed. Thus in accordance with this maxim, the *original* root श्रा of the Adâdi class is to be taken, and not the root श्रै of the Bhuâdi class which assumes the form श्रा by the application of a rule of Grammar The combined result of the two maxims is that we take *both* roots—the श्रै of Bhuâdi and the श्रा of Adâdi Thus the Caus श्रपयति means 'causes to boil' When not meaning to cook, we have श्रापयति 'he causes to perspire' Pre, श्रायति। Per, शिश्राय। I Fut, श्राथिता। Caus श्रापयति। Aor अश्रपि or अश्रापि॥

मारणतोषणनिशामनेषु ज्ञा ८४९। 'निशामनं' चाक्षुषज्ञानम्' इति माधवः। 'ज्ञापनमात्रम्' इत्यन्ये। 'निशानेषु' इति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वेवार्थेषु जानातिर्मित्। 'ज्ञप मिच्च' इति चुरादौ। ज्ञापनं मारणादिकं च। तस्यार्थः। कथं 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च। शृणु। माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात्। ज्ञापनमात्रे मित्त्वमिति मते तु 'ज्ञा नियोगे' इति चौरादिकस्य। धातूनामनेकार्थत्वात्। निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः॥

849 √Jñâ to kill, to satisfy, to observe or behold. According to Mâdhava, niśâmana means visual perception. Others say it means to inform in general Another reading is Niśâneshu. The root will then mean 'to sharpen' The root √ज्ञा is मित् in these senses only. The Churâdi √ज्ञप is also मित्। See Churâdi No 81 That also means to make known, to kill &c If the root in these senses be मित्, how do you explain the forms विज्ञापयति and ज्ञापयति instead of विज्ञपयति and ज्ञपयति in the following sentences:—विज्ञापना भर्तृषु सिद्धिमेति "Respectful statement made to superiors brings success' or ज्ञापयति आचार्यः 'thus announces or proclaims the Achârya'? Listen. According to Mâdhava the √Jñâ is मित् when it means seeing with eyes, and not intellectual conception The root is therefore not मित् in the above examples, where it means to inform &c and not visual perception, But in the opinion of those who hold the view that √Jñâ is मित् in the sense of 'to see, to inform' in general, the above forms are explained by saying that they are derived from the √Jñâ niyoga of the Churâdi class No 193, For roots have many meanings, and so √Jñâ is not confined to niyoga only Of course, no such difficulties arise in the case of Haradatta

and others who read निशानेषु 'to sharpen,' and not the ambiguous word निशामनेषु in the text

NOTE —The different meanings of this root are illustrated by the following examples. Thus पशुं संज्ञपयति 'He causes the sacrificial animal to be killed " विष्णुं विज्ञपयति 'He propitiates Vishnu', संज्ञपयति रूपं 'He shows the form' (according to Mâdhava), 'He explains the form' (according to others) प्रज्ञपयति शरम् 'He sharpens the arrow'

कम्पने चलिः ८५० । 'चल कम्पने' इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति । अन्यथा करोतीत्यर्थः' । 'हरतीत्यर्थ.' इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥

850. √Chali to shake. The √Chala to shake is a root belonging to the Jvalâdi sub division Thus चलयति शाखा 'He shakes the branch' But when it does not mean to shake, the Causative is châlayati, as शीलं चालयति 'He deviates from good conduct. That is, he does what is not proper' According to Svâmi it means 'to take away' So also सूत्रं चालयति 'he throws the thread' Here चालयति means क्षिपति according to Sudhâkara. Pre चलयति । Per चचाल, चेलतुः, चेलुः । I Fut चलिता ॥

छदिर ८५१ ऊर्जने । 'छद अपवारणे' इति चौरादिकस्य स्वार्थणिजभावे मित्त्वार्थोऽयमनुवादः । अनेकार्थत्वादूर्जनेऽर्थे वृत्तिः । छदन्तं प्रयुङ्क्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुङ्क्त इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति । प्राणीभवति अपवारयति चेत्यर्थः ।

851 √Chhadir to strengthen, to animate This is a repetition of the √Chhada 'to cover over,' of the Churâdi class No. 290, without the णिच्, in order to make it a मित् root As the roots have many meanings, the sense of ऊर्जन is attached to it here. Thus छदयति means 'he strengthens or animates' In other senses, the causative is छादयति which means 'he causes to cover' When the root is Churadi and takes णिच् without change of sense, we have छादयति meaning 'he becomes strong,' 'he becomes animated' or 'he covers'

जिह्वोन्मथने लडिः ८५२ । 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः । उन्मथनं रपनम् । जिह्वाशब्देन षष्ठीतत्पुरुषः । लडयति जिह्वाम् । तृतीयातत्पुरुषो वा । लडयति जिह्वया । अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते । समाहारद्वन्द्वोऽयम् । लडयति शत्रुम् । लडयति दधि । अन्यत्र लाडयति पुत्रम् ।

852 √Lad to loll the tongue This is a repetition of the √ Lad 'to play' (see No 351), in order to make it मित् when it has this particular sense The word unmathana means 'to strike' It forms with the word jihva a Genitive Tatpurusha compound meaning 'striking or shaking of the tongue,' Thus लडयति जिह्वाम् 'He lolls the tongue' Or the word unmathana may form an Instrumental Tatpurusha compound with the word jihvâ, As लडयति जिह्वया 'He strikes by the tongue any other object.' Others hold that by the word jihvâ is indicated the action of the tongue. They say jihvonmathane is a Samahara Dvandva compound meaning 'the action of the tongue' and 'to strike,' Thus लडयति शत्रुम् 'He abuses the enemy', and लडयति दधि 'he licks the curd or churns the curd'

Note Thus for the purposes of मित the root must mean (1) to loll the tongue, (2) to strike with the tongue, (3) to blame or abuse, (4) to lick &c (any action of the tongue) or to churn, or shake, When it has not these meanings, we have लाडयति पुत्रम् 'He fondles his son'

Note Another reading is जिह्वोन्मथनयोः। The word मथन is same as मन्थन The ङ in the three roots चलि, छदि and लडि is not indicatory of नुम् augment, but merely marks the root,

मदी ८५३ हर्षग्लेपनयोः। ग्लेपनं दैन्यम्। दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मदयति। हर्षयति। ग्लेपयति वेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः।

853 √Madî 'to rejoice', 'to be poor' Glepan means poverty. This is a repetition of the Divâdi root No. 99, for the sake of making it मित। Thus मदयति means 'He causes to rejoice', or 'he causes to be poor' When not denoting 'to rejoice or to be poor', we have मादयति 'It produces mental confusion' So also निमादयति 'He pronounces the vowels and consonants clearly' As we find in the Prâtiśâkhyam उपलब्धि विं'माद इति। अक्षरव्यञ्जनानामिति शेष ॥

ध्वन ८५४ शब्दे। भाव्यय मित्त्वार्थमनूद्यते। ध्वनयति घण्टाम्। अन्यत्र-ध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः। अत्र भोजः 'दलि वलि स्खलि रणि ध्वनि त्रपि क्षपयश्च' इति पपाठ।

854 √Dhvana to sound. This is a repetition, for the sake of मित, of the root No 881 to be taught hereafter, see its conjugation there Thus the Causative is ध्वनयति घण्टाम् 'He sounds the bell.' In any other sense we have ध्वानयति meaning 'He causes to articulate indistinctly'

Here Bhoja adds the following seven roots also, namely, दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि and क्षपि। Of these ध्वनि and रणि have already been mentioned before in this list see No 854, and 832 The √Dala to split (No 581), √vala 'to cover' (No 520) √skhala 'to stumble (No. 577), and √trap 'to be ashamed' (No. 399), have already been taught before, though not in the मित sub division The causatives of these will be दलयति, वलयति, स्खलयति and त्रपयति ॥

The root क्षपि is the same as the √Kshu to waste, to be mentioned later on (see No 961): the ै has been changed to आ and पुक् augment has been added. As क्षपयति ॥

तत्र ध्वनि ८५५ रणी उदाहृतौ।

855. √Rani to sound Caus रणयति ॥

दल विशरणे ८५६।

856. √Dala to split Caus दलयति ॥

वल संवरणे ८५७।

857 √Vala, to cover Caus वलयति ॥

स्खल संचलने ८५८।

858. √Skhala to stumble Caus स्खलयति ॥

अपि ८५९, क्षपयश्च ८६० । त्रपुष् लज्जायाम् इति गताः । तेषां णौ वलयति । वलयति । स्खलयति । त्रपयति । 'क्षि क्षये, इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः । क्षपयति ।

859 √Trap to be ashamed Caus त्रपयति। Cf √Trapush 399

860 √Kshai, to waste Caus क्षपयति with the पुक् augment.

स्वन ८६१ अवतंसने । शब्दे इति पठिष्यमाणस्यानुवादः । स्वनयति । अन्यत्र स्वानयति ।

861 √Svana, 'to adorn' This is a repetition of the √Svana 'to sound,' No 879 to be taught later on Thus the causative is स्वनयति 'He causes to adorn.' But in any other sense we have स्वानयति 'He causes to resound.'

घटादयो मितः । मित्संज्ञा इत्यर्थः

"Gana sûtra" A. The roots beginning with घट No 800 and ending with स्वन (No 861) are as if they had an indicatory म ॥

The result of which is that sutras VI 4. 92 &c apply to them They get the designation मित् ॥

जन ८६२, जृष ८६३, क्नसु ८६४, रञ्ज ८६५, अमन्ताश्च ८६६ । 'मितः' इत्यनुवर्तते । 'जृष' इति षित्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जृणातेस्तु जारयति । केचित्तु 'जनी जृ क्नसु—, इति पठित्वा 'क्नसु निरसने' इति दैवादिकमुदाहरन्ति ।

"Gana sûtra" B The roots √Janî, √Jrisha, √Knasu, √Rañja and those whose final is अम are also मित् ॥

The word मित् is understood in this sûtra The root जॄ is exhibited in the sûtra with an indicatory ष, as जृष् , and therefore it means the root जॄ that is conjugated as जीर्यते i e the Divadi जॄ । The Kryâdi जॄ (जृणाति) is not मित and its causative is जारयति । Some read this sûtra as, "The roots √Janî, √Jri, and √Shnasu &c", and they take the Divadi root √Shnasu No, 5 and give example of it as क्नसयति ॥

862. √Janî 'to be produced' It is a root of the Divâdi class and is conjugated there See No. 41. It being a मित् the Causative is जनयति ॥

863. √Jrish, 'to grow old' This is also a Divâdi root (see No. 22) Its causative is जरयति । Some read झॄ instead of जॄ ॥

864 √Knasu, This is also a Divâdi root (see No 6) The causative is क्नसयति ॥

865 √Rañja 'to color' This is a root belonging to both Divâdi and Bhvâdi classes Its causative is रञ्जयति or रजयति । As रजयति मृगान् = रमयति । The न् is elided by the vârtika under VI 4 91 रञ्जयति पक्षिणः । No elision, as the object is 'birds' and not beasts.

866 The roots ending in अम् are मित् ॥

As the roots कम, गम्, रम्, &c. Thus their causatives are कमयति, गमयति, रमयति ॥

ज्वलह्वलह्मलनमामनुपसर्गाद्वा । ८६७ । एषां मित् वा । प्राप्तविभाषेयम् । ज्वलयति । ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कं ' तार्हि प्रज्वालयति । ज्वामयतीति । घञन्तात् 'तत्करोति—' इति णौ । कं संक्रामयतीति । "मितो

ह्रस्व.' (२५६८) इति सूत्रे 'वा चित्तविरागे' (२६०४) इत्यतो 'वा' इत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत् । एतेन 'रजो विश्रामयन्राज्ञां' 'धुर्यान्विश्रामयेति सः' इत्यादि व्याख्यातम् ।

867. "Gana sûtra C The roots √Jvala, √Hvala, √Hmala, and √Nama, are optionally मित when not preceded by any preposition

When they are connected with a preposition they are optionally मित् । This is an example of prâptavibhâshâ For these roots have already been declared as मित् by the previous rules नम ends in अम and is मित् by the last sûtra The present sûtra declares an option under certain circumstances As ज्वलयति or ज्वालयति ॥

But when they are preceded by an upasarga they are *necessarily* मित् and no option is allowed As प्रज्वलयति ॥

How do you explain the non-mit causatives like प्रज्वालयति and उन्नामयति ? These are not from the roots ज्वल् and नम्, but from the nouns ज्वाल and नाम formed by घञ् added to the above roots To the nouns ज्वाल and नाम is added the Denominative affix णि with the force of तत्करोति । (See Chura li Gana sutra तत् करोति तदाचष्टे after the root कत्र) How do you explain the form संज्ञामयति ? According to the author of Kâsikâ Vritti, it is explained as an example of option For he reads in the sûtra मितां ह्रस्वः (VI 4 92 S 2568), the anuvritti of वा, 'optionally' from वा चित्तविरागे (VI 4 91 S 2604), and makes that rule a vyâvasthita bibhâshâ On that theory is explained also the forms रजो विश्रामयन् राज्ञाम् and धुर्यान् विश्रामयेति स &c.

ग्लास्नावनुवमां च । ८६८ । अनुपसर्गादेषां मित्त्वं वा स्यात् । आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा ।

868 "Gana sûtra" D The roots Glâ, Snâ, Vanu and Vama are optionally मित् ॥

These roots are optionally मित् when not preceded by any preposition In the case of the first two roots, it is an aprâpta vibhâshâ, for no rule has as yet declared √Gla and √Snâ to be मित् । In the case of the last two roots, it is prâpta vibhâshâ for they were already मित by the previous sutra Caus ग्लपयति, ग्लापयति, स्नपयति, स्नापयति, वनयति, वानयति, वमयति, वामयति ॥

न कम्यमिचमाम् । ८६९ । अमन्तत्वात् प्राप्तं मित्त्वमेषां न स्यात् । कामयते । आमयति । चामयति ।

869. "Gana sûtra" E. The roots √Kam 'to love' √Am 'to go' and √Cham 'to eat' are not मित् ॥

These roots all end in अम and, therefore, by the Gana-sûtra जनी &c they would have been मित् । Thus Caus कामयते । आमयति । आचामयति ॥

शमो दर्शने । ८७० । शाम्यति दर्शने मित् न स्यात् । निशामयति रूपम् । अन्यत्र तु "प्रणयिनो निशमय्य वधूकथा." । कथं तर्हि 'निशामय तदुत्पत्ति विस्तराद्गदतो मम" इति । शम आलोचने इति चौरादिकस्य धातूनामनेकार्थत्वाद्वा रूपमिति वृत्तिः शाम्यति वह ।

870 "Gana sûtra" F. The root √Sama meaning 'to see,' is not मित् ॥

This root belongs to the Divâdi class As निशामयति रूपम् । "He shows the form' अत्युत्कृष्टमिदं तीर्थं भारद्वाज निशामय । "This is a very excellent holy place see it O! Bhâradvâja' When not meaning to see it is मित् as it ends with अम् । Thus प्रशमयति निशमय्य यथू कथा । How do you explain the form निशामय in the following verse निशामय तदुत्पत्ति विस्तराद् गदतो मम ॥ "Hear from me in detail the account of his birth" This is a from of the Churâdi root शम् No 156 As roots have multiple meanings it means here to listen', like शाम्यति ॥

यमोऽपरिवेषणे। ८७१। यच्छतिर्भोजनतोऽन्यत्र मित् न स्यात्। आयामयति। द्राघयति। व्यापारयति वेत्यर्थः। परिवेषणे तु—यमयति ब्राह्मणान्। 'भोजयति' इत्यर्थः। 'पर्यवसित नियमयन्' इत्यादि तु नियमवच्छब्दात् तत्करोतीति णौ बोध्यम्।

871 "Gana sûtra" G The root √yama, when not meaning to eat, is not मित् ॥

When not meaning to eat, the root यम उपरमे (यच्छति &c). is not मित् । Thus आयामयति which is equivalent to द्राघयति or व्यापारयति । But when it means 'to eat,' we have यमयति ब्राह्मणान् । 'He feeds the Brâhmanas' The form नियमयन् is not the causative Present Participle of √यम, but to the noun नियमवत् is added the Denominative affix णिच् under तत्करोति sûtra, When this affix is added, the वत् is elided. From the Denominative root thus formed, we get the Present Participle नियमयन् ॥

स्खदिर् ८७२ अवपरिभ्यां च। मितेत्येव। अवस्खादयति। परिस्खादयति। 'अपाऽवपरिभ्यः' इति न्यासकारः। स्वामी तु 'न कमि—' इति नञमनुवर्तयित्वा सूत्रद्वयमननुवर्त्य शमः 'अदर्शने' इति छित्त्वा। यमस्तु 'अपरिवेषणे' मित्त्वमाह। तन्मते 'पर्यवसित नियमयन्' इत्यादि सम्यगेव। 'उपसृष्टस्य स्खदेः स्खदवादि पूर्वस्य' इति नियमात्मस्खादयतीत्याह। तस्मात्सङ्गये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः। एवं च मत वृत्तिन्यासादिविरोधादुपेक्ष्यम्।

872. "Gaṇa sûtra' H The root Skhada when preceded by the Prepositions '*ava*' or '*pari*' is not मित् ॥

The words 'it is not मित्' are understood here also, Thus अवस्खादयति and परिस्खादयति ॥

According to Bodhi Nyâsa, the three prepositions अप, अव and परि are taken for the purposes of this rule.

In the opinion of Svâmî the anuvritti of 'not' from the sûtra न कमि &c Gaṇa sûtra E is not to be read in the subsequent sûtras F, G, and H, as we have done. According to him the sûtra F is not शमो दर्शने but शमोऽदर्शने meaning "the root √शम when denoting 'not seeing' is मित् " । He explains sutra G as "the root √यम when not meaning *to eat* is मित् " । In his opinion the examples पर्यवसित, नियमयन् &c are perfectly valid examples under the rule, with nothing exceptional about them. With regard to the present sûtra H. he explains it by saying 'the

√Skhada which is always मित् without a preposition, is conditionally मित् when preceded by the Prepositions अव, and परि but it is not मित् when preceded by any other Preposition than these two" In other words he makes the present sûtra a Niyama rule, restricting the मित् - hood of the compound verb √Skhada to the Prepositions अव and परि । Therefore प्रस्कादयति is not मित् because the upasarga is प्र । Thus of the three sûtras F, G and H, as regards F there is no ultimate difference between the Swami and us. With regards to G and H his view is diametrically opposed to us so that the examples we have given under these sûtras are his counter-examples, and our counter examples are his examples. This opinion should be rejected as opposed to the author of the Kasikâ Vritti, and Nyâsa Kâra &c

फण ८७३ गतौ । 'न' इति निवृत्तमसम्भवात् । निषेधात्पूर्वमसौ न पठितः । फणादिकार्यानुरोधात् ।

873 √Phana, to go The **anuvritti of न** of the Gana sûtra E which was current in the previous sûtras, is not to be read in this, and its anuvritti ceases, for it is not possible to read it into this sûtra. This sûtra could well have been inserted prior to the commencement of the prohibitory sûtras E, F, G, H But it has not been so read, because of the necessity of those rules which ordain special operations with regards to फणादि roots such as the next sûtra.

२३५४ । फणां च सप्तानाम् । ६ । ४ । १२५ ॥

एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । फेणतुः । फेणुः । फेणिथ । पफणतुः । पफणुः । फणयति ॥

2354 ए is optionally substituted for the अ and आ of the seven roots फण्, राज भ्राज भ्राश्, भ्लाश्, स्यम and स्वन्, and the reduplicate is elided thereby, before the affixes of the Perfect having an indicatory क् (or ङ्) as well as before the थ with the इट् augment

Thus फेणतुः, फेणुः, फेणिथ or पफणतुः, पफणुः, पफणिथ ॥ So also the causative फणयति. ॥

'वृत्'। घटादिः समाप्तः। फणेः प्रागेव वृदित्येके। तन्मते फाणयतीत्येव।

End The word vrit means that the Ghatâdi roots end here or they remain only upto this place It marks the end of this subdivision Some read this word वृत् just before फण, and so in their opinion it is not a मित् root Their causative is फाणयति ।

Pre फणति । Per पफाण । फेणतुः । फेणुः । पफणिथ । पफण । पफणिव or फेणिव । पफणिम or फेणिम । I Fut. फणिता । Aorist अफाणीत् । अफणीत् । Caus फणयति । Caus Aor अपीफणत् । When not meaning, to go, we have फाणयति सक्तून् 'He skims the gruel', Desi पिफणिषति । Inten पम्फण्यते । Yan luk. पम्फणीति or पम्फण्टि । D. पम्फाणटः । Imperative पम्फाणहि । Noun फाण्टः 'a decoction'

राज ८७४ दीप्तौ । स्वरितेत् । राजति–राजते । रेजतु – रराजतुः । रेजे रराजे । 'अतः' इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम् ।

874 √ Rājṛ to shine. It is svaritet and consequently is conjugated in both Padas Pre राजति । A राजते । Per. रराज । रेजतुः or रराजतुः । A रराजे or रेजे । Though by VI 4 120, the ए substitution can take place only where there is short अ and not where there is long आ as in राज, yet it is so here, because of the specific rule VI 4 125 S 2354, which causes the आ to be changed to ए । I Fut. राजिता । A राजिता । Caus राजयति, A राजयते । Aor अरराजत् । Desi रिराजिषति । A रिराजिषते । Inten. राराज्यते । Yaṅ luk राराजीति । Nouns सम्राट् 'an emperor' राष्ट्रम् । राजन् । राजन्यः ॥

'टुभ्राजृ ८७५, टुभ्राशृ ८७६, टुभ्लाशृ ८७७ दीप्तौ' । अनुदात्तेतः । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः । तत्र हि राजिसाहचर्याल्लुपधादेरेव ग्रहणम् । भ्रेजे-बभ्राजे । 'वा भ्राश-' (२३२१) इति श्यन्वा । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे । भ्लाश्यते-भ्लाशते । भ्लेशे-बभ्लाशे । द्वावपीमौ तालव्यान्तौ ॥

875 √ Ṭu bhrājṛ, 876 √ Ṭu Bhrāśṛ, 877 √ Ṭu Bhlāśṛ 'to shine. These are anudāttet. The root √ Bhrāj is repeated here to make it applicable the Phaṇādi rule S 2354. Its enumeration in the preceding root No. 194 is to prevent the application to it of the व्रश्च rule VIII, 2, 36. The ज of that भ्राज is not changed to ष, but the ज् of this bhrāj is so changed. For in the sūtra VIII 2 36 the root bhrāj is read in the company of राज and so indicates that it is the Phaṇādi √ Bhrāj which is the subject of that rule. Pre भ्राजते । Per. भ्रेजे or बभ्राजे । I Fut भ्राजिता । Inten, बाभ्राज्यते । Yaṅ luk बाभ्राजीति । Imperfect. अभ्राजत् । Noun भ्राजथुः । भ्राष्ट्रम् ॥

876 √ Bhrāś to shine. Pre भ्राश्यते or भ्राशते । The श्यन् is added optionally by III 1 70 S. 2321 Per भ्रेशे, बभ्राशे । I Fut भ्राशिता । II Fut. भ्राशिष्यते । Imperative भ्राश्यताम् । भ्राशताम् । Imper अभ्राश्यत । अभ्राशत । Pote भ्राश्येत । भ्राशेत । Bene भ्राशिषीष्ट । Aorist अभ्राशिष्ट । Caus भ्राशयति । Aor. अबभ्राशत् । Desi बिभ्राशिषते । Inten बाभ्राश्यते । Yaṅ luk बाभ्राशीति । Nouns भ्राशथुः ॥

877 √ Bhlāś to shine Pre भ्लाश्यते । भ्लाशते । Per. भ्लेशे । बभ्लाशे । I Fut, भ्लाशिता । II Fut भ्लाशिष्यते । Imperative भ्लाश्यताम् । भ्लाशताम् । Imper. अभ्लाश्यत । अभ्लाशत । Pote भ्लाश्येत । भ्लाशेत । Bene, भ्लाशिषीष्ट । Aorist. अभ्लाशिष्ट । Desi, बिभ्लाशिषते । Nouns, भ्लाशथुः ॥

'स्यमु ८७८, स्वन ८७९, ष्टन or स्तन ८८०, ध्वन ८८१ शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः-सस्यमतुः । अस्यमीत् । स्वेनतुः-सस्वनतुः । स्वनतु । अस्वानीत्-अस्वनीत् । विष्वणति । अवष्वणति । सशब्दं भुङ्क्ते इत्यर्थः । 'वेश्च स्वनः-' (२२७४) इति षत्वम् । फणादयो गताः । दध्वनतुः ॥

The roots commencing with √ Syam and ending with √ Ksharate are Parasmaipadi 878 √ Syamu, 879 √ Svana 880. √ Shṭana 881 √ Dhvana to sound. Pre, स्यमति । Per. सस्याम । स्येमतुः or सस्यमतुः । स्येमिथ or सस्यमिथ । स्येमुः । I Fut स्यमिता । Aorist अस्यमीत् । Caus स्यमयति । Aorist असिस्यमत् । It is a मित् root as it ends with अम । Desi. सिस्यमिषति । Inten, सेसिम्यते । Yaṅ luk. संस्यमीति or सस्यन्ति । Ger स्यमित्वा or स्यान्त्वा ॥

879 √Svana to sound Pre स्वनति। With वि or अव, we have विष्वणति अवष्वणति। The स is changed to ष by S 2274 Per सस्वान। सस्वनतु, or स्वनतु। I Fut. स्वनिता। Aorist अस्वानीत or अस्वनीत्। Caus स्वानयति। Aor असिस्वनत्। It is a मित root as read in the Ghatâdi list Desi सिस्वनिषति। Inten सस्वन्यते। Yan luk सस्वन्ति ॥

880 √Shtana to sound. Pre स्तनति। Per तस्तान। I Fut स्तनिता ॥

881 √Dhvana to sound, Pre ध्वनति। Per दध्वान। I Fut ध्वनिता। Noun, ध्वनि. ॥

Here ends Phanâdi subdivision.

षम ८८२, ष्टम ८८३ अवैकल्पे। ससाम। तस्ताम॥

882 √Shama, 883 √Sutama 'to be confused,' or 'not to be confused' Pre समति। Per ससाम। सेमतुः। सेमिथ। I Fut. समिता। Caus समयति। Aor असीषमत्। Desi. सिसमिषति। Inten, संसम्यते। Yan luk संसमीति or संसन्ति। d. ससान्त. ॥

883 √Shtama 'not to be confused' Pre स्तमति। Per तस्ताम। तस्तमतुः। I Fut स्तमिता। Caus स्तमयति। Aor. अतिष्टमत्। Inten तंस्तम्यते। Yan luk, तंस्तन्ति॥

ज्वल ८८४ दीप्तौ। अतो लान्तस्य (२३३०)। अज्वालीत्॥

884. √Jvala, to shine, to burn Pre ज्वलति। Per जज्वाल। जज्वलतुः। I Fut ज्वलिता। II Fut. ज्वलिष्यति। Imperative ज्वलतु। Imper अज्वलत्। Pote ज्वलेत्। Bene ज्वल्यात्। Aorist अज्वालीत्। I See S 2330 for Vriddhi Condi अज्वलिष्यत्। Caus ज्वलयति, or ज्वालयति। प्रज्वलयति। No option, it is necessarily मित here Desi, जिज्वलिषति। Inten जाज्वल्यते। Yan luk जाज्वलीति। Nouns ज्वालः। ज्वलः। उज्ज्वलः॥

चल ८८५ कम्पने।

885 √Chala, to shake, tremble, move, Pre चलति। Per. चचाल। चेलतुः। चेलु। I Fut चेलिता। Aorist अचालीत्। Caus चलयति, चालयति। Nouns, चल। चाल। चञ्चलः॥

जल ८८६ घातने। घातनं तैक्ष्ण्यम्॥

886 √Jala, to be sharp, Ghâtana means sharpness Pre. जलति। Per. जजाल। I Fut जलिता। Aorist. अजालीत्। Nouns जल.। जाल.। जड.॥

टल ८८७, ट्वल ८८८ वैक्लव्ये।

887. √Tal, 888 √Tval, to become confused or disturbed Pre. टलति। Per. टटाल। I Fut टलिता॥

888 √Tval to become disturbed or confused Pre ट्वलति। Per टट्वाल। टट्वलतुः। I Fut ट्वलिता। Aorist अट्वालीत्। Nouns ट्वालः। ट्वल॥

स्थल ८८९ स्थाने। Or ष्ठल स्थाने।

889 √Sthala to stand firm, be firm. Pre स्थलति। Per तस्थाल। I Fut. स्थलिता। Aorist. अस्थालीत्। Caus. स्थालयति। Aor अतिष्ठलत्। Inten तास्थल्यते। Yan luk तास्थल्ति। Nouns, स्थल.। स्थालः। स्थल। स्थली। स्थला। स्थाली। विष्ठलम्। कपिष्ठलम्॥

हल ८९० विलेखने ।

890 √Hal, to plough Pre हलति । Per जहाल । I Fut, हलिता । Aorist, अहालीत् । Nouns, हल । हाल. । हलि. ॥

णल ८९१ गन्धे । बन्धने इत्येके ॥

891 √nal to smell Kāśyapa says it means 'to bind' Pre नलति । प्रणलति । Per ननाल । I Fut नलिता । Aorist अनालीत् or अनलीत् । Nouns नल. । नाल. नाली । प्रणाली । नड । नड्वल. । नड्वान् ॥

पल ८९२ गतौ । पलति ॥

892 √Pala, to go, move Pre पलति । Per पपाल । I Fut पलिता । Aorist, अपालीत् or अपलीत् । Nouns पलम् । पललं 'meat' पलालम् । पलाली ॥

बल ८९३ प्राणने धान्यावरोधने च । बलति । बेलतुः । बेलुः ॥

893 √Bala 1 to breathe or live 2 To hoard grain Pre बलति । Per. बबाल । बेलतुः । बेलुः । I Fut, बलिता । Aorist. अबालीत् or अबलीत् । Nouns बालम् । बलम् । बाला । बलूल. । बलि ॥

पुल ८९४ महत्त्वे । पोलति ॥

894 √Pula, to be great, to be lofty Pre पोलति । Per. पुपोल । I Fut पोलिता । Caus. पोलयति । Aor अपूपुलत् । Desi पुपुलिषति, पुपोलिषति । Inten पोपुल्यते । Yan luk पोपुलीति or पोपोल्ति । Past Part Pass पुलितम् or पोलितम् । Ger. पुलित्वा or पोलित्वा । Nouns पुल. । पुलक । पुलिन' । पुलाक. ॥

कुल ८९५ संस्त्याने बन्धुषु च । सस्त्यान संघातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल ॥

895. √Kula, to accumulate collect, (2) to behave as a kinsman, to be related Sanstyana means collection By the word bandhu or kinsman is taken here the act or behaviour of a Kinsman Some read santâna instead of sanstyâna Santâna means an uninterrupted flow, as of father, son and grandson &c Pre कोलति । Per चुकोल । I Fut कोलिता । Desi चुकोलिषति, चुकुलिषति । Inten. चोकुल्यते । Nouns. कुलीनः । कुल्यः । कौलेयः ॥

शल ८९६, हुल ८९७, पत्लृ ८९८ गतौ । शशाल । जुहोल । पपात । पेततुः । पतिता ॥

896 √Śal, 897 √Hula, 898 √Patlṛ to go The root √Hula means to kill and to cover also (हिंसा संवरणयोश्च) । Some texts read this sutra as √Śala, √hvala, √hmala, √patlṛ gatau, √hula hinsâ samvaraṇayoś cha. Pre शलति । Per, शशाल । I Fut शलिता । Nouns. शाल. । शाला ॥

897. √Hula to go Pre होलति । Per जुहोल । I Fut होलिता । Caus. होलयति । Desi. जुहोलिषति, जुहुलिषति, Inten जोहुल्यते । Ger हुलित्वा or होलित्वा ॥

898 √Patlṛ to fall, Pre पतति । Per पपात । पेततुः । पेतुः । I Fut, पतिता । II Fut पतिष्यति । Imperative, पततु । Imper अपतत् । Pote पतेत् । Bene पत्यात् । Aorist अपप्तत् । In forming the Aorist, the next sûtra applies which inserts a प । Condi, अपतिष्यत् । Caus, पातयति । Desi पिपतिषति or पित्सति । This root is optionally सेट् । See *ante*, Inten. पापत्यते । Yan luk पनीपतीति or पनीपत्ति । Past. Part Pass. पतितः । Ger. पतित्वा । Infini पतितुम् । Nouns, पतन. । पातुकः । पत्रम् । पक्षम् । पतङ्गः । पतत्रम् । पातालः । पताका । पन्था । पत्रिकाः ॥

२३५५। पतः पुम् । ७ । ४ । १९ ॥

अङि परे । अपप्तत् । नेर्गद=' (२२८५) इति णत्वम् । प्रणिपप्तत् ॥

2355. The augment पुम् is added after the vowel of the root पत, in the अङ् Aorist

As अपप्तत्, अपप्तताम्, अपप्तन् । The पत् takes the अङ् Aorist as it has an indicatory ऌ in the Dhatupâthi (III 1 55)

The न of the upasarga नि is changed to ण after an alterant preposition by S 2285 As प्रणिपप्तत् ॥

क्वथे ८९९ निष्पाके । क्वथति । चक्वाथ । अक्वथीत् ॥

899 √Kvathe to boil, decoct, digest, Pre क्वथति । Per चक्वाथ । I Fut क्वथिता । Aorist अक्वथीत । Caus क्वथयति । It belongs to the Ghaṭâdi class and is hence मित् । Noun क्वाथ॰ ॥

पथे ९०० गतौ । अपथीत् ॥

900. √Pathe to go Pre, पथति । Per पपाथ । पेथतु । I Fut, पथिता । Aorist अपथीत् । Noun पथ । पाथ॰ ॥

मथे ९०१ विलोडने । मेथतुः । अमथीत् ॥

901 √Mathe to churn Pre मथति । Per, ममाथ । मेथतु । I Fut मथिता । Aorist अमथीत् । Nouns माथ. । मथ ॥

टुवमु ९०२ उद्गिरणे । इहैव निपातनात् ऋतः इत्वमिति सुधाकरः । ववाम । ववमतु । वादित्वादेत्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृत तद्भाष्यादौ न दृष्टम् ॥

902. √Tuvama, to vomit The word उद्गिरणे is from the root √गॄ । The short ऋ could not be changed to इ by any rule of Grammar The Grammatical form would have been उद्गरण with the Guna of ऋ । But Pâṇini uses the word उद्गिरण in this sûtra So Sudhakara says " the Nipâtana of this sûtra is the authority for changing the short ऋ of गृ into इ । " Pre, वमति । Per ववाम । ववमतुः । There is no एत्व' or the elision of abhyâsa, because the root begins with व । In Bhagavritti the forms वेमतु &c are given They are not found in the Bhâshya &c I Fut वमिता । Aorist अवमीत् । No Vriddhi Caus वामयति, वमयति । See Gana sûtra D of the Ghaṭâdi Desi. विवमिषति । Inten वावम्यते । Yan luk. ववन्मि । d ववान्त : Imperative व'वन्धि । Imperfect अव वम् । Past Part. Pass. वान्त । Act. वान्तवान् । Nouns वाम॰ । वमथुः ॥

भ्रमु ९०३ चलने । 'वा भ्राश–' (२३२१) इति श्यन्वा । भ्राम्यति–भ्रमति । 'भ्राम्यति' इति तु दिवादेर्वक्ष्यते ॥

903, √Bhramu to move, to walk.

This root is optionally conjugated as a Divâdi root with श्यन् Vakaraṇa (See 2321). Thus भ्रम्यति or भ्रमति । The form भ्राम्यति will be taught later on in the Divâdi. The Perfect is बभ्राम् ।

an forming its dual the following sûtra applies.

२३५६ । वा जॄभ्रमुत्रसाम् । ६ । ४ । १२४ ॥

एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः–बभ्रमतुः । अभ्रमीत् ॥

2356 ए is optionally substituted for the अ of the stems जॄ (जॄ) भ्रम, and त्रस्, and the reduplicate is thereby elided, before the affixes of the Perfect having an indicatory क् (or ङ्), as well as before the थल with the augment इट् ॥

Thus (जेरतु, जेरु, जेरिथ, जजरतु, जजरु, जजरिथ) भ्रेमतु., भ्रेमु, भ्रेमिथ, or बभ्रमतु., बभ्रमु., बभ्रमिथ । त्रेसतु, त्रेसु, त्रेसिथ, or तत्रसतु, तत्रसु तत्रसिथ ॥

903 √ Bhramu to move, to walk Pre भ्रमति or भ्राम्यति । Per बभ्राम । बभ्रामतु. or भ्रेमतुः । I Fut भ्रमिता । II Fut भ्रमिष्यति । Imper. भ्रमतु or भ्राम्यतु । Imper. अभ्रमत् or अभ्राम्यत । Poten भ्रमेत or भ्राम्येत । Bene भ्रम्यात् । Aorist अभ्रमीत् । Condi अभ्रमिष्यत । Caus भ्रमयति । As it ends in अम् so it is मित । Desi बिभ्रमिषति । Inten बम्भ्रम्यते । Yan luk बम्भ्रन्ति । d बम्भ्रान्तः । Imperative बम्भ्रामि । Imperfect अबम्भ्रन् । Past. Part. Pass भ्रान्त. । Act भ्रान्तवान् । Ger भ्रमित्वा or भ्रान्त्वा । Nouns भ्रम. । भ्रमर. । भ्रूः ॥

क्षर ९०४ संचलने । अक्षारीत् ॥

904 √ Kshara, to ooze, to flow Some read this sûtra as छल सचलने √ छल is conjugated like √ क्षर । Pre क्षरति । Per चक्षार । I Fut क्षरिता । Aorist अक्षारीत् । Desi, चिक्षरिषति । Inten. चाक्षर्यते । Yan luk चाक्षर्ति । Imperative चाक्षर्हि । Imperfect अचाक्षर् । Nouns । क्षार । क्षर । क्षरञ ॥

Here end the roots beginning with Sama, which were Udâtta and Udâttet.

SUB-SECTION.

अथ द्वावनुदात्तेतौ ॥

Now the next two roots are Anudattets.

षह ९०५ मर्षणे । परिनिविभ्य। (२२७७) इति षत्वम् । परिषहते । सेहे । सहिता । 'तीषसहे–' (२३४०) इति वा इट् । इडभावे ढत्वधत्वष्टुत्वढलोपाः ॥

905 √ Shaha to endure, forbear.

The स is changed to ष by VIII 3 70. S. 2275 when preceded by pari, vi, or ni. As परिषहते । The Perfect is सेहे । The first future सहिता । The इट्' augment is optional by VII. 2. 48 S. 2340. When इट् is not added, then we have the equation सह् + ता = सढ् + ता (VIII. 2 31 S, 324) = सढ + धा (VIII. 2 40. S. 2280) = सढ् + ढा (VIII. 4. 40 S 111) = स+ढा (VIII 3 13 S. 2335).

Now applies VI 3 112 S 2 357 by which the अ of स is changed to ओ ॥

२३५७ । सहिवहोरोदवर्णस्य । ६ । ३ । ११२ ॥

अनयोरवर्णस्य ओत्स्याड्ढलोपे सति ॥

2357. When ढ् or र् are elided, there is the substitution of ओ for the अ or आ of the verbs सह् and वह् ॥

Thus स + ढा = सोढा ॥

This स of Sodhâ however is not changed to ष after परि &c, because of the following sûtra:—

२३५८ । सोढः । ८ । ३ । ११५ ॥

सोढ्रूपस्य सहेः सस्य षत्वं न स्यात् । परिसोढा ॥

2358 The स् of सोढ form of the root सह is not changedto ष् ॥

As परिषोढा । This is an exception to VIII 3, 70

NOTE — Why do we say 'when सह assumes the form of षोढ' । Observe परिषहते, विषहते ॥

The change of स to ष of √सह is optional by the following sûtra when the augment अट् intervenes between the verb and the preposition परि &c,

२३५९ । सिवादीनां वाड्व्यवायेऽपि । ८ । ३ । ७१ ॥

परिनिविभ्य परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि । पर्यषहत–पर्यसहत ॥

2359 The ष change may take place optionally in the सिव् and the rest (of sûtra VIII 3 70 S 2275), even when the augment अ intervenes between the prepositions परि, नि or वि and the verb

The सिवादि are the four roots सिव सह, स्तु and स्वञ्ज, as well as the augment सुट् । This is an example of ubhayatra vibhâshâ In the case of स्तु and स्वञ्ज it is prâpta vibhâshâ, in the case of others it is aprâpta. Thus परि + असहत (Imperfect) = पर्यषहत or पर्यसहत ॥

905 √Shaha, to endure, to forbear. Pre सहते । Per सेहे । I Fut सहिता; सोढा । II Fut सहिष्यते or सोक्ष्यते । Imperative सहताम् । Aorist असहिष्ट । Causative साहयति । Aor असीषहत् । Desi सिसहिषते । Inten सासह्यते । Yan luk सासोढि । Dual सासोढः 2 S सासहि । Adjective सह्यम । Nouns साह । सह । सहिष्णु. । सहन । सासहि ॥

रमु ९०६ क्रीडायाम् । रेमे । रेमिषे । रन्ता । रंस्यते । रंसीष्ट । अरंस्त ॥

906 √Ramu, to play, sport, dally Pre रमते । Per रेमे । I Fut रन्ता । II Fut रंस्यते । Imperative रमताम । Imper अरमत । Poten रमेत । Bene रंसीष्ट । Aorist अरंस्त । Condi अरंस्यत । Caus रमयति । Aor, अरीरमत । Desi, रिरंसते । Inten रंरम्यते । Yan luk रंरन्ति । D रंरत (the nasal is elided by VI 4, 37) 2 S रंरसि । S, रंरमिम । 1 Pl रंरमः । Nouns रम । राम. । रमण. । रन्ति. । रम्यम् । रत ॥

SUB-SECTION

अथ कसन्ताः परस्मैपदिनः ।

The roots upto √कस are Parasmaipadî

षद्लृ ९०७ विशरणगत्यवसादनेषु ।

907. √Shadlri, 1 To split or burst, 2 to go 3 to be dejected. In conjugating this root, सद is replaced by सीद by the following sûtra —

२३६० । पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ७ । ३ । ७८ ॥

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । सीदति । ससाद । सेदतुः । सेदिथ–ससत्थ । सत्ता । सत्स्यति । लृदित्वादङ् । असदत् । 'सदिरप्रतेः' (२२७१) । निषीदति । न्यषीदत ॥

2360. Before a Present-character (शित), the following substitutions take place —पिब् for पा, जिघ् for घ्रा, धम् for ध्मा, तिष्ठ् for स्था, मन् for म्ना, यछ् for दा (दाण्), पश्य् for दृश्, ऋच्छ् for ऋ, धौ for सृ, शीय् for शद् and सीद् for सद् ॥

Thus we have सीदति in the Present. The Perfect is ससाद । सेदतुः । सेदिथ or ससत्थ । The First Future is सत्ता । The Second Future is सत्स्यति । The Aorist formed by अङ् as the root has an indicatory लृ as असदत् ॥

The स is changed to ष when preceded by an alterant Preposition except प्रति (VIII. 3 66 S 2271) as निषीदति and न्यषीदत् । But the स coming after the reduplicate is not so changed because the following applies :—

२३६१ । सदेः परस्य लिटि । ८ । ३ । ११८ ॥

सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि । निषसाद । निषेदतुः ॥

2361 The स of सद् after the reduplicate in the Perfect is not changed to ष ॥

In the Perfect, when root is reduplicated, there are two स' s, as ससाद । After a preposition, the first स will be changed to ष but not so the second Thus अभिषसाद, परिषसाद, निषसाद, विषसाद । Pre सीदति । Per ससाद । सेदतु. । 2 S ससत्थ or सेदिथ । 1 d सेदिव । 1 pl सेदिम । I Fut सत्ता । II Fut सत्स्यति । Imperative सीदतु । Imper असीदत् । Poten सीदेत् । Bene सद्यात । Aorist असदत् । Caus सादयति । Aor असीषदत् । Desi सिषत्सति । Inten, सासद्यते । Yan luk सासत्ति । Per. Part Parasmai सेदिवान । Nouns. परिषद् । सद. । साद । निषाद. । सत्र । सद्म ॥

शद्लृ ९०८ शातने । विशीर्णतायामयम् । शातनं तु विषयतया निर्दिश्यते ॥

908. √Śadḷ, to fall, perish, decay, wither. The root means 'to decay. Here Maitreya has the following ' The root śadḷ means rending asunder (विशातन) The root has the meaning of decay The form शातने however is given as its meaning and not विशीर्णतायाम्, because शातन is derived from this very root sad with ल्युट् affix, and is a well known word." This root, however, is Atmanepadi before शित् affixes by the following :—

२३६२ । शदेः शितः । १ । ३ । ६० ॥

शिद्भाविनोऽस्मादात्मनेपदं स्यात् । शीयते । शशाद । शेदतुः । शेदिथ-शशत्थ । शत्ता । अशदत् ॥

2362 After the verb śad to decay, when it has one of the affixes with an indicatory ś (śit) the Atmanepada is used.

NOTE.—The root 'sad' when taking any affix which is marked with an indicatory श, is conjugated in the âtmanepadi In connection with this, must be read sûtra VII 3 78, S. 2360 पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः by which the root शद् is replaced by शीय before affixes having an indicatory श । Thus शद् + श + ते = शीय + अते=शीयते 'he decays or withers,' शीयेते they two decay शीयन्ते they decay Pre शीयते । Per शशाद । शेदतुः । शेदिथ or शशत्थ । शेदिव । I Fut शत्ता । II Fut. शत्स्यति । Imperative शीयताम् । Imper, अशीयत । Poten शीयेत । Bene शद्यात् । Aorist अशदत् । Caus शातयति । Desi. शिशत्सति । Inten, शाशद्यते । Yan luk शाशत्ति । Nouns शाद । शातनम् । शद्रुः । शत्रुः ॥

क्रुश ९०९ आह्वाने रोदने च । क्रोशति । क्रोष्टा । शलः क्सः । अक्रुक्षत् ॥

909 √Kruśa 1 To cry out (2) to weep. Pre क्रोशति । Per. चुक्रोश । चुक्रुशतुः । 2. S. चुक्रोशिथ । 1 d चुक्रुशिव । 1. Pl. चुक्रुशिम । I Fut. क्रोष्टा (The root is Anit, See Anit list) II Fut क्रोक्ष्यति । Imperative क्रोशतु । Poten क्रोशेत् । Bene क्रुश्यात् । Aorist अक्रुक्षत् । The aorist is formed by the affix क्स by III. 1. 45. Caus. क्रोशयति ।

Aor अचुक्रुशत् । Desi चुक्रुशति । Inten. चोक्रुश्यते । Yan luk चोक्रोष्टि । Imperative चोक्रोड्ढि । Imperfect अचोक्रोट् । Past Part Pass क्रुष्ट । Nouns :— आक्रोशकः । क्रोष्टा । क्रोश. । क्रुश· ॥

कुच ९१० संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । कोचति । चुकोच ॥

910. √Kucha (1) To connect (2,) To make crooked or curve, (3) to stop (4) to delineate. Pre कोचति । Per चुकोच । I Fut कोचिता ॥

बुध ९११ अवगमने । बोधति । बोधिता । बोधिष्यति ॥

911 √Budha to know, understand Pre बोधति Per बुबोध । I Fut. बोधिता । II Fut बोधिष्यति । Caus. बोधयति । Aor अबूबुधत् । Desi बुबुधिषति । Inten बोबुध्यते । Yan luk बोबोद्धि । Imperative बोबुद्धि । बोबुधानि । Imperfect 3 S अबोभोत् । 2. S. °द् Past. Part Pass बुधितम् or बोधितम् । Ger बुधित्वा or बोधित्वा ॥

रुह ९१२ बीजजन्मनि प्रादुर्भावे च । रोहति । रुरोह । रुरोहिथ । रोढा । रोक्ष्यति । अरुक्षत् ॥

912 √Ruha to grow, germinate, shoot forth Pre रोहति । Per रुरोह । 2. S रुरोहिथ । 1 d रुरुहिव । I Fut रोढा । II Fut रोक्ष्यति । Imperative रोहतु । Imper अरोहत् । Poten रोहेत् । Bene रुह्यात् । Aorist. अरुक्षत । Caus रोहयति । Aor अरूरुहत । Or Caus Pre रोपयति । Aor. अरूरुपत् । Desi रुरुक्षति । Inten रोरुह्यते । Yan luk रोरोढि । d. रोरुढः । 2 S रोरोक्षि । Imperative 2. S रोरुढि । Imp. अरोरोट् । अरोरुढाम् । Past. Part Pass रूढः । Nouns रोहितः । रोहित· ॥

कस ९१३ गतौ । अकासीत्—अकसीत् । वृत् । ज्वलादिगणः समाप्तः ॥

913 √Kasa, to move, to go, approach Pre कसति । Per चकास । I Fut. कसिता । Aorist अकासीत् or अकसीत् । Caus. कासयति । Aor. अचीकसत् । Desi. चिकसिषति. Inten, चनीकस्यते । Yan luk चनीकसीति । Imperfect अचनीकत् । Noun. कंस्वरः ॥

वृत् । *End. Here ends the Jvaladi Gana.*

अथ गूहत्यन्ताः स्वरितेतः ॥

The roots upto √Gûha are svaritet and consequently are both Parasmai and Atmanepadi

हिक्क ९१४ अव्यक्ते शब्दे । हिक्कति—हिक्कते ॥

914 √Hikka to hiccough Pre. हिक्कति । A हिक्कते । Per. जिहिक्क । A. जिहिक्के । I Fut. हिक्किता । A हिक्किता । II Fut हिक्किष्यति । A. हिक्किष्यते । Imp. हिक्कतु । A. हिक्कताम् । Imp. अहिक्कत् । A. अहिक्कत । Pot हिक्केत् । A. हिक्केत । Ben. हिक्क्यात् । A. हिक्किषीष्ट । Aor 4 अहिक्कीत् । A. अहिक्किष्ट । Caus. हिक्कयति । Aor अजिहिक्कत् । Desi. जिहिक्किषति । जिहिक्किषते । Inten जेहिक्क्यते । Yan luk जेहिक्ति ॥

अञ्चु ९१५ गतौ याचने च । अञ्चति—अञ्चते । 'अचु' इत्येके । 'अचि' इत्यपरे ॥

915 √Añchu to go, move, (2) to request, ask, or call for. Some read it as √achu, while others as √achi Compare √añchu ante Pre अञ्चति । A. अञ्चते । Per आनञ्च । A. आनञ्चे । I Fut अञ्चिता । A अञ्चिता । Desi अञ्चिचिषति । अञ्चिचिषते ।

टुयाचृ ९१६ याच्ञायाम् । याचति—याचते ॥

916 √ Tuyachṛ to beg, ask, solicit Pre याचति । A याचते । Per. ययाच । A. ययाचे । I Fut याचिता । A याचिता । Caus याचयति । याचयते । Aor अययाचत् । Desi यियाचिषति । यियाचिषते । Inten यायाच्यते । Yan luk यायाक्ति । Past Part Pass याचित. । Act याचितवान् । Adj याच्यम । Nouns याचत्रु. । याच्ञा ॥

रेटृ ९१७ परिभाषणे । रेटति । रेटते ॥

917 √ Retṛ to speak, Pre रेटति । A. रेटते । Per रिरेट । A रिरेटे । I Fut. रेटिता । A रेटिता । Caus रेटयति । रेटयते । Aor अरिरेटत् । Desi रिरेटिषति, रिरेटिषते । Inten रेरेट्यते । Yañ luk रेरेट्टि । Past Part Pass रेटित. । Ger रेटित्वा ॥

चते ९१८, चदे ९१८(क) याचने । चचात । चेते । अचतीत् । चचाद । चेदे । अचदीत् ॥

918 √ Chate, 919 √ Chade to ask, beg, request Pre चतति । A चतते । Similarly चदति । चदते &c Per. चचात । चेततु । A चेते । I Fut चतिता । A चतिता । Aorist. अचतीत् । अचतिष्ट । Caus चातयति । चातयते, Aor अचीचतत् । Desi चिचतिषति । चिचतिषते । Inten चाचत्यते । Yan luk चाचत्ति । Past. Part Pass चतित. । चतितवान् । Ger चतित्वा । Adj चत्यम । Nouns चतुर. । चत्वार. ॥

प्रोथृ ९१९ पर्याप्तौ । पुप्रोथ । पुप्रोथे ॥

919 √ Prothṛ 'to be equal to, 'to be match for' Pre प्रोथति । A प्रोथते । Per पुप्रोथ । A पुप्रोथे । I Fut प्रोथिता । A प्रोथिता । II Fut प्रोथिष्यति । A प्रोथिष्यते । Caus प्रोथयति । प्रोथयते । Aor, अपुप्रोथत् । Desi पुप्रोथिषति । पुप्रोथिषते । Inten पोप्रोथ्यते । Yan luk पोप्रोत्ति । Nouns प्रोथः ॥

मिदृ ९२० मेदृ ९२० (क) मेधाहिंसनयोः । मिमेद । मिमेदे । 'धान्ताविमौ' इति स्वामी । मिमेथ । 'धान्तौ' इति न्यासः ॥

920 √ Midṛ, 920 A √ Medṛ, 1. 'to be wise 2. to injure. According to Swami these two roots end in ध instead of द, as मिमेध । According to Nyāsa they end in ध । Pre. मेदति । A मेदते । Per. मिमेद । मिमिदतुः । A, मिमेदे । I Fut. मेदिता । II Fut, मेदिष्यति । Caus. मेदयति । Aorist अमिमेदत् । Desi मिमिदिषति । मिमेदिषति । Inten. मेमिद्यते । Yañ luk मेमेत्ति । Ger मिदित्वा or मेदित्वा ॥

NOTE —Medṛ is conjugated like √ midṛ. Its Perfect dual is मिमेदतुः । for ए is heard here.

मेधृ ९२० (ख) संगमे च । मेधति । मिमेधे ॥

920. B √ Medhṛ 'to be fat' 2 'to injure' 3. To meet Pre. मेधति or ते । Per. मिमेध or धे । I Fut मेधिता । II Fut मेधिष्यति or ते ॥

णिदृ ९२१ णेदृ ९२१ क । कुत्सासंनिकर्षयोः । निनेद । निनिदतुः । निनेदे ॥

921. √ ṇidṛ, 921 A. √ ṇedṛ 'to blame' 2. to approach. Pre. नेदति । Per. निनेद or दे । निनिदतुः ।

शृधु ९२२, मृधु ९२३ उन्दने । उन्दनं क्लेदनम् । शर्धति-शर्धते । शर्धिता । मर्धति—मर्धते ॥

922 √Śṛidhu, 923 √Mṛidhu 'to be moist' or 'moisten', 'undanam' means 'moistening' Pre शर्धति । A शर्धते । Per शशर्ध । A शशृधे । d. शशृधतुः । I Fut शर्धिता । A शर्धिता । Caus शर्धयति, शर्धयते । Aor अशशर्द्धत् or अशीशृधत । Desi शिशर्धिषति, शिशर्धिषते । Inten शरीशृध्यते । Yan luk शरीशर्द्धि । Imperative शरीशृद्धि । Imperfect अशरीशर्त् । Past Part Pass शृद्ध. । Ger शर्द्धित्वा or शृध्वा ॥

923 √Mṛidhu to moisten Pre मर्धति । A मर्धते । Per ममर्ध । ममर्ध । I Fut मर्धिता । A. मर्धिता । II Fut मर्धिष्यति । A मर्धिष्यते । Caus मर्धयति, मर्धयते, । Desi. मिमर्धिषति । मिमर्धिषते । Inten मरीमृध्यते । Past Part Pass मृद्ध । Ger मर्धित्वा or मृध्वा ॥

बुधिर ९२४ बोधने । बोधति–बोधते । इरित्वादङ्वा । अबुधत्–अबोधीत्–अबोधिष्ट । 'दीपजन–' (२३२८) इति चिण्तु न भवति पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात् ॥

924 √Budhir to know, to understand Pre बोधति । A बोधते । Per बुबोध । A बुबुधे । I Fut बोधिता । A बोधिता । II Fut बोधिष्यति । A बोधिष्यते । Imperative बोधतु । A बोधताम् । Imper अबोधत । A अबोधत । Poten बोधेत । A बोधेत । Bene बुध्यात् । A बोधिषीष्ट । Aorist, अबुधत् । अबोधीत् । A अबोधिष्ट । The Parasmaipadi Aorist is optionally formed by अङ्, as the root has an indicatory इर् । See III. 1. 57 S 2269 The root occurs in the sûtra III 1 61 S 2328, and therefore ought to have taken चिण् also. But it does not take it, because the √बुध there refers to the Divâdi √budh (No 63), as it is read there (in S 2328) with other roots of the Divâdi class Caus बोधयति , बोधयते ॥

उबुन्दिर ९२५ निशामने । निशामनं ज्ञानम् । बुबुन्दे । अबुदत् । अबुन्दीत् ॥

925 √U bundir to perceive, to know The word niśâmana means knowledge According to Madhava knowledge derived from visual perception. Pre बुन्दति । A बुन्दते । Per बुबुन्द । A बुबुन्दे । I Fut बुन्दिता । A बुन्दिता । Aorist अबुन्दत् । or अबुन्दीत । A अबुन्दिष्ट । Desi बुबुन्दिषति, बुबुन्दिषते । Inten बोबुन्द्यते । Yan luk बोबुन्त्ति । Imperative बोबुन्द्धि । Past Part, Pass बुन्नम् (VIII 2 42 S 3016) Ger. बुन्दित्वा or बुन्त्वा । Noun बुद्बुद. ॥

वेणृ ९२६ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेणति–वेणते । नान्तोऽप्ययम् ।

926 √Venṛi, 1 to go, 2 to know 3 to reflect 4 to perceive, 5 to play on an instrument, 6 to take Some read this root with a न also. Mâdhava reads vâditra grahana as a compound meaning "to take up a musical instrument in order to play upon it" Pre वेणति । A वेणते । Per विवेण A विवेणे । I Fut. वेणिता । A वेणिता । Aorist अवेणीत् A अवेणिष्ट । Caus. वेणयति । Aorist. अविवेणत् । Desi । विवेणिषति । Inten वेवेण्यते । Yan luk वेवेण्टि । Nouns, वेणा । वेणी ॥

खनु ९२७ अवदारणे । खनति–खनते ॥

927 √Khanu to dig. Pre खनति । A खनते । Per, चखान । A, चख्ने । In forming the dual the following sutra applies, which gives us चख्नतुः । I Fut खनिता । A खनिता । II Fut खनिष्यति । A खनिष्यते । Imper अखनत् । A, अखनत ।

Poten, खनेत । A खनेत । Bene खायात् or खन्यात । A खनिषीष्ट । There is आ optionally by VI 4 43 S 2319 Aorist अखनीत or अखानीत् । A अखनिष्ट । Caus. खानयति । Aor अचीखनत् । Desi. चिखनिषति । Inten चखन्यते । चाखायते । Yan luk चङ्खन्ति । d चङ्खात । Past. Part Pass खात. । Ger खनित्वा or खात्वा । Nouns — खनक. । परिखा । आखान ॥

२३६३ । गमहनजनखनघसां लोपः क्ङित्यनङि । ६ । ४ । ९८ ॥

एषामुपधाया लोप. स्यादजादौ क्ङिति न त्वङि । चख्नतु । 'ये विभाषा' (२३१९) । खायात्,-खन्यात् ॥

2363 The root vowel of गम्, हन्, जन्, खन्, and घस् is elided before an affix beginning with a vowel, when it has an indicatory क् or ङ्, but not before the Aorist affix अङ् ॥

Thus चख्नतु, चख्नु । Bene. खायात or खन्यात् ॥

चीवृ ९२८ आदानसंवरणयोः । चिचीव-चिचीवे ॥

928 √Chivri to take or receive 2 to cover, P e चीवति A चीवते । Per चिचीव । A चिचीवे । I Fut चीविता । A चीविता । Caus, चीवयति । Aor. अचिचीवत् । Desi चिचीविषति । Inten चेचीव्यते । There is no Yan luk Noun चीवरम ॥

चायृ ९२९ पूजानिशामनयोः ।

929 √Châyri to worship 2 To observe Pre चायति । A चायते । Per. चचाय । A चचाये । I Fut चायिता । A चायिता । Aorist अचायीत् । A अचायिष्ट । Caus चाययति । Aor अचचायत् । Desi चिचायिषति । चिचायिषते । Inten चेकीयते (VI 1 21, S 2467). Yan luk चेकयीति or चेकेति । d चेकीतः । Past. Part Pass अपचायित or अपचितः । Ger चायित्वा । Noun चय. ॥

व्यय ९३० गतौ । अव्ययीत् ॥

930 √Vyaya 'to go, to move' Pre व्ययति । A व्ययते । Per. वव्याय । A वव्यये । I Fut. व्ययिता । A व्ययिता । Pas. व्यय्यते । Caus व्याययति, व्याययते Aor. अविव्ययत् ॥

दाशृ ९३१ दाने । ददाश-ददाशे ॥

931 √Dâśri 'to give' Pre दाशति । A. दाशते । Per. ददाश । A. ददाशे । I Fut. दाशिता । A दाशिता । Caus दाशयति, दाशयते । Aorist. अददाशत् । Desi. दिदाशिषति, दिदाशिषते । Inten दादाश्यते Yan luk दादाष्टि । Past. Part. Pass दाशत् । *Nouns.* दाश । पुरोडाशः ॥

भेषृ ९३२ भये । गतौ इत्येके । भेषति-भेषते ॥

932 √Bheshri 'to fear' According to some this root also means to go to move Pre भेषति । A भेषते । Per. बिभेष । बिभेषे । I Fut. भेषिता । A, भेषिता । Caus भेषयति, भेषयते । Aor अबिभेषत् । Desi बिभेषिषति, बिभेषिषते । Inten बेभेष्यते । Yan luk बेभेष्टि ।

भ्रेषृ ९३३, भ्लेषृ ९३३ (क) गतौ ।

933. √Bhreshri 'to go.' 933 A. √Bhleshri 'to go, Pre. भ्रेषति । A. भ्रेषते । Per. बिभ्रेष । A. बिभ्रेषे । I Fut भ्रेषिता । A भ्रेषिता । Inten बेभ्रेष्यते । *Noun* भ्रेषः ॥

अस ९३४ गतिदीप्त्यादानेषु । असति-असते । आस-आसे । अयं षान्तोऽपि ॥

934 √Asa 1 'to go' 2 to shine, 3 to accept, take or seize' Kshiraswâmi and Maitreya read this root as अष । Pre अषति । A अषते । Per. आष । A. आषे । I Fut अषिता । A अषिता । Caus आषयति । A आषयते । Aor. आषिषत । Desi. अषिषिषति । A अषिषिषते ॥

अय ९३५ गतौ ।

935 √Aya 'to go' Swami and Kaśyapa read this root after 931 √Dâśṛ But this appears anârsha, for Haradatta commenting on VIII 2 19 S 2326 says अयति is anudâttet Pre अयते । Per अयाञ्चक्रे । I Fut अयिता ।

स्पश ९३६ बाधनस्पर्शनयोः । स्पशन ग्रथनम् । स्पशति–स्पशते ॥

936 √Spaśa 1 to obstruct 2 to touch 3 to string together, Spaśana here means stringing together according to Swâmi Some read the root as Pasha others as paśa Pre स्पशति । A स्पशते । Per पस्पाश । A पस्पशे । I Fut स्पशिता । A. स्पशिता । Aorist अस्पाशीत् or अस्पशीत् । Caus स्पाशयति । Aor अपस्पशत् । Desi. पिस्पशिषति । Inten पास्पश्यते । Yan luk पास्पष्टि । *Noun* पस्पशा ॥

लष ९३७ कान्तौ । वा भ्राश० (२३२१) इति श्यन्वा । लष्यति । लषति । लेषे ॥

937 √Lasha 'to wish, to desire' By III 1 70 S 2321 this root takes Śyan vikarana also Pre लषति । A लषते । With श्यन् we get लष्यति or लष्यते । Per ललाष । A लेषे । I Fut लषिता । A लषिता । Aorist अलाषीत् or अलषीत् । Caus लाषयति । Aor अलीलषत् । Desi लिलषिषति । Inten लालष्यते । Yan luk लालष्टि । Nouns लषक । लाषुक । विलाषी ॥

चष ९३८ भक्षणे ।

938 √Chasha 'to eat' Pre चषति । A. चषते । Per चचाष । A चेषे । I Fut चषिता । A. चषिता । *Nouns*, चषक चाष ॥

छष ९३९ हिंसायाम् । चच्छषतुः । चच्छषे ॥

939 √Chhasha 'to hurt, to injure.' Pre छषति । A छषते । Per. चच्छाष । d चच्छषतु । A चच्छषे । I Fut छषिता ॥

झष ९४० आदानसंवरणयोः' ।

940 √Jhasha 1 to take, 2. to put on or wear. In the sense of 'to injure or hurt' this root is Parasmaipadi only (See No 720) Pre झषति । A झषते । Per जझाष । I Fut झषिता । Aorist अझाषीत् or अझषीत् ॥

भ्रक्ष ९४१ भ्लक्ष ९४१ (क) अदने । भक्ष इति मैत्रेयः ॥

941 √Bhraksha, 941 A. √Bhlaksha 'to eat, to devour' According to Kshiraswami, the root is Bhlaksha; Maitreya reads it Bhaksha Pre भ्रक्षति A भ्रक्षते । P. भ्लक्षति । A भ्लक्षते । Per बभ्रक्ष । A बभ्रक्षे । P बभ्लक्ष । A बभ्लक्षे I Fut भ्रक्षिता । A. भ्रक्षिता । P भ्लक्षिता । A भ्लक्षिता । Aorist अभ्राक्षीत् । Caus भ्रक्षयति । भ्लक्षयति । Aor अबभ्रक्षत् । अबभ्लक्षत् Desi बिभ्रक्षिषति । बिभ्लक्षिषति । Inten बाभ्रक्ष्यते । Yan luk बाभ्रष्टि । बाभ्लष्टि । Imp बाभ्रड्ढि । बाभ्लड्ढि । Imperfect. अबाभ्रट् ॥

दासृ ९४२ दाने ।

942. √Dasṛi 'to give,' Pre. दासति । A दासते । Per. ददास । A ददासे । I Fut. दासिता । A. दासिता । Aorist. अदासीत् । A अदासिष्ट ॥

माह्रृ ९४३ माने ।

943 √Mâhri to measure, Per माहति । A माहते । Per ममाह । A ममाहे 1Fut माहिता । A माहिता । Aorist अमाहीत् । A अमाहिष्ट । Caus माहयति । A माहयते । Aor अममाहत् । Desi मिमाहिषति । A मिमाहिषते । Inten मामाह्यते । Yan luk मामाढि ।

गुहू ९४४ संवरणे ॥

944. √Guhu 'to cover'

In conjugating this root the following sûtra applies.

२३६४ । ऊदुपधाया गोहः । ६ । ४ । ८९ ॥

गुह उपधाया ऊत्स्यादगुणहेतावजादौ प्रत्यये । गूहति-गूहते । ऊदित्वाद्विकल्पः । गूहिता-गोढा । गूहिष्यति-घोक्ष्यति । गूहेत । गुह्यात । अगूहीत् । इडभावे क्स । अघुक्षत ॥

2364 For the penultimate ओ of the gunated stem गोह् (from गुह्), there is substituted ऊ before an affix beginning with a vowel.

Thus गुह + शप् + ति = गोह् । अ + ति = गूह + अ + ति = गूहति । Atmanepada गूहते । In the First Future the इट augment is optional, as the root has an indicatory long ऊ (VII 2 44) Thus गूहिता or गोढा । So also in the Second Future, as गूहिष्यति or घोक्ष्यति । The Potential is गूहेत । The Benedictive is गुह्यात । The Aorist is अगूहीत् । But when it does not take इट्, we have क्स, and then the form is अघुक्षत् ॥

In the Atmanepada, this क्स is optionally elided by the following.

२३६५ । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । ७ । ३ । ७३ ॥

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । ढत्वधत्वष्टुत्वढलोपदीर्घाः । अगूढ । अघुक्षत । 'क्सस्याचि' (२३३७) इत्यन्तलोपः । अघुक्षाताम् । अघुक्षन्त । अगुह्-हि—अघुक्षावहि । अगुह्महि—अघुक्षामहि ॥

2365 The whole of the affix क्स is elided optionally before the personal endings of the Atmanepada beginning with a dental, after दुह्, दिह्, लिह् and गुह् ॥

Thus अगुह् + क्स + त = अगुह् + ० + त = अगुढ् + त (VIII 2 31 S 324) = अगुढ + ध (VIII 2, 40 S 2280) = अगुढ् + ढ (VIII. 4, 40 S 111) = अगु + ढ (VIII 3 13 S. 2335) = अगूढ (VI. 3 111. S 171)

The other form is अघुक्षत । Before the dual आताम् the final अ of क्स is elided by S 2337 and we have the form अघुक्षाताम् । The Plural similarly is अघुक्षन्त । The 1st Person dual is अगुह्वहि or अघुक्षावहि । The Plural is अगुह्महि or अघुक्षामहि ॥

NOTE —As अदुग्ध or अधुक्षत, अदुग्धाः or अधुक्षथाः, अदुग्ध्वम्, or अधुक्षध्वम्, अदुह्वहि or अधुक्षावहि, अदिग्ध or अधिक्षत, अलीढ or अलिक्षत, न्यगूढ or न्यघुक्षत ॥

Why दुह् &c. only? Observe व्यत्यक्षत । Why in the Atmanepada? Observe अधुक्षत only. Why before an affix beginning with a dental? Observe अधुक्षामहि only. Though the anuvritti of लोप was understood in this sûtra; the employment of the term लुक् indicates that the *whole* of the affix is to be elided. For लोप would have elided only the final अ of स । But even with the elision of अ alone we would have got all the above forms, except those in वहि । For अ being elided, we have स् between (a consonant of झल् class) and a dental (which is also a letter of झल् class). This स् situate between two झल् will be elided by VIII. 2, 26. Nor can it be objected that the elided अ is sthânivat, for by पूर्वत्रासिद्धं VIII. 2, 1, such an

elision cannot be sthânivat. Though व् is a dento labial, yet it is included in the word dental Had it not been meant to be so included, तैर (letters of त class) would have been taken in the sûtra See III 1 45, for this Aorist affix

914 √Guhu 'to cover, hide, conceal' Pre गूहति । A गूहते । Per जुगूह । A जुगूहे । But the dual is जुगुहतु for here गुह never assumes the form गोह । I Fut गूहिता or गोढा । A गोढा । It optionally takes इट् as the root has an indicatory long ऊ । II Fut. गूहिष्यति, or घोक्ष्यति । A गूहिष्यते or घोक्ष्यते । Imperative गूहतु । A गूहताम् । Imper. अगूहत् । A अगूहत । Poten गूहेत् । A गूहेत । Bene गुह्यात् । A गूहिषीष्ट or घुक्षीष्ट । Aorist अगूहीत । or अघुक्षत । A अगूहिष्ट or अगूढ or अघुक्षत । Condi अगूहिष्यत । अघोक्ष्यत । A अगूहिष्यत अघोक्ष्यत । Caus गूहयति । A गूहयते । Aor अजूगुहत । Desi जुघुक्षति । जुघुक्षते । Inten जोगुह्यते । Yan luk जोगुहीति or जोगोढि । Past Part Pass गूढ । Ger गूढ्वा or गूहित्वा । Adj गोहनीय । गुह्य । Noun गुहा ॥

Here end the Khkâdi roots which are ubhayapadi and end in a Consonant.

अथाजन्ता उभयपदिनः ।

Now we take up the conjugation of roots ending in a vowel and which are ubhayapadi.

श्रिञ् ९४५ सेवायाम् । श्रयति-श्रयते । शिश्रियतुः । श्रयिता । 'णिश्रि-(२३१२) इति चङ् । अशिश्रियत् ॥

Pre क्षिप्यति । Per. चिक्षेप I Fut क्षिप्ता or क्षेप्ता । (The first form is given in the Mâdhaviya) II Fut क्षेप्स्यति । Impera क्षिप्यतु । Imper. अक्षिप्यत् । Poten क्षिप्येत् । Bene क्षिप्यात् । Aor अक्षैप्सीत् । अक्षैप्ताम् । Condi अक्षेप्स्यत् । Caus क्षेपयति । क्षिपयति । Aorist. अचिक्षिपत् । Desid चिक्षिप्सति । Inten चेक्षिप्यते । Yanluk चेक्षेप्ति । Past-Parti Pass. क्षिप्त । Ger क्षिप्त्वा । Nouns -क्षिपक । क्षिप्नु । क्षिप्रम् । क्षिपा ॥

पुष्प १५ विकसने । पुष्यति । पुपुष्प ॥

15 √pushpa, to blossom

Pre पुष्यति॥ Per पुपुष्प । पुपुष्पिथ । पुपुष्पिव । I Fut पुष्पिता । II Fut. पुष्पिष्यति । Impera पुष्यतु । Imper अपुष्यत् । Pot पुष्येत् । Bene पुष्यात् । Aor अपुष्पीत् । Caus पुष्पयति Aor अपुपुष्पत् । Desid पुपुष्पिषति । Inten पोपुष्प्यते । Yanluk पोपुष्प्ति । Nouns पुष्पम् । पुष्पकम् ॥

तिम १६ ष्टिम १७ ष्टीम १७ (क) आर्द्रीभावे । तिम्यति-स्तिम्यति-स्तीम्यति ॥

16 √tima 17 √shtima, √shtima to become wet Some read here a fourth root तीम ॥

Pre तिम्यति । स्तिम्यति । स्तीम्यति । तीम्यति । Per तितेम । तिष्टेम । I Fut तेमिता । II Fut तेमिष्यति । Impera तिम्यतु । Imper अतिम्यत् । Pot तिम्येत । Bene तिम्यात् । Aor अतेमीत् । Caus तेमयति । Aor अतीतिमत् । Desid तितिमिषति । तितेमिषति । Inten तेतिम्यते । Yan luk तेतेम्ति । Nouns -तिमि । तिमिरम् ॥

व्रीड १८ चोदने लज्जायां च । व्रीड्यति ॥

18 √vrîda, to throw, cast, send forth, to be ashamed, feel shame

Pre व्रीड्यति । Per विव्रीड । विव्रीडिथ । विव्रीडिव । I Fut व्रीडिता । II Fut व्रीडिष्यति । Impera व्रीड्यतु । Imper अव्रीड्यत् । Pot व्रीड्येत् । Bene व्रीड्यात् । Aorist अव्रीडीत् । Condi अव्रीडिष्यत् । Causa व्रीडयति । Aor अविव्रीडत् । Desid विव्रीडिषति । Inten वेव्रीड्यते । yan luk वेव्रीड्टि । Past Parti Pass व्रीडित । Ger व्रीडित्वा । Noun -व्रीडा ॥

इष १९ गतौ । इष्यति ॥

19 √isha, to go Isha 'to wish' is Tudâdi Isha to repeat is Kryâdi

Pre इष्यति । Per इयेष । ईषतु । इयेषिथ । ईषिव । I Fut एषिता । प्रेषिता । (VI 1. 94 s 78) II Fut एषिष्यति । Impera इष्यतु । इष्य । इष्याणि । Imper ऐष्यत् । Pot इष्येत् । Bene इष्यात् । Aorist ऐषीत् । Caus एषयति Aor अ+इषिषत् । Desid इषिषिषति । Past Pass एषित । Ger एषित्वा । Nouns -प्रैष । प्रैष्य । अन्वेषणा । पर्येषणा । परीष्टि । एषणी । इषीका । इषीकतूलम् । इष्टचितम् ॥

षह २० षुह २१ चक्यर्थे । चक्यर्थस्तृप्तिः । सह्यति । सुह्यति ॥

20 √shaha, 21 √shuha, to satisfy, to be pleased Mâdhavîya does not approve the reading of सह here The word चक्यर्थ here means 'satisfaction'

Pre सह्यते ॥

Pre सुह्यति । Per सुषोह । I Fut सोहिता । II Fut सोहिष्यति । Impera सुह्यतु । Imper असुह्यत् । Pot सुह्येत् । Bene सुह्यात् । Aorist असौहीत् । Caus सोहयति । Aor असूषुहत् । Desid सुसुहिषति । सुसोहिषति । Inten सोषुह्यते । Yanluk सोषुहीति । सोषोढि । Past Parti. Pass सुहिता । Ger सुहित्वा । सोहित्वा ॥

जॄष् २२ झॄष् २३ वयोहानौ । जीर्यति । जजरतुः-जेरतुः । जरिता-जरीता । जीर्येत् । जीर्यात् । ऋदृस्तम्भु (२२९१) इत्यङ्वा । ऋदृशोऽङि गुणः (२४०६) । अजरत्-अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् ॥

22 √jrîsh, 23 √jhrîsh, to become old, to wither

The aorist is formed optionally by अङ् (s 2291) and the ऋ is gunated by s 2406 The ष is indicatory for the purposes of मित operations in the causative

Pre. जीर्यति । जीर्यत । जॄ+श्यन्+ति=जिर्+य+ति VII 1 100 s 2390 =जीर्यति । VIII 2 77 s 354) Per जजार । जजरतुः or जेरतुः । जजरुः or जेरुः । जजरिथ or जेरिथ । जजरथुः or जेरथुः । जजर or जेर । जजार or जजर । जजरिव or जेरिव । I Fut जरिता or जरीता । (VII 2 38 s 2391) II Fut जरिष्यति or जरीष्यति । Impera जीर्यतु । Imper अजीर्यत् । Poten जीर्येत् । Bene जीर्यात् । Aor. अजारीत् or अजरत् । अजारिष्टाम् or अजरताम् । Causa जरयति । Aor. अजीजरत् । Desid जिजीर्षति । जिजरिषति । जिजरीषति । Inten जेजीर्यते । Pre Parti Parasmai. जीर्यन् । Nouns—जीर्यन्ती । जरन् । जरती । युवजरती । जरद्गव । अजर्यम । जरा । अतिजरासि अनुजीर्ण । जार । जरन्त ॥

23 √jhrîsh to become old

Pre झीर्यति । Per. जझार । जझरतुः or झेरतुः । जझरुः or झेरुः । Aor अझारीत् ॥

षूङ् २४ प्राणिप्रसवे । सूयते । सुषुवे । स्वरतिसूति-(२२७९) इति विकल्प बाधित्वा श्र्युक किति (२३८१) इति निषेधे प्राप्ते क्रादिनियमान् नित्यमिट् । सुषुविषे । सुषुविवहे । सोता-सविता ॥

24 √shûn, to beget, to give birth

In the perfect the इट augment is compulsory For the prohibition of VII 2 11 s 2381, though it debars the option of VII 2 44 s. 2279, yet is in its turn set aside by the restriction of VII 2 13 s, 2293.

Pre सूयते । सूयेते । सूयसे । सूये । सूयावहे । Per. सुषुवे । सुषुविषे । सुषुविवहे । I Fut सोता or सविता । (VII 2 44 s 2279) II Fut. सविष्यते or सोष्यते । Impera सूयताम् । सूयेताम् । सूयस्व । सूयै । Imper असूयत । असूयेताम् । असूयथा । असूये । असूयावहि । Poten सूयेत । सूयेयाताम् । सूयेथा । सूयेय । सूयेवहि । Bene सोषीष्ट or सविषीष्ट । सोषीयास्ताम् or सविषीयास्ताम् । Aor असोष्ट or असविष्ट । असोषाताम् । असोष्ठा । असोषि । Past Parti Pass सून । Active सूनवान् Ger सूत्वा ॥

दूङ् २५ परितापे । दूयते ॥

25 √dûn, to be afflicted, to suffer pain, be sorry

It is congugated like the last

Pre दूयते । Per. दुदुवे । I Fut दोता ॥

दीङ् २६ क्षये । दीयते ॥

26 √dîn, to waste away The Present is दीयते । The Perfect is दिदी+ए । Now applies the following sûtra by which a य is inserted before ए ॥

२५०७ । दीङो युडचि क्ङिति । ६ । ४ । ६३ ॥

दीङ परस्याजादे क्ङिति आर्धधातुकस्य युट् स्यात् । *वुग्युटावुवङ्यणो सिद्धौ वक्तव्यौ * । दिदीये ॥

2507 युट् is the augment after दीङ्, of an ârdhadhâtuka affix beginning with a vowel and having an indicatory क् or ङ् ॥

Thus उपदिदीये, उपदिदीयाते and उपदिदीयिरे ॥ The Personal ending is कित् by I 2 5 दीङ being in the Ablative case, the augment is applied to the affix Thus दिदी+युट्+ए । Now this युट् augment is ordained by VI 4 63. s 2507, a rule falling under the âbhîya section (VI 4 22 s 2183) and therefore is as if non-existent, and so by VI 4 82 s 272, the long ई ought to be changed to य् before ए । The form ought to have been दिद्ये like डिद्देय (No 27) But this is prevented by the following vârtika This augment, however, is not to be considered as asiddha (VI 4 22) for the purposes of semi-vowel subsitution under VI 4 82 s 272 If that substitution were allowed, the augment would become useless

Vârtika The augments वुक् and युट् are to be considered as valid or siddha for the purposes of the application of उवङ् and यण् substitutions

In the Future, the ई of दी is changed to आ by the following aphorism.

२५०८ । मीनातिमिनोतिदीङां ल्यपि च । ६ । १ । ५० ॥

एषामात्व स्याल्ल्यपि । चकारादशित्येज्निमित्ते । दाता । दास्यते । अदास्त । अदास्था ॥

2508. And there is substitution of आ for the finals of मी 'to hurt', मि 'to scatter', and दी 'to decay' when the affix ल्यप् follows, *as well as before those non-*शित् *affixes which demand the substitution of a diphthong*, for the root-vowel of these verbs

NOTE -By force of the word च 'and' in the sûtra, the substitution takes place before all affixes other than शित्, and this substitution takes place, before the occasion for the applying of the affixes arises (उपदेशावस्थायाम् आत्वं

भवति) ॥ So that these verbs should be understood as if they were enunciated with an आ, so that all rules of affixes relating to आ will apply to them Thus प्रमाता, प्रमातव्यम्, प्रमातुम्, प्रमाय, निमाता, निमातुम्, निमातव्यम्, निमाय, उपदाता, उपदातव्यम् उपदातुम् उपदाय ॥ The substitution of आ being understood to have taken place in the very उपदेश (in the dhâtupâtha) of these roots, the affixes relating to roots ending in इ or ई do not apply to these at all Thus उपदायो वर्त्तते, ईषदुपदानं, formed by घञ् and युच् by taking दीं=दा and adding these affixes (III 3 128 and III 3 18) and not the affixes अच् (III 3 56) and खल् (III 3 126)

Thus दी+ता=दे+ता (This would have been in the ordinary way) But here ए is to be replaced by आ, or, rather no occasion should be given to convert ई to ए, but change the ई at once to आ। Thus we get दाता ॥

26 √dîn to waste, decay, diminish

Pre दीयते । दीयेते । Per दिदीये । दिदीयाते । दिदीयिरे । दिदीयिषे । दिदीयिढ्वे । दिदीये । दिदीयिवहे । I Fut दाता । II Fut दास्यते । Impera दीयताम् । दीयेताम् । दीयस्व । दीयै । Imper अदीयत । अदीयेताम् । अदीयथा । अदीये । Pot दीयेत । दीयेथा । दीयेय । Bene दासीष्ट । Aorist अदास्त । अदासाताम् । अदास्था । अदासि । Condi अदास्यत । Caus दापयति । Desid दिदीषते । दिदासते । Inten देदीयते । yanluk देदेति । D देदीत । Pl देद्यति । Past Parti Pass. दीन । Active दीनवान् । Ger दीत्वा ॥

डीङ् २७ विहायसा गतौ । डीयते ॥

27 √dîn, to fly, pass through the air

Pre डीयते । Per डिड्ये । डिड्यिषे । I Fut डयिता । II Fut डयिष्यते । Impera डीयताम् । Imper अडीयत । Poten डीयेत । Bene डयिषीष्ट । Aor अडेष्ट । Causa डाययते । Aor अडीडयत् । Desid डिडयिषते । Inten डेडीयते । Yanluk डेडेति । Past Parti Pass. डीन । Active डीनवान् । Ger डयित्वा ॥

धीङ् २८ आधारे । धीयते । दिध्ये । धेता ॥

28 √dhîn, to hold, contain, to disregard, disrespect

Pre धीयते । Per दिध्ये । I Fut धेता । II Fut धेष्यते । Impera. धीयताम् । Imper अधीयत । Poten धीयेत । Bene धेषीष्ट । Aorist अधेष्ट । Desid दिधीषते । Past Parti Pass धीन । Active धीनवान् । Ger धीत्वा ॥

मीङ् २९ हिंसायाम् । हिंसात्र प्राणवियोगः । मीयते ॥

29 √mîn, to hurt, kill, injure, die, perish It is conjugated like √dhîn Hinsâ here means the giving up of life

Pre मीयते । Per मिम्ये । I Fut मेता । II Fut. मेष्यते । Impera. मीयताम् । Imper अमीयत । Poten मीयेत । Bene. मेषीष्ट । Aor. अमेष्ट ॥

रीङ् ३० श्रवणे । रीयते ॥

30 √rîn, to trickle, drip, distil, ooze, flow

Pre. रीयते । Per रिर्ये । रिरियषे । I Fut रेता । II Fut रेष्यते । Impera रीयताम् । Imper अरीयत । Poten रीयेत । Bene रेषीष्ट । Aor अरेष्ट । Caus. रेपयते । Aor अरीरिपत् । Desi. रिरीषते । Past Parti Pass रीण । Active रीणवान् । Ger रीत्वा । Nouns -अरीणम् । रीति । रत ॥

लीङ् ३१ श्लेषणे ॥

31 √lîn, to stick or adhere firmly to, cling to In the case of this root the ई is optionally changed to आ by the following

२५०९ । विभाषा लीयतेः । ६ । १ । ५१ ।

लीयतेरिति यका निर्देशो न तु श्यना । लीलीङोरात्त्वं वा स्यादेज्विषये ल्यपि च । लेता-लाता । लेष्यते । लास्यते । 'एज्विषये' किम् । लीयते । लिल्ये ॥

2509. There is optionally the substitution of आ for the final of ली 'to adhere', in the very dhâtupâtha, when the affix ल्यप् follows or such an affix as would have demanded the substitution of the root vowel to a diphthong

The lîyateh in sûtra is conjugated with यक् and not with śyan, and therefore it includes the lî of Divâdi and Kryâdi both

The final of ली will take guna substitution before शित् affixes, and will become ले, this incipient diphthong ए is changed to आ by this rule The same is the case with all the roots subsequently taught, thus खिद् will be खेद्, and then ए changed to आ, गुर्=गोर् and ओ changed to आ &c Therefore we have employed the anuvritti of एच् 'diphthong' in all sûtras The words ल्यपि and आदेच उपदेश are understood here The roots ली belonging to Divâdi and Kriyâdi are both included here Thus विलाता, विलातुम्, विलातव्यम्, विलाय । Why do we say "before an affix which would have changed the ई to ए or ऐ?" Observe लीयते, लिल्ये । The श्यन् causes no change, and ए causes यण् change by s 272 , therefore before these affixes there is not आ substitution

Pre लीयते । Per लिल्ये । लिल्यिषे । I Fut. लाता, लेता । II Fut लास्यते, लेष्यते । Impera लीयताम्, लीयस्व, लीयै । Imper अलीयत । Poten. लीयेत । Bene लासीष्ट, लेषीष्ट । Aor. अलास्त or अलेष्ट । Condi अलास्यत or अलेष्यत । Causa विलालयति । विलापयति । विलीनयति । विलाययति । Aor अलीलपत । Desid लिलीषते । Inten. लेलीयते । Yanluk. लेलेति ॥

व्रीङ् ३२ वृणोत्यर्थे । व्रीयते । विव्रिये ।

32 √vrîṅ to choose, select This root is found in the Kryâdi class also

Pre. व्रीयते। Per विव्रिये। I Fut व्रेता। Parti Pass व्रीण । Act व्रीणवान्॥

२५०९ । क । स्वादय ओदितः । (गणसूत्रः) ॥

सत् फलं तु निष्ठानत्वम् ॥

2509. A. The roots षू and the rest are to be considered as if they had an indicatory ओ ॥

The roots beginning with षूङ् (No IV 24) an ending with this root व्रीङ् are ओदित्। The result is that the Past participles are formed by न instead of त (See VIII 2 45 s 3019) We have given examples under each root already

पीङ् ३३ पाने । पीयते ॥

33 √pîṅ, to drink

Pre पीयते। Per पिप्ये। Causa. पाययति। This is always Parasmaipadî (I 3 87 s 2753) पाययते is from the Bhuâdi पिबति (I 3 89 s 2755) Past Parti Pass पीत । Active पीतवान्। Ger पीत्वा, आपीय। while the form आपाय is from the Bhvâdi root pibati

माङ् ३४ माने । मायते । ममे ॥

34 √mâṅ, to measure Compare Adâdi मा माने No 53 and Juhotyâdi No 6. The root मेङ् प्रणिदाने (I 1010) of the Bhvâdi also assumes the form मा। The sûtra VI 4 66 s 2462 applies to all these मा's

Pre मायते। Per. ममे। I Fut. माता। II Fut मास्यते। Impera मायताम्। Imper अमायत। Poten. मायेत। Bene मासीष्ट। Aor अमास्त॥

ईङ् ३५ गतौ । ईयते । अयां चक्रे ॥

35 √îṅ, to go Compare अयति of the Bhuâdi No 342 (a), and एति of the Adâdi No 36

Pre ईयते। Per अयांचक्रे। I Fut एता। II Fut एष्यते। Impera ईयताम्। Imper ऐयत। Poten ईयेत। Bene एषीष्ट। Aor ऐष्ट। Causa आययते। Aor. आयियत। Desid ईषिषते। Ger प्रेय, प्रतीय with lyap

प्रीङ् ३६ प्रीतौ । सकर्मकः । प्रीयते । पिप्रिये ॥

36 √prîṅ, to be satisfied or pleased It is a Transitive verb

Pre प्रीयते। Per पिप्रिये। Causa प्राययते॥

अथ परस्मैपदिनश्चत्वार ।

Now the following four roots are Parasmaipadis

शो ३७ तनूकरणे ॥

37 √शो to attenuate In conjugating this root, the vowel ओ is elided by the following sûtra

२५१० । ओत श्यनि । ७ । ३ । ७१ ।

लोप स्याच्छ्यनि । श्यति । श्यत । श्यन्ति । शशौ । शशतु । शाता । शास्यति । 'विभाषा घ्राधेट्-' (२३७६) इति सिचो वा लुक् । लुगभावे 'यमरम-' (२३७७) इतीट्सकौ । अशात् । अशाताम् । अशु । अशासीत् । अशासिष्टाम् ॥

2510 A stem ending in ओ loses its final before the characteristic श्यन् ॥

NOTE —As निश्यति from शो, अवच्छ्यति from छो, अवद्यति from दो, and अवस्यति from सो ॥ The त् in ओत् is for the sake of euphony or ease of pronunciation

According to Padamanjari, the sûtra should have been ओत शिति, and thereby there would be the saving of half a mâtrâ, and also there would be no necessity of repeating the word शिति in VII 3 75

37 √so, to sharpen, to make thin, attenuate The सिच् is elided optionally by s 2376 When it is not elided, in that alternative, we have इट् and सक् augments by s 2377

Pre श्यति । श्यत । श्यन्ति । श्यसि । श्यथ । श्यथ । श्यामि । श्याव । श्याम । **Per** शशौ । शशतु । शशिथ or शशाथ । शश । शशिव । **I Fut** शाता । **II Fut** शास्यति । **Impera** श्यतु । श्यतात् । श्यता । श्यन्तु । श्यानि । **Imper** अश्यत् । अश्य । अश्यम् । **Poten.** श्येत् । श्येताम् । श्येयु । श्ये । श्येयम् । **Bene** शायात् । शायास्ताम् । **Aor** अशात्, अशासीत् । अशाताम्, अशासिष्टाम् । अशु । अशा । **Causa** शाययति । **Desid** शिशासति । **Inten** शाशायते । **Yanluk.** शाशति । **Past Parti Pass.** शातं, शित । **Act.** शातवान्, शितवान् । **Ger** शात्वा or शीत्वा । **Noun** -शाक. ॥

छो ३८ छेदने । छ्यति ॥

38 √chho, to cut, mow, reap It is conjugated like शो ॥

Pre छ्यति । **Per** चच्छौ । चच्छतु । **I Fut** छाता । **II Fut** छास्यति । **Impera.** छ्यतु । **Imper** अछ्यत् । **Poten** छ्येत् । **Bene** छायात् । **Aor** अछात् or अछासीत् । **Noun** -छाया ॥

षो ३९ अन्तकर्मणि । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ ॥

39 √sho, to finish, complete, bring to an end It is conjugated like शो ॥

Pre स्यति । Per ससौ । I Fut साता । II Fut सास्यति । Impera स्यतु । Imper अस्यत् । Poten स्येत् । Bene सेयात् (and not सायात्, because of VI 4 67 s 2374) Aor असात् or असासीत् । Past Parti. Pass सित । Active सितवान् । Ger सित्वा, अवसाय ॥ Nouns --साय । सायतन ॥

दो ४० अवखण्डने । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ॥

40 √do, to cut, divide, mow, reap It is conjugated like शो ॥

Pre द्यति । प्रणिद्यति because it is a ghu root VIII 4 17 s 2285 Per ददौ । I Fut दाता । II Fut दास्यति । Impera द्यतु । Imper. अद्यत् । Poten. द्येत् । Bene देयात् and not दायात्, VI 4 67 s 2374 Aor अदात् । Causa दापयति । Desid दित्सति । Inten देदीयते । Past Parti. Pass दित । Act दितवान् । Ger दित्वा, अवदाय ॥

अथात्मनेपदिन पञ्चदश ।

Now the following fifteen roots are Atmanepadi

जनी ४१ प्रादुर्भावे ॥

41 √jani to be born Before the affix śyan the जन is changed to जा by the following sûtra

२५११ । ज्ञाजनोर्जा । ७ । ३ । ७९ ॥

अनयोर्जादेश स्याच्छिति । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । 'दीपजन—' (२३२८) इति वा चिण् ॥

2511 Before a शित् affix, जा is substituted for ज्ञा and जन् ॥

NOTE —As जानाति and जायते ॥ The जन् here belongs to Divâdi class, meaning 'to be produced', and not जन् of the Juhotyâdi class Why जा (long) and not ज, for this ज would assume the form जा by VII 3 101 ? This long आ of जा indicates the existence of the maxim given above in VII 3 78 s 2360, and had ज been the substitute, VII 3 101 s 2170 could not have lengthened it

In forming the Aorist, there is optionally चिण् by s 2328 When चिन् is added the following applies

२५१२ । जनिवध्योश्च । ७ । ३ । ३५ ॥

अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि-अजनिष्ट ॥

2512 The Vriddhi is not substituted for the vowels of जन् and वध् before the Aorist sign चिण् and the krit-affixes with an indicatory ञ् and ण् ॥

As अजनि and अवधि with चिण्, and जनक and वधक (with ण्वुल्), प्रजन, वध ॥ This rule refers to the separate and the distinct root वध and not the substitute of हन् ॥ This we see in the line भञ्जकश्चेन्न विद्येत वधकोऽपि न विद्यते ॥ The form from हन् will be घातक ॥ Moreover the substitute वध ends with अ i e, it is of two syllables 'vadha', and as such it also does not admit Vriddhi (See II 4 42) The prohibition refers to चिण् and krit-affixes, therefore not here, as जजान गर्भं महिमानमिन्द्रम् ॥

41 √janî, to be born or produced, to rise

Pre जायते । Per जज्ञे । जज्ञाते । जज्ञिषे । जज्ञिवहे । I Fut. जनिता । II Fut जनिष्यते । Impera जायताम् । जायस्व । जायै । Imper अजायत । Poten जायेत । Bene जनिषीष्ट । Aor अजनि or अजनिष्ट । अजनिषाताम् । Causa जनयति । Aor अजनि । अजानि । Desid जिजनिषते । Inten जाजायते । जजन्यते । Yanluk जजनीति । जजन्ति । Nouns —अनुजाता । जनु । जज्ञि । जन्म । जन्तु । जन्य । जान्य । जन । जनता । द्विज । पचजनीनम् । बीजम् ॥

दीपी ४२ दीप्तौ । दीप्यते । दिदीपे । अदीपि-अदीपिष्ट ॥

42 √dîpî, to shine, blaze

Pre दीप्यते । Per दिदीपे । I Fut दीपिता । II Fut दीपिष्यते । Impera दीप्यताम् । Imper अदीप्यत । Poten दीप्येत ॥ Bene दीपिषीष्ट । Aor. अदीपि or अदीपिष्ट । Condi अदीपिष्यत । Causa दीपयते । Aor अदीदिपत् । अदिदीपत् । Desid दिदीपिषते । Inten. देदीप्यते । Yanluk देदीप्ति । Past Parti Pass. दीप्त । Act दीप्तवान् ॥ Nouns - दीप्ति दीप्र दीप ॥

पूरी ४३ आप्यायने । पूर्यते । अपूरि-अपूरिष्ट ॥

43 √pûrî, to fill, satisfy, please It is conjugted like the above

Pre. पूर्यते । Per पुपूरे । I Fut पूरिता । II Fut पूरिष्यते । Impera पूर्यताम् । Imper अपूर्यत । Poten पूर्येत । Bene पूरिषीष्ट । Aor. अपूरि or अपूरिष्ट । Past Parti Pass पूर्ण, पूरित । Act पूर्णवान्, पूरितवान् ॥ Noun --पूरु ॥

तूरी ४४ गतित्वरणहिंसनयोः । तूर्यते । तुतूरे ॥

44 √Tûrî, 1 to go quickly, make haste, 2 to hurt, kill

Pre तूर्यते । Per तुतूरे । I Fut तूरिता । II Fut तूरिष्यते । Impera. तूर्यताम् । Imper अतूर्यत । Poten तूर्येत । Bene तूरिषीष्ट । Aor अतूरिष्ट । Condi अतूरिष्यत । Causa तूरयते । Aor अतूतुरत् । Desid तुतूरिषते । Inten तोतूर्यते । Yanluk तोतूर्ति । Past Parti Pass तूर्ण । Act तूर्णवान् ॥

धूरी ४५, गूरी ४६ हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जुगूरे ॥

45 √dhûrî, 46 √gûrî, to go, to hurt, kill

Pre. घूर्यते। Per दुघूरे। I Fut घूरिता। II Fut घूरिष्यते। Impera घूर्यताम्। Imper अघूर्यत। Poten घूर्येत। Bene घूरिषीष्ट। Aor अघूरिष्ट। Past Parti Pass घूर्णः। Act घूर्णवान्॥

46 √gûrî to hurt, to go

Pre गूर्यते। Per जुगूरे। I Fut गूरिता। II Fut गूरिष्यते। Impera गूर्यताम्। Imper. अगूर्यत। Poten गूर्येत। Bene गूरिषीष्ट। Aor अगूरिष्ट। Condi अगूरिष्यत। Past Parti Pass गूर्णः। Act. गूर्णवान्॥

घूरी ४७, जूरी ४८ हिंसावयोहान्योः॥

47 √ghûrî, 48 √jûrî, to kill, hurt, 2 to grow old

Pre घूर्यते। Per जुघूरे। I Fut. घूरिता। II Fut घूरिष्यते। Impera घूर्यताम्। Imper अघूर्यत। Poten घूर्येत। Bene घूरिषीष्ट। Aor अघूरिष्ट। Condi अघूरिष्यत। Past Parti Pass. घूर्णः। Act घूर्णवान्॥

48 √jûrî to hurt, to grow old

Pre जूर्यते। Per जुजूरे। I Fut जूरिता। II Fut जूरिष्यते। Impera जूर्यताम्। Imper अजूर्यत। Poten जूर्येत। Bene जूरिषीष्ट। Aor अजूरिष्ट। Past Parti Pass जूर्णः। Act जूर्णवान्॥

शूरी ४९ हिंसास्तम्भनयोः॥

49 √sûrî 1 to injure, hurt, kill, 2 to be firm

Pre शूर्यते। Per शुशूरे। I Fut शूरिता। II Fut शूरिष्यते। Impera शूर्यताम्। Imper अशूर्यत। Poten शूर्येत। Bene शूरिषीष्ट। Aor अशूरिष्ट। Past Parti Pass शूर्णः। Act शूर्णवान्॥

चूरी ५० दाहे॥

50 √chûrî to burn

Pre चूर्यते। Per चचूरे। I Fut चूरिता। II Fut चूरिष्यते। Impera चूर्यताम्। Imper अचूर्यत। Poten चूर्येत। Bene चूरिषीष्ट। Aor अचूरिष्ट। Condi अचूरिष्यत। Past Parti Pass चूर्णः। Act चूर्णवान्॥

तप ५१ ऐश्वर्ये वा। अयं धातुरैश्वर्ये वा तङ्श्यनौ लभते। अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः। केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति। तप्यते। तप्ता। तप्स्यते। 'पत' इति व्यत्यासेन पाठान्तरम्। 'द्युतद्यामानियुतः पत्यमानः'॥

51 √tapa √pata, to burn, 2 or to be powerful This verb takes śyan and âtmanepada when it has the meaning of 'to be powerful or lord' Otherwise it belongs to the Bhuâdi class and is Parasmaipadî. According

to some, the word वा of this sûtra is not to be read here, but that it is a portion or a member of the next sûtra वृतुवरणे and should be attached at the beginning there, as वावृतु वरणे। As ततो वावृत्यमाना सा रामशाला न्यविक्षत। The letters of तप are reversed, and we get the root पत also That is another reading as we find in the Nirukta —इरज्यति, पत्यते, क्षयति, राजति these four have the meaning of lordliness and power" So also in Parakshudra "श्रुत धामा नियुत पत्यमान।"

Pre तप्यते। **Per** तेपे। **I Fut** तप्ता। **II Fut** तप्स्यते। **Impera** तप्यताम्। **Imper** अतप्यत। **Poten** तप्येत। **Bene** तप्सीष्ट। **Aor** अतप्त। अतप्साताम्। **Condi** अतप्स्यत। **Caus** तापयति। **Aor** अतीतपत्। **Desid** तितप्सते। **Inten** तातप्यते। **Yanluk** तातप्ति। **Past Parti Pass.** तप्त। **Act** तप्तवान्। **Ger.** तप्त्वा। **Noun**—तपन॥

वृतु ५२ वरणे। वृत्यते। पक्षान्तरे। वावृत्यते। 'ततो वावृत्यमाना सा रामशाला न्यविक्षत' इति भट्टि॥

52 √vṛtu, to select, choose If the वा of the last sùtra, be really a portion of this, then the root is वावृतु and वृतु॥

Pre वृत्यते, वावृत्यते। See above **Per** ववृते। **I Fut** वर्तिता। **II Fut** वर्तिष्यते। **Impera** वृत्यताम्। **Imper** अवृत्यत। **Poten** वृत्येत। **Bene** वर्तिषीष्ट। **Aor** अवर्तिष्ट, अवर्तिषाताम्। **Condi** अवर्तिष्यत। **Caus** वर्तयति। **Aorist** अवीवृतत्, अववर्तत्। **Desid** विवर्तिषते। **Inten** वरीवृत्यते। **Yanluk** वर्वर्तीति। **Past Parti Pass** वृत्त। **Act.** वृत्तवान्। **Ger.** वृत्वा। वर्तित्वा। **Nouns** -वृत्रम्॥

क्लिश ५३ क। उपतापे। क्लिश्यते। क्लेशिता॥

53 A √klisa, to suffer pain

Pre क्लिश्यते। **Per** चिक्लिशे। **I Fut** क्लेशिता। **II Fut.** क्लेशिष्यते। **Impera** क्लिश्यताम्। **Imper** अक्लिश्यत। **Poten** क्लिश्येत। **Bene** क्लेशिषीष्ट। **Aor** अक्लिष्ट। **Condi** अक्लेशिष्यत। **Causa** क्लेशयते। **Aor** अचिक्लिशत्। **Desid** चिक्लिशिषते। चिक्लेशिषते। **Inten** चेक्लिश्यते। **Yanluk** चेक्लेष्टि। **Past Parti Pass** क्लेशित, क्लिष्ट। **Active** क्लेशितवान्, क्लिष्टवान्। **Ger** क्लिष्ट्वा, क्लेशित्वा॥

काशृ ५३ दीप्तौ। काश्यते॥

53 √kâśṛ, to shine

Pre. काश्यते। **Per** चकाशे। **I Fut** काशिता। **II Fut** काशिष्यते। **Impera.** काश्यताम्। **Imper** अकाश्यत। **Poten** काश्येत। **Bene** काशिषीष्ट। **Aor** अकाशिष्ट॥

वाशृ ५४ शब्दे। वाश्यते। ववाशे॥

54 √vâśṛ, to sound, hum (as birds), roar, cry &c

Per वाश्यते। Per ववाशे। I. Fut वाशिता। II Fut वाशिष्यते। Impera वाश्यताम्। Imper अवाश्यत। Poten वाश्येत। Bene वाशिषीष्ट। Aor अवाशिष्ट। Condi अवाशिष्यत। Causa वाशयते। Aor अववाशत्। Desid विवाशिषते। Inten वावाश्यते। yanluk वावाष्टि। Nouns –वाश्र, वाशिरा॥

अथ पञ्च स्वरितेत।

Now the following five roots are svaiitet.

मृष ५५ तितिक्षायाम्। मृष्यति-मृष्यते। ममर्ष-ममृषे॥

55 √mrisha, to suffer, bear, endure, put up with

Pre मृष्यते। P मृष्यति। Per ममृषे। P ममर्ष। A ममृषिषे। I Fut मर्षिता। II Fut मर्षिष्यते। P मर्षिष्यति। Impera मृष्यताम्। P मृष्यतु। Imper अमृष्यत। P अमृष्यत्। Poten मृष्येत। P मृष्येत्। Bene मर्षिषीष्ट। P मृष्यात्। Aor अमर्षिष्ट। P अमर्षीत्। Condi अमर्षिष्यत। P अमर्षिष्यत्। Causa मर्षयते। Aor अममर्षत्। अमीमृषत्। Desid मिमर्षिषते। or ति। Inten मरीमृष्यते। Yanluk मरीमृषीति। मर्मृषीति। मर्मर्ष्टि। मरिमर्ष्टि। मरीमर्ष्टि। Past Parti Pass मर्षित। Act मर्षितवान्। Noun —दुर्मर्षण॥

शुचिर् ५६ पूतीभावे। पूतीभावः क्लेदः। शुच्यति-शुच्यते। शुशोच-शुशुचे। अशुचत्-अशोचीत्-अशोचिष्ट।

56 √i śuchir, to bathe, perform ablutions Pûtibhâva means bathing

Pre शुच्यते। P शुच्यति। Per शुशुचे। P शुशोच। I Fut शोचिता। II Fut शोचिष्यते। P शोचिष्यति। Impera शुच्यताम्। P शुच्यतु। Imper अशुच्यत। P अशुच्यत्। Poten. शुच्येत। P शुच्येत्। Bene शोचिषीष्ट। P शुच्यात्। Aor अशोचिष्ट। P अशुचत् or अशोचीत्। Condi अशोचिष्यत। P अशोचिष्यत्। P अशोचिष्यत्। Causa शोचयते। Aor अशूशुचत्। Desid शुशोचिषते। शुशुचिषते or ति। Inten शोशुच्यते Yanluk शोशोक्ति। Past Parti. Pass शुक्त। Act शुक्तवान्। Ger शुचित्वा। Nouns —शुक्ति।शुक्तिका॥

णह ५७ बन्धने। नह्यति-नह्यते। ननाह। ननद्ध-नेहिथ। नेहे। नद्धा। नत्स्यति। अनात्सीत्॥

57 √naha, to tie, bind This is anit

Pre नह्यते। प्रणह्यते। P नह्यति। Per नेहे। P ननाह। नेहतु। नेहु। P 2 s· ननद्ध। or नेहिथ। I Fut नद्धा। [नह्+ता=नध्+ता (by VIII 2 34 s 440)=नध्+धा (VIII 2 40 s 2280)] II Fut नत्स्यते। P नत्स्यति। Impera नह्यताम्। P नह्यतु। Imper अनह्यत। P अनह्यत्। Pot. नह्येत। P नह्येत्। Bened नत्सीष्ट। Aorist अनद्ध। अनत्साताम्। P अनात्सीत्। Causa नाहयते Aor अनीनहत्। Desid निनत्सते or ति। Inten नानह्यते yanluk. नानद्धि। Nouns.-नध्री। उपानहत्। नाभि। पद्मनाभ॥

रञ्ज ५८ रागे । रज्यति-रज्यते ॥

58 √rañj, to be dyed or colored, redden compare the Bhuâdi root रञ्ज (No 1048) also

Pre. रज्यते । P रज्यति । The nasal is elided by VI 4 24 s 415

शप ५९ आक्रोशे । शप्यति । शप्यते ॥

59 √sapa, to curse This is also conjugated in General Tenses like the Bhuadi root शप् (No 1049)

Pre शप्यते P शप्यति ।

अथैकादशानुदात्तेत ।

Now the following eleven roots are anudâttet They are anit and âtmanepadi

पद ६० गतौ । पद्यते । पेदे । पत्ता । पद्येत-पत्सीष्ट ॥

60 √pada, to go, move The aorist singular is formed by चिण् under the next sûtra

२५१३ । चिण् ते पदः । ३ । १ । ६० ॥

पदश्च्लेश्चिण्स्यात्तशब्दे परे । अपादि । अपत्साताम् । अपत्सत ॥

2513 चिण् is the substitute of च्लि after the verb पद to go, when the affix त follows

The affix त here means the third person singular tense-affix of the Atmanepada, as अपादि 'he went', but not so in the dual and plural, as अपत्साताम् they two went, अपत्सत they went, अट्+पद्+चिण्+त=अ+पाद्+इ=अपादि (the affix त being elided by VI 4 104)

Pre पद्यते । Pre पेदे । पेदिषे । I Fut पत्ता । II Fut पत्स्यते । Impera पद्यताम् । Imper. अपद्यत । Pot पद्येत । Bened पत्सीष्ट । Aorist अपादि । अपत्साताम् । अपत्सत । Causa. पादयते Aor अपीपदत् । Desid पित्सते । Inten. पनीपद्यते yauluk. पनीपत्ति । Nouns -उत्पदिष्णु । पदन । आपन्नजीविक । पाद् । पदगो । पादुका । पद्मम् । पद्मवती । पद्म ॥

खिद ६१ दैन्ये । खिद्यते । चिखिदे । खेत्ता । अखित्त ॥

61 √khida, to suffer pain or misery

Pre खिद्यते । Per चिखिदे । I Fut खेत्ता । II Fut. खेत्स्यते । Impera खिद्यताम् । Imper. अखिद्यत । Pot खिद्येत । Bene खित्सीष्ट । Aorist अखित्त । Causa खेदयते Aor अचीखिदत । Desid चिखित्सते । Inten चेखिद्यते Past Parti Pass खिन्न । Act खिन्नवान् । Ger. खित्वा । Noun खिदिरम् ।

विद ६२ सत्तायाम । विद्यते । वेत्ता ।

62 √vida, to be, to exist

Pre विद्यते । Per विविदे । I Fut. वेत्ता । II Fut वेत्स्यते । Impera विद्यताम् । Imper अविद्यत । Pot. विद्येत । Bene वित्सीष्ट । Aorist अवित्त ॥

बुध ६३ अवगमने । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि-अबुद्ध । अभुत्साताम् ॥

63 √budhi, to know, understand, perceive

Pre बुध्यते । Per बुबुधे । I Fut बोद्धा । II Fut भोत्स्यते । VIII 2 37. s 326 Impera बुध्यताम् । Imper अबुध्यत । Poten बुध्येत । Bene भुत्सीष्ट । Aor अबोधि or अबुद्ध । अभुत्साताम् । Causa बोधयति । Desid बुभुत्सते । Inten बोबुध्यते । Yanluk. बोबोद्धि । Atmane बुबुधान । Past Parti Pass बुद्ध । Act बुद्धवान् ॥

युध ६४ संप्रहारे । युध्यते । युयुधे । योद्धा । अयुद्ध । कथं 'युध्यति' इति युधमिच्छतीति क्यच् । '×अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्×' इति वा ॥

64 √yudha, to fight, struggle It is conjugated like the last

QUES -How do you explain the form युध्यति which is Parasmaipadi ?

ANS -It is either a denominative verb formed from the noun युधम् as युधमिच्छति=युध्यति with the affix क्यच्, or the Atmanepada dependent on a root being anudattet is not of universal validity Therefore this root is Parasmaipadi also (See the explanation of this Paribhâshâ under VIII 2 19 s 2326)

Pre. युध्यते । Per युयुधे । I Fut योद्धा । II Fut योत्स्यते । Impera युध्यताम् । Imper अयुध्यत । Pten युध्येत । Bene युत्सीष्ट । Aor अयुद्ध । अयुत्साताम् ॥

अनो रुध ६५ कामे । अनुरुध्यते ॥

65 √ano rudha, 'to desire' The √rudh preceded by the preposition anu and meaning to desire, belongs to the Divâdi class and is Âtmanepadi The √rudh itself belongs to the Rudhâdi class

अण ६६ प्राणने । अण्यते । आणे । अणिता । अन इति दन्त्यान्तोऽयमित्यन्ये ॥

66 √ana, √ana, to live, to breathe Some read this root with a dental n (न)

Pre अय्यते। Per आये। I Fut अयिता। II Fut अयिष्यते। Impera अय्यताम्। Imper आय्यत। Pot अय्येत। Bene. अयिषीष्ट। Aorist. आयिष्ट। Causa. आययति Aor आयियत् as in माभवानयियत्। Desid. अयियिषतते ॥

मन ६७ ज्ञाने । मन्यते। मेने। मन्ता ॥

67 √mana, to think, believe &c

Pre मन्यते। Per मेने। I Fut. मन्ता। II Fut मंस्यते। Impera मन्यताम्। Imper. अमन्यत। Pot मन्येत। Bene मंसीष्ट। Aorist अमंस्त। अमंसाताम् ॥

युज ६८ समाधौ । समाधिश्चित्तवृत्तिनिरोधः।अकर्मक।युज्यते। योक्ता ॥

68 √yuja, to concentrate the mind Samādhi here means the cessation of the modification of the thinking principle The root is intransitive

Pre युज्यते। Per युयुजे। I Fut योक्ता। II Fut योक्ष्यते। Impera युज्यताम्। Imper अयुज्यत। Poten युज्येत। Bene युक्षीष्ट। Aor अयुक्त। Nouns – प्रयुक्। योगी। योग ॥

सृज ६९ विसर्गे । अकर्मक। 'ससृज्यते सरसिजैररुणांशुभिन्नैः'। ससृजिषे। स्रष्टा। स्रक्ष्यते। 'लिङ्सिचौ–' (२३००) इति कित्त्वान्न गुणो नाप्यम्। सृक्षीष्ट। असृष्ट। असृक्षाताम् ॥

69 √srija to quit, abandon, leave It is also intransitive as in the verse वृन्त-श्लथ हरति पुष्प मनोकहाना, ससृज्यते सरसिजैररुणांशुभिन्नै। There is no guna of the vowel in the Benedictive, owing to I 2 11 s 2300, nor is अम् added by VI 1 58 s 2405, because the affixes are कित् ॥

Pre सृज्यते। Per ससृजे, ससृजिषे। I Fut स्रष्टा। II Fut स्रक्ष्यते। Impera सृज्यताम्। Imper असृज्यत। Poten. सृज्येत। Bene सृक्षीष्ट। Aor असृष्ट, असृक्षाताम्। Causa सर्जयते। Aor असीसृजत or अससर्जत। Desid सिसृक्षते। Inten सरीसृज्यते। Yanluk सरीसर्ष्टि ॥

लिश ७० अल्पीभावे । लिश्यते। लेष्टा। लेक्ष्यसे। लिक्षीष्ट। अलिक्षत। अलिक्षाताम् ॥

70 √liśa, to become small, decrease

Pre लिश्यते। Per. लिलिशे। I Fut लेष्टा। II Fut लेक्ष्यते। Impera. लिश्यताम्। Imper अलिश्यत। Poten लिश्येत। Bene लिक्षीष्ट। Aor अलिक्षत। अलिक्षाताम्। Causa. लेशयति। Aorist अलीलिशत्। Desid. लिलिक्षते। Inten लेलिश्यते। Yanluk लेलेष्टि। Noun —लिक्षा ॥

अथागणान्तात् परस्मैपदिन ॥

राधः ७१ अकर्मकाद्वृद्धावेव ।

एवकारो भिन्नक्रम । राधोऽकर्मकादेव श्यन् । उदाहरणमाह वृद्धाविति । यन्मह्यमपराध्यति । द्रुह्यतीत्यर्थ । 'विराध्यन्त क्षमत क '। द्रुह्यन्तमित्यर्थ । राध्यत्योदन । सिध्यतीत्यर्थ । कृष्णाय राध्यति । दैव पर्यालोचयतीत्यर्थ । दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । रराध । रराधतु । रराधिथ । 'राधो हिंसायाम्' (२५३२) इत्येत्वाभ्यासलोपाविह न । हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् । राद्धा । रात्स्यति । अयं स्वादिश्चुरादिश्च ॥

Now up to the end of this class all the roots are Parasmaipadi

71 √râdha, to prosper This root takes श्यन् only when it is intransitive. The एव is to be joined to the word अकर्मकात् by transposition, namely राधोऽकर्मकादेव श्यन्। The example will be when the root has the meaning of वृद्धि &c In fact, the word वृद्धि is merely illustrative The whole sûtra therefore means "the √râdha belongs to the Divâdi class, when it is intransitive and has the meaning like those of to increase, prosper &c ' Therefore we have examples like these also —(Mâgh II 11) नदूये सात्वती सुनुर्यन्मह्यमपराध्यति I do not grieve that the son of Sâtvati should offend me [or sin against me] Here, because the root is intransitive, though it means to be inimical, it is conjugated in this class Similarly विराध्यन्तक्षमेतक. (Mâgh II 43) Here also the verb is intransitive, and means to be inimical So also राध्यत्योदन । Here the verb means to become cooked So also कृष्णाय राध्यति गर्ग । Garga looks to the welfare of Krishna, or he calculates the good and bad fortunes of Krishna from his horoscope Here the meaning of the future good and bad fortunes is to be known from the implication of the root and it is therefore intransitive like the verb जीवति &c Namely the root governs the word दैव (fortune, luck) in the objective case, but this will not make the root transitive, because such an object is a portion of the meaning of the root and not a separate word governed by the root, so also is the root √jîva Intrasitive which governs the word prâna (life-breath) as object, the root meaning to hold breath The sûtra VI 4 143 s 2532 does not apply to this √râdha, and so there is no elision of the reduplicate nor the change of the root vowel to ए in the Perfect, because the √râdha 'to injure' being transitive cannot belong to this class This root also belongs to Svâdi and Churâdi classes

Pre. राध्यति । Per रराध । रराधतु । I Fut राद्धा । II Fut रात्स्यति । Impera राध्यतु । Imper अराध्यत् । Poten राध्येत् Bene राध्यात् । Aor. अरात्सीत् । अराद्धाम् । अरात्सु । Caus राधयति Aorist अरीरधत् । Desid. रिरात्सति । Inten राराध्यते ॥

व्यध ७२ ताडने । ग्रहिज्या-(२४१२) इति सम्प्रसारणम् । विध्यति । विव्याध । विविधतुः । विव्यद्ध-विव्यधिथ । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥

72 √vyadha, to pierce, to bore, to pick The Present is व्यध+श्यन्+तिप्=विध्+श्यन्+तिप् (the affix श्यन् being ङित् causes the vocalisation by VI 1 16 s 2412)=विध्यति ॥

Pre विध्यति । Per विव्याध । विव्यधतु । विव्यधिथ or विव्यद्ध । विव्यधथु । विव्यध । विव्याध । विव्यधिव । I Fut व्यद्धा । II Fut व्यत्स्यति । Impera विध्यतु । Imper अविध्यत् । Poten विध्येत् । Bene विध्यात् । Aor अव्यात्सीत् । अव्याद्धाम् । Deside विव्यत्सति । Inten. वेविध्यते । Yanluk वाव्यद्धि ॥

पुष ७३ पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति पुषादि-(२३४३) इत्यङ् । अपुषत् ॥

73 √pusha, to nourish, foster

The aorist is formed by अङ् as the root belongs to Pushâdi class (III 1 55 s 2343)

Pre. पुष्यति । Per पुपोष । पुपोषिथ । I Fut पोष्टा । II Fut पोक्ष्यति । Impera पुष्यतु । Imper अपुष्यत् । Poten पुष्येत् । Bene पुष्यात् । Aor अपुषत् । Pass पुष्यते । Aor अपोषि । d अपुक्षाताम् । Pl अपुक्षत । Causa पोषयति । Aor. अपूपुषत् । Decid पुपुक्षति । Inten पोपुष्यते । Yanluk पोपोष्टि ॥

शुष ७४ शोषणे । अशुषत् ॥

74 √śusha, to be dried, become dry or parched up

Pre शुष्यति । Per शुशोष । I Fut शोष्टा । II Fut शोक्ष्यति । Impera शुष्यतु । Imper अशुष्यत् । Poten शुष्येत् । Bene शुष्यात् । Aor अशुषत् । Past. Parti Pass शुष्क Act शुष्कवान् । (VIII 2 51 s 3030)

तुष ७५ प्रीतौ ।

75 √tusha, to be pleased or satisfied

Pre. तुष्यति । Per तुतोष । I Fut तोष्टा । II Fut तोक्ष्यति । Impera तुष्यतु । Imper अतुष्यत् । Poten तुष्येत् । Bene तुष्यात् । Aor अतुषत् । Past Parti Pass. तुष्ट Act तुष्टवान् । संतोष ॥

दुष ७६ वैकृत्ये ।

76 √dusha, to be bad or corrupted

Pre दुष्यति । Per दुदोष । I Fut दोष्टा । II Fut दोक्ष्यति । Impera दुष्यतु । Imper अदुष्यत् । Poten दुष्येत् । Bene दुष्यात् । Aor अदुषत् । Past Parti. Pass दुष्ट. Act. दुष्टवान् । दोषी । दूषीका ॥

श्लिष ७७ आलिङ्गने । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ॥

77 √slisha, to embrace The Present is श्लिष्यति । Per शिश्लेश । I Fut. श्लेष्टा । II Fut श्लेक्ष्यति । This root belongs to Pushâdi class and ought to take अङ् in the Aorist (III 1 55 s 2343) but in forming its Aorist, अङ् is not added, but क्स under the sûtra श्लिष आलिङ्गने (III 1 46. s 2514) We divide this sûtra in two parts, by the method of Yoga bibhâga The first portion being श्लिष , and the second आलिङ्गने ॥

२५१४ । श्लिषः— ।

अस्मात् परस्यानिटश्च्लेः क्सः स्यात् । पुषाद्यङोऽपवादो न तु चिणः । पुरस्तादपवादन्यात् ॥

2514. After the root ślish, the *ksa* is the substitute of the anit chli of the Aorist.

The root श्लिष ends in ष a letter of शल् pratyâhàra and would take क्स by I. 1 45 s 2336, why then this sûtra ?

. This debars the अङ् which would have come otherwise to the supersession of क्स as the root belongs to the Pushâdi class But this substitute क्स does not debar the चिण् on the maxim that an apavâda rule which comes before a general rule, debars the rule which stands near to it, and not those which are far from it Therefore this sûtra III 1 46 debars the अङ् of III 1 55 but not the चिण् of III 1 60 Why do we say of anit—chli ? The rule will not apply to the Bhvâdi श्लिष् 'to burn', for that is सेट्, as अश्लेषीत् ॥

The next portion of the sûtra is given below

२५१४ । श्लिष आलिंगने । ३ । १ । ४६ ॥

श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र । योगविभागसामर्थ्यात् 'शल इगुपधात्'-(२३३६) इत्यस्याप्ययं नियमः 'अश्लिक्षत्कन्या देवदत्तः' । आलिङ्गन एव' इति किम् । समश्लिषज्जतुकाष्ठम् । अङ् । प्रत्यासत्ताविह श्लिषि । कर्मण्यनालिङ्गने सिजेव न तु क्सः । एकवचने चिण् । अश्लेषि । अश्लिक्षाताम् । अश्लिक्षन्त । अश्लिष्ठा । अश्लिढ्वम् ॥

2514 क्स is the substitute of च्लि after the verb श्लिष, only then when it is employed in the sense of embracing and not otherwise

This is a restrictive aphorism By the breaking of this sûtra into two, the general rule III 1 45 s 2336, under which the root would have taken क्स universally is restricted in its scope to that root श्लिष् which means to embrace As आश्लिक्षत् कन्याम् 'he embraced the girl' But समाश्लिषज्जतुकाष्ठम् 'the glue joined the wood' Here the Aorist is formed by अङ् । The root श्लिष means here to glue (?). In the Passive when not meaning to embrace, the Aorist is by सिच् and not क्स ॥

* In the 3rd Person Singular, there is चिण्। As अश्लेषि । अश्लिक्षाताम्॥ अश्लिक्षन्त । अश्लिक्षा । अश्लिक्षद्ध्वम्॥

NOTE.—The following extract from the Mâdhavîya, will clear this sûtra 'How will you form the Atmanepada Aorist ? We shall form it with the क्स of शलइगुपधात् III 1 45 s 2336 As समाश्लेषि कन्या देवदत्तेन 'the girl was embraced by Devadatta' The dual and plural are समाश्लिक्षाताम् and समाश्लिक्षन्त। The 3rd Per Sing is formed by चिण् (as in समाश्लेषि, because it being subsequent (III 1 60 s 2513) debars क्स (III 1 45 s 2336). If so, the क्स ought to come, even when the root does not mean to embrace ? But the desired form is obtained from सिच् as समाश्लिक्षत जतूनि काष्ठै: 'The glues were joined by the woods' How do you explain this ? To get over this difficulty, we divide the sûtra श्लिष आलिङ्गने into two The first will be श्लिष क्स The affix ksa comes in the Aorist of ślish' This, on the maxim of पुरस्तादपवाद &c debars the अङ् and not the चिण्। The second will be आलिङ्गने। The root must mean to embrace This rule will then be a niyama or restriction on the first By this division of one sûtra into two, क्स, whether obtained from III 1 45 or III 1 46 first half (श्लिष), will be restricted to that ślish which means to embrace, and to nothing else Therefore in the sense of 'non-embracing', it will take अङ् in the Parasmaipada, and सिच् in the Âtmanepada respectively

77 √slisha, to embrace

Pre श्लिष्यति। Per शिश्लेष। I Fut श्लेष्टा। II Fut श्लेक्ष्यति। Impera. श्लिष्यतु। Imper अश्लिष्यत्। Poten श्लिष्येत्। Bene श्लिष्यात्। Aor अश्लिषत् अश्लिक्षत्। Nom - श्लेष्मा॥

शक ७८ विभाषितोऽमर्षणे । विभाषित इत्युभयपदीत्यर्थः । शक्यति-शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ-शशक्थ। शेके । शक्ता । शक्ष्यति शक्ष्यते । अशकत्-अशक्त । सेट्कोऽयमित्येके । तन्मतेनानिट्कारिकासु लृदित्पठितः । शकिता । शकिष्यति ॥

78 √saka is ubhayapadî when not meaning मर्षण 'to endure.' 1 to be able, have power to effect

(2 to bear, endure) It is both Padis According to some this root is not anit, but सेट्। In their opinion, the root शक् mentioned in the Anit kârikâs does not refer to this root but to शक्लृ of the Swâdi class Therefore the I Future of this root is शकिता। The II Future शकिष्यति। The word विभाषित is a technical word meaning ubhayapadi When the root means मर्षण 'to endure' it does not belong to this class

NOTE -According to the Mâdhavîya, the root *belongs* to this class when meaning endure According to Kshîraswâmî the sûtra is thus explained

"when the sense is to endure, there is *option* (vibhâshita) with regard to the root *saki*, that is in one alternative, it may be Divâdi, in the other Svâdi As शक्यते and शक्नोति ।" Śâktâyan has also taken the word विभाषित in this sense

Pre. शक्यति । A शक्यते । Per शशाक । A शेके । शेकतु । शेकिथ or शशक्थ । I Fut शक्ता or शकिता । II Fut शक्यति A शक्यते or शकिष्यति । Impera. शक्यतु । Imper अशक्यत् । Poten शक्येत् । Bene शक्यात् । Aor अशकत् । A अशक्त । Pass शक्यते । Desid शिशक्षति or ते । Past Parti. Pass शक्त. or शकित Act शक्तवान् । Ger शक्त्वा ॥

ष्विदा ७९ गात्रप्रक्षरणे । घर्मस्रुतावित्यर्थः । अयं ञीदिति न्यासकारादयः । नेति हरदत्तादयः । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् ॥

79 √shvidâ, to sweat, perspire The word गात्रप्रक्षरण means the discharge of perspiration According to Nyâsakâra &c the root has an indicatory ञि according to Haradatta &c it is not so See Padamanjarî on I 2 19 s 3052

Pre स्विद्यति । Per सिष्वेद । सिष्वदिथ । सिष्विदिव । I Fut स्वेत्ता । II Fut स्वेत्स्यति । Impera. स्विद्यतु । Imper अस्विद्यत । Poten स्विद्येत् । Bene स्विद्यात् । Aor अस्विदत् । Causa स्वेदयति । Aor असिष्विदत् । Desid सिस्वित्सति । Inten सेष्विद्यते । Yanluk सेष्विति । Past Parti Pass स्विन्न । Act स्विन्नवान ।

क्रुध ८० क्रोधे । क्रोद्धा । क्रोत्स्यति ॥

80 √krudha, to be angry

Pre क्रुध्यति । Per चुक्रोध । चुक्रोधिथ । चुक्रुधिव । I Fut क्रोद्धा । II Fut. क्रोत्स्यति । Impera क्रुध्यतु । Imper अक्रुध्यत् । Pot. क्रुध्येत् । Bene क्रुध्यात् । Aor अक्रुधत् । Noun – क्रोधन ॥

क्षुध ८१ बुभुक्षायाम् । क्षोद्धा । कथं क्षुधित इति । संपदादिक्विबन्तात्तारकादित्वादितजिति माधवः । वस्तुतस्तु वसतिक्षुधोः (३०४६) इतीट् ।

81 √kshudha, to be hungry If the root is anit, how do you explain the form क्षुधित । According to Mâdhava it is formed thus From the root क्षुध we form the noun क्षुत् by adding क्विप् under Sampadâdi class (III 2 178) From this noun क्षुत् we form a secondary noun by adding the affix इतच् by considering it to belong to the Târakâdi class, the force of the affix being तदस्य सं जातं (V 2 36 s 1837) Thus क्षुदस्य संजातं=क्षुधित । As a matter of fact the form क्षुधित is not a Taddhita derivative from the noun क्षुत्, but it is the Participle of क्षुध the इट् being added under VII 2. 52 s. 3046.

Pre चुध्यति। Per चुचोध। I Fut. चोद्धा। II Fut चोत्स्यति। Impera चुध्यतु। Imper अचुध्यत्। Poten चुध्येत्। Bene चुध्यात्। Aor. अचुधत्। Condi अचोत्स्यत्॥

शुध ८२ शौचे। शुध्यति। शुशोध। शोद्धा॥

82 √śudhi, to become pure or purified

Per शुध्यति। Per शुशोध। I Fut. शोद्धा। II Fut शोत्स्यति। Impera शुध्यतु। Imper अशुध्यत्। Poten शुध्येत्। Bene शुध्यात्। Aor अशुधत्। Con. अशोत्स्यत॥

षिधु ८३ संराद्धौ। ऊदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्॥

83 √shidhu, to be accomplished or fulfilled To read it as षिधू with long ऊ is incorrect

Pre सिध्यति। Per सिषेध। I Fut सेद्धा। II Fut सेत्स्यति। Impera सिध्यतु। Imper असिध्यत्। Poten सिध्येत्। Bene सिध्यात्। Aor असिधत्। Desid सिसित्सति। Inten सेषिध्यते Yanluk सेषेद्धि Past Parti Pass सिद्ध। Ger सिद्ध्वा। सिधित्वा। सेधित्वा। Caus सेधयति or साधयति। (VI 1 49. s 2602)

रध ८४ हिंसासंराद्ध्योः। संराद्धिर्निष्पत्तिः। रध्यति। रधिजभोरचि (२३०२) इति नुम्। ररन्ध। ररन्धतु.॥

84 √radha, to injure, to be completed Samrâddhi means completed Pre रध्यति। Per ररन्ध। The nasal is added by s 2302 The augment इट् is optionally added by the following sûtra

२५१५। रधादिभ्यश्च। ७। २। ४५॥

रध् नश् तृप् दृप् द्रुह् मुह् ष्णुह् ष्णिह् एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात्। ररन्धिथ ररद्ध। ररन्धिव -रेध्व॥

2515 A valâdi-ârdhadhâtuka affix optionally takes इट् after रध् and the seven roots that follow it (Divâdi. 84 to 91).

Thus ररन्धिथ or ररद्ध। ररन्धिव or रेध्व The augment नम् does not come in those affixes which are सेट् except in the Perfect by the following sûtra

NOTE —As रधिता or रद्धा नष्टा (VII 1 60 नुम) नशिता नंष्टा (VI 1 59 अम्) तर्प्ता, तर्पिता। द्रप्ता दर्प्ता दर्पिता द्रोग्धा द्रोढा (VIII 2 33) द्रोहिता मोग्धा, मोढा, मोहिता, स्नोढा, स्नोहिता, स्नोग्धा, स्नेग्धा स्नेढा स्नेहिता॥

NOTE —Some hold that the रधादि roots *optionally* take इट् in the Perfect Tense also, because the present sûtra being subsequent to VII

2 13, debars that sûtra so far Others hold that the रधादि roots will *always* take इट् in the Perfect, because the former rule VII. 2 13 is stronger than the present, inasmuch as that is a prohibitory rule So they from ररन्धिव and ररन्धिम ॥

२५१६ । नेट्यलिटि रधेः । ७ । १ । ६२ ॥

लिड्वर्जे इटि रधेर्नुम्न स्यात् । रधिता—रद्धा । रधिष्यति । रत्स्यति । अङि नुम् । 'अनिदिताम्— (४१५) इति नलोप । अरधत् ॥

2516. The augment नुम् is not added to रध्, before an affix beginning with the augment इट्, except in the Perfect.

As रधिता, रधितुम्, रधितव्यम् but रन्धनम्, रन्धक before Anit affixes, and ररन्धिव, ररन्धिम in the Perfect

NOTE —When नुम् is added रन्ध् becomes a root ending in a conjunct consonant, and therefore the लिट् affixes after it are not कित् (असंयोगात् लिट् कित् I 2 5), and therefore the न् is not elided by VI 4 24 But when the affix क्वसु of the Perfect is added, we have रेधिवस् Nom Sg रेधिवान् ॥ Here the affix being expressly taught with an indicatory क the न् is elided The reduplicate is elided, the अ changed into ए, then इट् is added, then नुम्, and then the नुम् is elided by the expressly taught कित् ॥

NOTE —Why was not the sûtra made as इटि लिटि रधे when by so doing, the augment नुम् would have been added only in the Perfect when it had इट् and no where else ? This form of sûtra would have also meant that नुम् would be added in that Perfect which took इट् and in no other Perfect, while cases other than Perfect might take it That being so, there would be no नुम् in ररन्ध, while रधिता would require नुम् ॥ See, however, the Mahâbhâshya for the *contra*

लुङ्

अरधत् ।	अरधतां ।	अरधन् ।
अरधः ।	अरधतम् ।	अरधत ।
अरधं ।	अरधाव ।	अरधाम ।

This form अरधत् is thus evolved —

अ+रध्+च्लि+त्=अ+रध्+अङ्+त्=(III 1 55 s 2343 the root is Pushâdi)=अ+रध्+नुम्+अ+त् (VII 1 61 s 2302)=अ+रध्+अ+त्=(the न is elided by VI 4 24 s 445)=अरधत् ॥

Pre रध्यति । Per ररन्ध । ररन्धतु । ररन्धु । ररन्धिथ or ररद्ध । ररन्धथु । ररन्ध । ररन्ध । ररन्धिव or रेन्ध्व । ररन्धिम or रेन्ध्म । I Fut. रधिता or रद्धा । II Fut रधिष्यति or रत्स्यति Impera रध्यतु । Imper. अरध्यत् । Pot रध्येत् । Bene रध्यात् । Aor अरधत् । Condi अरधिष्यत् । अरत्स्यत् । Causa.

रन्धयति Aor अरन्धत् । Desid रिरन्धिषति । रिरत्सति । Inten रारध्यते Yanluk रारन्धीति or रारद्धि । Nouns -रन्धनम् । रन्धक ॥

णश ८५ अदर्शने । नश्यति । ननाश । नेशतुः । नेशिथ ॥

85 √naśa, to be lost

According to one view, the aorist takes ष, not only in the chhandas, but in ordinary language also as 3rd s अनिशत्, pl अनशन्, 1st s अनेशम् ॥

85 √naśa, to be lost The Present is नश्यति । Per ननाश, नेशतु, नेशिथ । When the second Person Singular does not take इट् the following sûtra applies

२५१७ । मस्जिनशोर्झलि । ७ । १ । ६० ॥

नुम्स्यात् । ननष्ठ । नेशिव-नेश्व । नेशिम -नेश्म । नशिता—नंष्टा । नशिष्यति—नङ्क्ष्यति । नश्येत् । नश्यात् । अनशत् । प्रणश्यति ॥

2517. The augment नुम् is added after the vowel of the root in मस्ज् and नश, before an affix, beginning with any consonant, other than a semi vowel or a nasal.

NOTE —As मङ्क्ता, मस्ज्+तृच् (no इट् by VII 2 10 s 2246), add न्=मस् न् ज् + तृ, elide स् by VIII 2 29, change ज् to क, and न् to anusvâra which then becomes ङ् ॥ मङ्क्तुम् मङ्क्तव्यम् नंष्टा, नंष्टुम् and नंष्टव्यम् ॥ But मज्जनम् and नशिता, and मग्न (VI 4 32) In मग्न and मग्नवान्, the नुम् is supposed to be placed before the last consonant in मस्ज् in order that it may get elided

Thus —नश्+थल्=नश्+नश्+थल्=न+नश्+थल्=न+नश्+नुम्+थल्=ननष्ठ ॥

After an alterant preposition, the न is changed to ण, i, प्रणश्यति । But not so, under the circumstances mentioned in the following sûtra

२५१८ । नशेः षान्तस्य । ८ । ४ । ३६ ॥

णत्वं न स्यात् । प्रनष्ट । अन्तग्रहणं भूतपूर्वप्रतिपत्यर्थम् । प्रनङ्क्ष्यति-नशिष्यति ॥

2518 The ण is not the substitute of the verb नश् 'to destroy', when ending in ष ॥

When the श् is changed to ष् in नश्, the न of नश् is not changed Thus प्रनष्ट, परिनष्ट ॥ The नुम ordained by VII 1 60, is elided by VI 4 24 and श् changed to ष् by VIII 2 36 S 294

Why do we say षान्तस्य ? Observe प्रणश्यति, परिणश्यति ॥ The word अन्त is taken in order that the prohibition may apply to words like प्रनङ्क्ष्यति, which did end with ष् though the ष has been changed by other rules, and is no longer visible For here the श् of नश् is changed to ष् by VIII 2 36, and then this ष् is changed to क् by VIII 2 41 s 295, and the नुम् is added by VII. 1. 60, s 2517

Pre नश्यति । Per. ननाश । नेशतु । नेशु । नेशिथ or ननंष्ठ । नेशथु । नेशिव or नेश्व । नेशिम or नेश्म । I Fut नशिता or नंष्टा । II Fut नशिष्यति or नङ्क्ष्यति । Impera नश्यतु । Imper अनश्यत् । Poten नश्येत् । Bene नश्यात् । Aor अनशत् । अनश । अनशम् । Condi अनशिष्यत् or अनङ्क्ष्यत् ॥

तृप ८६ प्रीणने । प्रीणनं तृप्तिस्तर्पणं च । 'नाग्निस्तृप्यति काष्ठानाम्' । 'पितॄनतार्प्सीत्' इति भट्टिः इत्युभयत्र दर्शनात् । ततर्पिथ-तत्रप्थ-ततर्प्थ । तर्पिता-तर्प्ता त्रप्ता । 'कृशमृशस्पृश'-इति सिज्वा । अतार्प्सीत्-अतर्पीत्-अत्राप्सीत्-अतृपत् ॥

86 √tripa, to be pleased, to become satisfied The word प्रीणन here means satisfaction, as well as causing satisfaction to another, as नाग्निस्तृप्यति काष्ठानाम् the fire is never satiated with fuels, so also पितॄन् अतार्प्सीत् 'He caused satisfaction to the ancestors' (Bhatti I 1) There we find it used in both senses In the aorist the सिच् is optional by the vârtika under III 1 47 s 2407 Thus we have four forms (1) अतृपत्, d अतृपताम् with अङ् as the root belongs to the pushâdi class (2) अतर्पीत्, d अतर्पिष्टाम् with सिच् । There is no vriddhi because of VII 2 4 s 2268 (3) अत्राप्सीत् when anit, and अम् augment (4) अतार्प्सीत् no अम् । but vriddhi in both cases by III. 2 3 s 2267

Pre तृप्यति । Per ततर्प । ततृपतु । ततर्पिथ or ततर्प्थ or तत्रप्थ । ततृपथु । ततृप । ततर्प । ततृपिव I Fut. तर्पिता । तर्प्ता or त्रप्ता । II Fut तर्पिष्यति । तर्प्स्यति or त्रप्स्यति । Impera. तृप्यतु । Imper अतृप्यत् । Poten तृप्येत् । Bene तृप्यात् । Aor (1) अतृपत् । अतृपताम् (2) अतर्पीत् । अतर्पिष्टाम् । (3) अतार्प्सीत् । (4) अत्राप्सीत् । Causa तर्पयति । त्रापयति । Aor अततर्पत् । अतीतृपत् । Desid तितर्पिषति । तितृप्सति । Inten तरीतृप्यते । Yanluk तरीतृपीति । तरीतर्प्ति । Past Parti Pass तृप्त । Active तृप्तवान् । Ger तर्पित्वा । तृप्त्वा ॥

दृप ८७ हर्षमोहनयोः । मोहनं गर्वः । दृप्यतीत्यादि ॥

रधादित्वादिमौ वेट्कावमर्थमनुदात्तता ॥

2550 The augment सुट् is placed before क when सम्, परि and उप are followed by the verb कृ and the sense is that of ornamenting

२५५१ । समवाये च । ६ । १ । १३८ ।

सम्परिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे । संस्करोति । अलं करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । सम्पूर्वस्य क्वचिदभूषणेऽपि सुट् । 'संस्कृतं भक्षाः' (१२१७) इति ज्ञापकात् । 'परिनिविभ्यः–' (२२७५) इति षः । परिष्करोति । सिवादीनां वा । पर्यष्कार्षीत्–पर्यस्कार्षीत् ।

2551 The augment सुट् is placed before क, when the verb कृ comes after सम्, परि and उ , the sense being that of combining

Thus संस्करोति । The meaning is अलंकरोति 'he adorns' So also संस्कुर्वन्ति meaning 'they combine.'

The augment सुट् is sometimes added to the root preceded by सम् even when the meaning is not that of adorning Because Panini himself has used the word संस्कृतं in the sûtra संस्कृतं भक्षाः (S 1217) not in the sense of adorning.

With परि, the स of सुट् is changed to ष by VIII 3 70 S 2275 As परिष्करोति । It is optional under the conditions of S. 2359 As पर्यष्कार्षीत् or पर्यस्कार्षीत् ।

Thus संस्कर्ता, संस्कर्तुम्, संस्कर्तव्यम् ॥ The म् of सम् is changed to anusvâra by VIII 3. 5. So also परिष्कर्ता परिष्कर्तुं परिष्कर्तव्यम् ॥ The स is changed to ष by VIII, 3. 70 So also with उप, as उपस्कर्ता, उपस्कर्तुम् उपस्कर्तव्यम् ॥ Why do we say 'when meaning to ornament'? Observe उपकरोति ॥ Sometime सुट् comes after सम् even when the sense is not that of ornamenting, thus संस्कृतमन्नम् ॥

The word समवाय means aggregation Thus तत्र नः संस्कृतम् तत्र नः परिष्कृतम्, तत्र नः उपस्कृतम्=सङ्घटितम् that is 'we assembled there.'

With उप the root, takes सुट् and has then the following additional meanings also, in addition to that given above.

२५५२ । उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ।

उपात्कृञः सुट् स्यादेष्वर्थेषु । चात्प्रागुक्तयोरर्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्यस्याध्याहारः । आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । अलंकृतेत्यर्थः । उपस्कृता ब्राह्मणाः । समुदिता इत्यर्थः । एधोदकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । उपस्कृतं ब्रूते । वाक्याध्याहारेण ब्रूत इत्यर्थः ।

2552. The augment सुट् is placed before क, when the verb कृ comes after उप, and the sense is that of 'to take pains for something, to prepare, and to supply an ellipses in a discourse'.

To take pains in imparting a new quality to a thing in order to increase its value, or to keep it safe from deterioration is called प्रतियत्नः ॥ That which is prepared or altered is called वैकृतं ॥ The word वैकृतं is the same as विकृतं, the affix अण् being added without changing the sense, by considering it to belong to प्रज्ञादि class (V 4 38). To supply by distinct statement the sense of a sentence which is alluded to, is called the अध्याहार of a sentence. Thus उपस्कृता कन्या, 'an adorned girl' उपस्कृता ब्राह्मणाः 'the assembled Brâhmanas,' are examples under S. 2550 and 2551 While in the sense of 'taking pains' we have एधोदकस्योपस्कुरुते (See I 3. 32), काण्डगुणस्योपस्कुरुते ॥ In the sense of 'altering by preparing' we have उपस्कृत भुङ्क्ते, उपस्कृत गच्छति ॥ In the sense of 'supplying a thesis' we have उपस्कृतं जल्पति, उपस्कृतमधीते ॥ When not having any one of the above five senses (VI. 1. 137-139) we have उपकरोति ॥

By the following sûtra, the augment is always to be placed before the क of कृ ।

२५५३ । सुट्कात्पूर्वः । ६ । १ । १३५ ।

'* अड्भ्यासव्यवायेऽपि *' इत्युक्तम् । समस्कार । 'कात्पूर्व–' इत्यादि भाष्ये प्रत्याख्यातम् । तथा हि 'पूर्वं धातुरुपसर्गेण युज्यते' । अन्तरङ्गत्वात्सुट् । ततो द्वित्वम् । एवं च 'ऋतश्च संयोगादेर्गुणः' (२३८९) । संचस्करतुः । 'कृसृभृ–' (२२९३) सूत्रे 'ऋतो भारद्वाजस्य' (२२९६) इति सूत्रे च '* कृञोऽसुट इति वक्तव्यम् *' । तेन ससुट्कात्परस्येट् । संचस्करिथ । संचस्करिव । 'गुणोऽर्ति–' (२३८०) इति सूत्रे 'नित्यं छन्दसि' (३५८७) इति सूत्रात् 'नित्यम्' इत्यनुवर्तते । 'नित्यं यः संयोगादिस्तस्य' इत्यर्थात्सुटि गुणो न । संस्क्रियात् । 'ऋतश्च संयोगादे' (२५२६) इति लिङ्सिचोरिट् । 'एकाच उपदेशे–' (२२४६) इति सूत्रात् 'उपदेशे' इत्यनुवर्त्य 'उपदेशे यः संयोगादिः' इति व्याख्यानात् । संस्कृषीष्ट । समस्कृत । समस्कृषाताम् ।

2553 Upto VI. 1. 157 inclusive, the following sentence is to be supplied in every aphorism.—"before क् is added स्" ॥

Vart —The augment is to be added to क even when the augment अट् or the reduplicate intervenes between the Preposition and the क । We have taught this vârtika already under VI. 1. 140. S. 2539. Thus संचस्कार in the Perfect. Here the च is added between the abhyasa च and क ।

In the Mahâbhâshya the addition of the phrase कात्पूर्वः in the sûtra has been criticised as redundant. That being so, we add the preposition first to the root, on the maxim that an upasarga is first joined to the

root. Then we add सुट् as it is antaranga to the rule of reduplication. Then we reduplicate Thus we have संस्कृ । Now we apply VII. 4 10 S 2379, and guna is substituted for ऋ in the लिट् affixes of the Perfect. As संचस्करतुः ।

The sûtras S 2293 and 2296 which prohibit इट् augment with regard to ऋ, should be read as qualified by the following —

Vârtika —The sûtras 2293 and 2296 apply to the ऋ which has not taken the augment सुट् । Therefore when सुट् is added, the root takes the augment इट् । As संचस्करिव । संचस्करिम ।

In the लिङ्, the root स्कृ ought to take guna, by VII. 4. 29 S. 2380, because it ends in ऋ and begins with a conjunct consonant This guna, however, does not take place, because in S 2380 we read the anuvritti of नित्यं from the preceding Ashtâdhyayi sûtra VII. 4. 8 S. 3587, and we interpret the word sañyogâdi there to mean such a root which *always* begins with a conjunct consonant. But स्कृ is not such a root The √कृ has temporarily assumed this form Thus we have संस्क्रियात् ।

Nor is इट् augment added in the Benedictive and the Aorist by VII 2. 43. S 2526 for स्कृ is not the sañyogâdi root contemplated by that sûtra For in that sûtra we read the anuvritti of उपदेशे from the preceding Ashtâdhyâyi sûtra VII. 2 10 S 2246, and we interpret that sûtra to mean 'a root which in its *first enunciation* (upadesa) in the Dhâtupâtha is sanyogâdi and ends with ऋ takes इट् in the Benedictive and Aorist in the Atmanepada' Now स्कृ is not sanyogâdi in the updesa there it is only कृ । So that sûtra does not apply, and we have no इट् । The Benedictive therefore is संस्कृषीष्ट and the Aorist is समस्कृत, dual समस्कृषाताम् ।

The view of Kâsikâ is given in the following note —

Note —What is the necessity of using the phrase कात्पूर्वः in this sûtra? It is used to indicate that the स् remains unattached to क्, though it stands before it. Thus though कृ becomes स्कृ, yet the latter should not be considered to be a verb beginning with a conjunct (sanyoga) consonant and therefore the guna taught in VII 4. 10 S 2379 (the root ending in ऋ and preceded by a conjunct letter, takes guna before लिट्) does not apply, nor do the rules like VII 4. 29 S. 2380, nor the rules ordaining the addition of intermediate इट् (VII. 2 43 S 2526) by which the इट् would come in लिङ् and सिच् (Benedictive and Aorist) as, संस्कृषीष्ट and समस्कृत, and so also VII. 4. 29 S. 2380 does not apply as संस्क्रियते the Benedictive (यकि लिङि) of संस्कृ ॥ If so, then the anudâtta accent taught in VIII. 1. 28 would not take place, since the augment सुट् would intervene between the non-तिङ्-word सं and the तिङन्त word करोति, thus संस्करोति would have accent on the verb. It is a maxim स्वरविधौ व्यञ्जनमविद्यमानवत् 'in applying a rule

relating to accent the intervening consonants are considered as if non-existent', and therefore सुट् does not offer any intervention to the application of the rule VIII 1 28 S 3935 If सु is not to be taken as attached to क, how do you explain the guna, in the Perfect 3rd Per Dual and Plural in संचस्करतुः and संचस्करुः which apparently is done by applying VII 4. 10. S 2379. Though that rule strictly applies to roots beginning with a conjunct consonant, it will apply also to roots like संस्कृ which have a conjunct consonant for their penultimate, and the guna is done also on the maxim तन्मध्यपतितस्तद्ग्रहणेन गृह्यते (See VI. 1 132). The indicatory ट in सुट् is for the purpose of differentiating it from स in the Sûtra VIII 3. 70.

इति तिङन्ततनादिप्रकरणम् ।

अथ तिङन्त क्र्यादि प्रकरणम् ॥

CHAPTER IX.

THE KRYADI ROOTS

डुक्रीञ् १ द्रव्यविनिमये ।

1. √du krîñ To purchase, to barter

The kryâdi roots form the ninth class. They contain 61 roots In conjugating these roots श्ना is added as a vikârana by the following sûtra.

२५५४ । क्र्यादिभ्यः श्ना । ३ । १ । ८१ ।

क्रीणाति । 'ई हल्यघोः' (२४९७) । क्रीणीतः । ईत्वात्पूर्वं श्नोऽन्तादेशः परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झस्याद्भावः । ततः 'श्नाभ्यस्तयोः–' (२४८३) इत्याल्लोपः । क्रीणन्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रयिथ–चिक्रेथ । चिक्रियिव । चिक्रियिवे । क्रेता । क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट ।

2554. The affix श्ना comes after the roots of the Kryâdi class when a sârvadhâtuka affix follows denoting the agent.

Thus क्री+श्ना+तिप्=क्रीणाति 'He buys' The dual is क्री+ना+तस् =क्री+नी+तस् (VI 4. 113. S. 2497, the आ is replaced by ई)=क्रीणीतः । The plural is क्री+ना+झि. Here अन्त should replace झ prior to the operation of the ई—rule · because it is a subsequent rule, being VIII. 1. 3. S. 2169, because it is a *nitya* or universal rule, and lastly because it is antaranga. So is the case when झ is replaced by अत् (by VII. 1. 5. S 2258). After such अन्त substitution, we have क्री+ना+अन्ति । Now applies VI. 4. 112 S. 2483 and आ is elided. Thus we get क्रीणन्ति ।

1 √du krīñ, to buy, purchase

Parasmai Pre. क्रीणाति । क्रीणीतः । क्रीणन्ति । क्रीणासि । क्रीणीथः क्रीणीथ । क्रीणामि । क्रीणीवः । क्रीणीमः । Per चिक्राय । चिक्रियतुः । चिक्रियुः । चिक्रयिथ or चिक्रेथ । चिक्रियथुः । चिक्रिय । चिक्राय or चिक्रय । चिक्रियिव । चिक्रियिम । I Fut क्रेता । II Fut क्रेष्यति । Impera. क्रीणीतात् or क्रीणातु । क्रीणीताम् । क्रीणन्तु । क्रीणीहि । क्रीणीतम् । क्रीणीत । क्रीणानि । क्रीणाव । क्रीणाम । Imper अक्रीणात् । अक्रीणीताम् । अक्रीणन् । अक्रीणाः । अक्रीणीतम् । अक्रीणीत । अक्रीणाम् । अक्रीणीव । अक्रीणीम । Poten. क्रीणीयात् । क्रीणीयाताम् । क्रीणीयुः । क्रीणीयाः । क्रीणीयातम् । क्रीणीयात । Bene. क्रीयात् । क्रीयास्ताम् । Aor. अक्रैषीत् । अक्रैष्टाम् । अक्रैषुः । अक्रैषीः । अक्रैष्टम् । अक्रैष्ट । अक्रैषम् । अक्रैष्व । अक्रैष्म । Causa क्रापयति । Aor. अचिक्रपत् । Desid चिक्रीषति । Inten. चेक्रीयते । yañ luk चेक्रेति । Past Part Pass क्रीतः । Act. क्रीतवान् । Nouns —क्रीतिवं । क्रयः । क्रेयः । क्रायकः ।

Atmane Pre क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणीमहे । Per चिक्रिये । चिक्रियाते । चिक्रियिरे । चिक्रियिषे । चिक्रियाथे । चिक्रियिध्वे । चिक्रिये । चिक्रियिवहे । चिक्रियिमहे । I Fut क्रेता । II Fut क्रेष्यते । Impera. क्रीणीताम् । क्रीणाताम् । क्रीणताम् । क्रीणीष्व । क्रीणाथाम् । क्रीणीध्वम् ॥ क्रीणै । क्रीणावहै । क्रीणामहै । Imper अक्रीणीत । अक्रीणाताम् । अक्रीणत । अक्रीणीथाः । अक्रीणाथाम् । अक्रीणीध्वम् । अक्रीणि । अक्रीणीवहि । अक्रीणीमहि । Poten. क्रीणीत । क्रीणीयाताम् । क्रीणीथाः । क्रीणीथ । क्रीणीवहि । क्रीणीमहि । Bene. क्रेषीष्ट । क्रेषीयास्ताम् । Aor. अक्रेष्ट । अक्रेषाताम् । अक्रेषत । अक्रेष्ठाः । अक्रेषाथाम् । अक्रेढ्वम् । अक्रेषि । अक्रेष्वहि । अक्रेष्महि । Desid चिक्रीषते ।

प्रीञ् २ तर्पणे कान्तौ च ।

कान्तिः कामना । प्रीणाति-प्रीणीते ।

2 √prīñ 1 to please, 2. to be cheerful or gay. Kânti means desire. It is conjugated like √krī.

Pre. प्रीणाति A. प्रीणीते । Causa. प्रीणयति । Aor अपिप्रीणत् । Adjec. प्रियः । Noun —प्रियः ।

श्रीञ् ३ पाके ।

3. √śrīñ to cook.

Pre. श्रीणाति । A. श्रीणीते । Causa श्रापयति । Aor. अशिश्रपत् ।

मीञ् ४ हिंसायाम् ।

'हिनु मीना' (२५३०) । प्रमीणाति । प्रमीणीतः । 'मीनातिमिनोति-' (२५०८) इत्यात्वम् । ममौ । मिम्यतुः । ममिथ-ममाथ । मिम्ये । माता । मास्यति । मीयात् । मासीष्ट । अमासीत् । अमासिषाम् । अमास्त ।

4. √mīñ to kill, injure. After an alterant preposition the न is changed to ण by VIII 4 15 S 2530. As प्रमीणाति । प्रमीणीतः . In the Perfect, मी becomes मा by VI 1 50 S. 2508, where otherwise it would have become either ए or ऐ by guna or vriddhi

Parasmai Pre मीनाति । मीनीतः । मीनन्ति । मीनासि । मीनीथः । Per. ममौ । मिम्यतुः । ममिथ or ममाथ । मिम्यथुः । मिम्य । ममौ । मिम्यिव । I Fut. माता । II Fut मास्यति । Impera.

मीनातु। Imper अमीनात्। Poten. मीनीयात्। Bene मीयात्। Aor अमासीत्। अमासिष्टाम्। Causa मापयति। Aor. अमीमपत्। Desid मित्सति। Inten. मेमीयते yañ luk मेमेति। Past Parti Pass. मीतः। Act. मीतवान्। Ger मीत्वा। Nouns — प्रमयः। मयः।

Atmane Pre. मीनीते। मीनाते। मीनीषे। मीने। मीनीवहे। Pre मिम्ये। मिम्यिषे। मिम्ये। मिम्यिवहे। I Fut माता। II Fut. मास्यते। Impera मीनीताम्। Imper. अमीनीत। Poten मीनीत। Bene. मासीष्ट। Aor अमास्त। अमासाताम्। Desid मित्सते।

षिञ् ५ बन्धने।

सिनाति-सिनीते। सिषाय-सिष्ये। सेता।

5. √shiñ to bind, fasten.

Pre सिनाति A सिनीते। Per सिषाय A सिष्ये। I Fut सेता। II Fut सेष्यति A. सेष्यते Desid सिसीषति। Past Parti Pass सितः। Act सितवान्।

स्कुञ् ६ आप्रवणे।

6 √skuñ, to cover, overspread

This root takes श्नु as well as श्ना vikarana by the following sûtra

२५५५। स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च। ३। १। ८२।

चात् श्ना। स्कुनोति-स्कुनुते। स्कुनाति-स्कुनीते। चुस्काव-चुस्कुवे। स्कोता। अस्कौषीत्-अस्कोष्ट।

2555. And there is the affix श्ना after स्तम्भ स्तुम्भ, स्कम्भ or स्कुम्भ 'to hinder', 'to be dull or insensible', 'to support', and स्कु 'to go by leaps', as well as the affix श्नु, when a sârvadhâtuka affix follows, in denoting the agent

As स्तभ्नाति or स्तभ्नोति, स्तुभ्नाति or स्तुभ्नोति, स्कभ्नाति or स्कभ्नोति, स्कुभ्नाति or स्कुभ्नोति, स्कुनाति or स्कुनोति. The first four of these roots are not found in the Dhâtupâtha and are to be found in the sûtras, and hence called Saûtra roots.

6. √skuñ to cover, overspread.

Parasmai. Pre स्कुनोति or स्कुनाति। स्कुनीतः स्कुनन्ति। स्कुनासि। स्कुनामि। Per चुस्काव। चुस्कवतुः। चुस्कविथ or चुस्कोथ। चुस्कुव or चुस्कुविव। I Fut स्कोता। II Fut स्कोष्यति। Impera. स्कुनोतु or स्कुनातु। स्कुनुताम् or स्कुनीताम्। स्कुन्वन्तु। स्कुनु or स्कुनीहि। स्कुनवानि or स्कुनानि। स्कुनाव। Imper अस्कुनात्। अस्कुनीताम्। अस्कुनाः। अस्कुनाम्। Poten स्कुनीयात् or स्कुनुयात्। स्कुनीयाः। स्कुनीयाम्। Bene स्कूयात्। स्कूयास्ताम्। Aor. अस्कौषीत्। अस्कौष्टाम्। Causa स्कावयति Aor. अचुस्कवत्। Desid चुस्कूषति। Inten. चोस्कूयते yañ luk चोस्कोति। Past Parti Pass स्कुतः। Act स्कुतवान्। Ger. स्कुत्वा।

Atm. Pre स्कुनुते or स्कुनीते। स्कुनीषे। Per चुस्कुवे। चुस्कुविषे। चुस्कुविवहे। I Fut स्कोता। II Fut. स्कोष्यते। Impera. स्कुनुताम् or स्कुनीताम्। स्कुन्वाताम् or स्कुनाताम्। स्कुन्वताम्। स्कुनीष्व। स्कुनवै or स्कुनै। स्कुनावहै। Imper अस्कुनीत। अस्कुनाताम् अस्कुनीथाः। अस्कुनि। अस्कुनीवहि। Poten. स्कुनीत or स्कुन्वीत। स्कुनीयाताम्। स्कुनीथाः or स्कुन्वीथाः। स्कुनीय or स्कोषिय। स्कुन्वीय। Bene. स्कोषीष्ट। Aor. अस्कोष्ट अस्कोषाताम्। Desid. चुस्कूषते।

स्तम्भ्वाद्यश्चत्वारः सौत्राः ।

सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः । नलोपः । विष्टभ्नोति–विष्टभ्नाति । अवष्टभ्नोति–अवष्टभ्नाति । अवतष्टम्भ । 'जॄस्तम्भु–' (२२९१) इत्यङ् वा । व्यष्टभत् । व्यष्टम्भीत् । स्तुभ्नोति । स्तुभ्नाति ।

Some say all these five roots are Sautra and mean to obstruct But Mâdhava gives the meaning of 'hindering,' to the first and third i e, √stambhu and √skambhu, of 'cutting into pieces' to √stumbhu the second, and of 'support' to √skumbhu the fourth. All these are Parasmaipadins The nasal is elided

7 √stanbhu (√stunbhu,) 8 √skanbhu, (√skunbhu) to stop, hinder

Pre विष्टभ्नोति or विष्टभ्नाति । The nasal is elided by VI 4. 24 S 415 So with अव, as अवष्टभ्नोति or अवष्टभ्नाति । Per. अवतष्टम्भ । Impera. स्तभ्नुहि or स्तभान । Aor व्यष्टभत् with अङ् of III. 1 58. S. 2291, or व्यष्टम्भीत् ।

7(a) √stunbhu.

Pre. स्तुभ्नोति or स्तुभ्नाति । Impera स्तुभ्नुहि or स्तुभान ।

8 √skambhu.

In the case of स्कम्भु, the स् is changed to ष when the verb is preceded by वि by the following sûtra

२५५६ । वेः स्कभ्नातेर्नित्यम् । ८ । ३ । ७७ ।

वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति । विष्कभ्नाति । स्कुभ्नोति । स्कुभ्नाति ।

2556. ष् is always substituted for the स् of स्कम्भ, after the preposition वि ॥

Thus विष्कभ्नोति or विष्कभ्नाति ।

8(a) √skumbhu. As स्कुभ्नोति or स्कभ्नाति ।

In the case of the above four roots there is this further peculiarity, that in the Imperative Second Per. Sing Parasmai, we have शानच् substituted for श्ना by the following sûtra .—

२५५७ । हलः श्नः शानज्झौ । ३ । १ । ८३ ।

हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान । स्तुभान । स्कभान । स्कुभान । पक्षे 'स्तभ्नुहि,' इत्यादि ।

2557 The affix शानच् is the substitute of श्ना after a root ending with a consonant, when हि follows.

Note —The affix हि is the 2nd person singular of लोट् or the Imperative mood Thus पुषाण 'do thou nourish', गृहाण 'do thou take', from roots पुष् and ग्रह which end with consonants But we have क्रीणीहि 'do thou

buy', here there is no substitution of शानच्, because the root ends with a vowel The repetition of श्ना in the sûtra shows that शानच् is a mere substitute and not an independent affix

Thus from √स्तम्भु—स्तभान, √स्तुम्भु—स्तुभान, √स्कम्भु—स्कभान, √स्कुम्भु—स्कुभान। In the other alternative we have स्तभ्नुहि &c

युञ् ९ बन्धने।

युनाति। युनीते। योता।

9. √yuñ to bind, to fasten

Pre. युनाति A युनीते। I Fut. योता Desid युयूषति।

क्नूञ् १० शब्दे।

क्नूनाति-नीते। क्नविता।

10 √knûñ to make a creaking sound.

Pre. क्नूनाति A. क्नूनीते। Per चुक्नाव। चुक्नुवतुः A. चुक्नुवे। चुक्नुवाते। I Fut. क्नविता। II Fut क्नविष्यति A. क्नविषीष्ट। Aor. अक्नावीत् A. अक्नविष्टः। Desid चुक्नूषति or ० ते।

द्रूञ् ११ हिंसायाम्।

द्रूणाति-द्रूणीते।

11 √drûñ to hurt, injure.

Pre द्रूणाति A द्रूणीते।

पूञ् १२ पवने।

12. √pûñ, to purify The long ऊ is shortened before the शित् affixes by the following sûtra

२५५८। प्वादीनां ह्रस्वः। ७। ३। ८०।

शिति परे। पुनाति-पुनीते। पविता।

2558 A short is substituted for पू &c, before a शित् affix.

Note·—The Pvâdi roots form a subdivision of the Kryâdi class, beginning with पूञ् पवने (12) and ending with प्ली गतौ (32). The ल्वादि roots (VIII. 2 44) are a portion of प्वादि (Nos. 13 to 32) Others hold that upto the end of the Kryâdi class are Pvâdi. Thus ग्रनाति, ग्रनाति, स्तृणाति॥ Those who hold that the Pvâdi roots are upto the end of the Class, explain the non shortening of ज्ञानाति (for ज्ञा would also then become Pvâdi), by saying that the express text of VII 3. 79, substituting long जा prevents the shortening. They say had जा been also shortened, then merely ज substitute would have been enough and not जा, and this ज would have been lengthened in the case of श्यन् by VII 3 101, to form जायते॥

12. √pûñ to purify.

Pre. पुनाति A पुनीते। पुनासि A. पुनीषे। पुनामि A. पुने। Per पुपाव A. पुपुवे। पुपुवतुः A. पुपुविरे। पुपविथ A पुपुविषे। A. पुपुवे पुपुविव। I Fut. पविता। II Fut. पविष्यति A पविष्यते। Impera. पुनातु। पुनीतात्। पुनीष्व। पुनै।

लून् १३ छेदने ।
लुनाति । लुनीते ।

13 √lūn to cut

It is conjugated like the last

Pre लुनाति A लुनीते। Causa. लावयति Aor अलीलवत् । (VII 4 80 S 2577). Past Parti. Pass. लूनः । Ger लूत्वा । Nouns :—लविकम् । लूनिः । लवकः । अभिलाव । लोम । लोतः ।

स्तॄञ् १४ आच्छादने ।

स्तृणाति-स्तृणीते । तस्तार । तस्तरुः । स्तरिता-स्तरीता । स्तृणीयात् । स्तृणीत । आशिषि स्तीर्यात् । 'लिङ्सिचोः-' (२५२८) इति वेट् । 'न लिङि' (२५२९) । इति वृत इटो लिङि दीर्घो न स्यात् । स्तरिषीष्ट । 'उश्च' (२३६८) इति कित्वम् । स्तीर्षीष्ट । सिचि च परस्मैपदेषु' (२३९२) इति न दीर्घः । अस्तारीत् । अस्तारिष्टाम् । अस्तारिष्ट-अस्तरिष्ट-अस्तीर्ष्ट ।

14 √strīñ to cover

Parasmai Pre स्तृणाति । स्तृणाति । स्तृणान्ति । Per तस्तार । तस्तरुः । तस्तरिथ । तस्तरिव । I Fut स्तरिता or स्तरीता । (VII 2 38 S 2391) II Fut स्तरिष्यति or स्तरीष्यति । (VII 2 38 S 2391) Impera. स्तृणातु । स्तृणीहि । स्तृणानि । स्तृणाव । Imper अस्तृणात् । अस्तृणीताम् । अस्तृणाः । अस्तृणाम् । Poten स्तृणीयात् । Bene स्तीर्यात् । Aor अस्तारीत् । अस्तरिष्टाम् । There is no lengthening of इ into ई by S 2391, because of the prohibition of VII 2 40 S 2392 Ca usa. स्तारयति । Aor अतस्तरत् । VII 4 95 S 2566 Desid तिस्तीर्षति or तिस्तरिषति । or तिस्तरीषति । The इट् is optional by VII. 2 41 S 2625 Past Parti Pass स्तीर्णः । Nouns —मणिप्रस्तारः । प्रस्तरः । विस्तारः । विस्तरः । विष्टारः । अवस्तारः । स्तीर्णिः ।

Atmane Pre स्तृणीते । स्तृणीषे । स्तृणे । Per तस्तरे । तस्तरिषे । तस्तरिषे । II Fut स्तरिष्यते or स्तरीष्यते (VII 2 38 S 2391) Impera स्तृणीताम् । स्तृणीष्व । स्तृणै । Imper अस्तृणीत । अस्तृणीयाताम् । Poten स्तृणीत । Bene स्तरिषीष्ट or स्तीर्षीष्ट । The इट् augment is optional by VII 2 42 S 2528 The long ई does not take place in स्तरिषीष्ट, because VII 2 38 S 2391 is set aside by VII 2 39 S 2529 In स्तीर्षीष्ट there is no guṇa, because the affix is कित् by I. 2. 12 S. 2368] Aor अस्तीर्ष्ट or अस्तरिष्ट or अस्तरीष्ट । The इट् is optional by S 2528. The lonthening of इ takes place by VII 2. 38 S. 2391

कॄञ् १५ हिंसायाम् ।
कृणाति-कृणीते । चकार-चकरे ।

15. √krīñ to injure, hurt, kill.

It is conjugated like the last,

Pre. कृणाति । A. कृणीते । Per. चकार । A. चकरे । चकरुः । चकरः ।

वॄञ् १६ वरणे ।

वृणाति-वृणीते । ववार-ववरे । वरिता-वरीता । आशिषि 'उदोष्ठ्यपूर्वस्य' (२४९४) । वूर्यात् । वरिषीष्ट-वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरिष्ट-अवरीष्ट-अवूर्ष्ट ।

16 vṛīñ to choose, select,

Pre वृणाति । A. वृणीते । Per ववार । A ववरे । I Fut वरिता or वरीता । II Fut वरि (or री) ष्यति । A. वरि (or री) ष्यते । Impera. वृणातु । A वृणीताम् । Imper अवृणात् A अवृणीत Poten. वृणीयात् । A वृणीत । Bene वूर्यात् । The ऋ is changed to उ by VII 1 102. S 2494, then र् is added by I 1 51 S. 70, and उ lengthened by VIII. 2. 77 S 354 A वरिषीष्ट or वूर्षीष्ट when there is no इट् by the option of VII 2 42, S 2528, then the affix is कित् by S 2368, and ऋ is changed to उ by S. 2494 When there is इट् it is not lengthened because of S 2529 Aor अवारीत् । D अवारिष्टाम् । A. अवरि (or री) ष्ट or अवूर्ष्ट । Causa वारयति Aor. अवीवरत् । Desid वुवूर्षति or विवरि (री) (or री) षति । Inten वेवूर्यते yañ luk वावर्ति । Past Parti Pass. वूर्णः । Act वूर्णवत् । Noun —वूर्णिः ।

धूञ् १७ कम्पने :

धुनाति-धुनीते । दुधविथ-दुधोथ । दुधुविव । धोता-धविता । 'स्तुसुधूञ्भ्यः-' (२३८५) इतीट् । अधावीत्-अधविष्ट-अधोष्ट ।

17. √dhūñ to shake, agitate

Parasmai Pre धुनाति । Per दुधाव । दुधुवतुः । दुधविथ । दुधुविव।। दुधुविम । I Fut. धोता or धविता । II Fut धो (or धवि) ष्यति । Impera. धुनातु । धुनीतात् । Imper. अधुनात् । Poten. धुनीयात् । Bene धूयात् । Aor अधावीत् । अधाविष्टाम् । The इट् is compulsory under S 2385, Causa धूनयति । Aor अदूधुनत् । Desid दुधूषति । Inten. दोधूयते । yañ luk दोधोति । Past Parti Pass धूतम् । Ger. धूत्वा । Noun — धूतम् ।

Atmane Pre धुनीते । Per दुधुवे । दुधुविषे । दुधुविढ्वे (or ध्वे) । दुधुविवहे । II Fut. धो (or धवि) ष्यते । Impera धुनीताम् । Imper अधुनीत । Poten धुनीत । Bene. धो (or धवि) षीष्ट । Aor. अधो (or धवि) ष्ट । Desid दुधूषते ।

। अथ बध्नात्यन्ताः परस्मैपदिनः ।

Now all the roots upto √badha are Parasmaipadins

शॄ १८ हिंसायाम् ।

'शॄदॄप्रां ह्रस्वो वा' (२४९५) इति ह्रस्वपक्षे यण् । अन्यदा 'ऋच्छत्यॄताम्' (२३८३) इति गुणः । शश्रतुः-शशरतुः । 'श्र्युकः किति' (२३८१) इति निषेधस्य क्रादिनियमे ; बाधः । शशरिव-शश्रिव । शरिता-शरीता । शृणीहि । शीर्यात् । अशारिष्टाम् ।

18 √śṝ to hurt, injure, kill,

Pre शृणाति शृणीतः । शृणासि । शृणामि । Per शशार । शश्र (or शशर) तुः । शश्रुः or शशरुः । शशरिथ । शश्र । शशार or शशिर । शश्रिव or शशरिव The non पित् terminations being कित् by 1 2 5. S 2242 there is optional shortening of the long ॠ by VII 4 12. S 2495 When there is shortening, the ऋ is changed to र or a semi-vowel. In the other alternative, there is guna by S. 2383. As शशॄ+अतुस्=शश्रतुः । or शशॄ+अतुस्=शशर्+अतुः=शशरतुः ।

The sūtra 2381 would have prohibited इट् before कित् affixes i. e., non-पित् affixes. But it is set aside by the niyama rule of VII. 2. 13. S. 2293 Therefore शशॄ+इट्+व=शश्रिव. I Fut शरिता or शरीता । II Fut. शरि (or री) ष्यति । Impera. शृणातु । शृणीतात् । शृणीहि । Imper. अशृणात् । अशृणीताम् । अशाः । अशृणात् । अशृणीत । Poten. शृणीयात् । शृणीयाताम् । Bene.

शीर्यात् । शीर्यास्ताम् (VII 1 100 S. 2390), Aor अशारीत् । अशारिष्टाम् । (No lengthening of ऋ, See VII. 2 40. S 2392) Causa. शारयति । Aor अशीशरत् । Desid. शिशरि (or री) षति or शिशीर्षति । Inten. शेशीर्यते yañ luk शाशर्ति । Nouns —शारः । नीशार । शारक । शराः । किशारः । शरः । शरीर । शरत् । शरद्विजः । शारदिक । शारद । शरदिकः । शारदका । परशुः । परशव्यं । पारशवत् । पराशरः ।

पॄ १९ पालनपूरणयोः ।

पप्रतु –पपरतुः । आशिषि पूर्यात् ।

19 √prī 1. to nourish, 2 to fill.

Pre पृणाति । Per पपार । पपरतुः । पप्रतुः । I Fut. परि (or री) ता । II परि (or री) ष्यति । Impera पृणातु । Imper अपृणात् । Poten पृणीयात् । Bene. पूर्यात् । (S. 2494,) Aor. अपारीत् । अपारिष्टाम् । Causa पारयति । Aor अपीपरत् । Desid. पिपरि (or री) षति or पुपूर्षति । Inten पोपूर्यते । yañ luk पापर्ति । Past Parti Pass पूर्तः । Act. पूर्तवान् ।

वॄ २० वरणे ।

'भरणे' इत्येके ।

20 √vrī to choose, elect Some say it means 'to support'

It is conjugated like √vrīñ.

Pre, वृणाति ।

भॄ २१ भर्त्सने ।

भरणेऽप्येके ।

21 √bhrī to blame, censure It is conjugated like √vrīñ It means also 'to support'

Pre भृणाति । Per बभार । Nouns —भरः । भरित्रं ।

मॄ २२ हिंसायाम् ।

मृणाति । ममार ।

22. √mrī to kill, to injure It is conjugated like √vrī.

Pre मृणाति । Per. ममार ।

दॄ २३ विदारणे ।

ददरतुः । दद्रुः ।

23 √drī to pierce

Pre. दृणाति । Per ददार । ददरतुः or दद्रतुः । ददरुः or दद्रुः । Causa दरयति or दारयति । Aor अददरत् । Nouns —दरः । दरी । पुरंदरः । नगदरः । दारः दरत् । दृषद् ।

जॄ २४ वयोहानौ ।

'झॄ' इत्येके । 'धॄ' इत्यन्ये ।

24. √jrī to grow old, to wither. Some read it as √झॄ jhhrī, others as √धॄ dhrī

Pre जृणाति ।

24(a). √dhrī, according to Maitreya.

Pre. धृणाति ।

नॄ २५ नये ।

25. √nṝ to lead, to go.

Pre. नृणाति । Past Parti Pass नीर्णः । Act नीर्णवान् । Nouns —नरः । ना । नारी ।

कॄ २६ हिंसायाम् ।

26. √kṝ to injure, hurt, kill.

Pre. कृणाति ।

ॠ २७ गतौ ।

ऋणाति । अरांचकार । अरिता–अरीता । आर्णीत् । आर्णीतां । ईर्यात् । आरिष्टाम् ।

27. √ṝ to go, move

Pre ऋणाति । ऋणीतः । ऋणासि । ऋणामि । Per अरांचकार । I Fut अरिता or अरीता । II Fut अरिष्यति or अरीष्यति । Impera ऋणातु । ऋणीताम् । ऋणीहि । ऋणानि । Imper आर्णात् । आर्णीताम् । आर्णाः । आर्णाम् । आर्णीव । Poten ऋणीयात् । ऋणीयाताम् । Bene ईर्यात् । ईर्यास्ताम् । Aor आरीत् । आरिष्टाम् । Causa अारयति । Aor. आभयामरिरत् । Desid. अरिरिषति or अरिरीषति or ईर्षिषति । Past Part Pass अर्णीर्णः । Act. अर्णीर्णवान् । Ger ईर्त्वा ।

गॄ २८ शब्दे ।

28. √gṝ to sound, to call out, invoke, proclaim

Pre गृणाति । Per. जगार । Inten जेगिल्यते । yaṅ luk जागर्ति । D जागीर्त्तः ।

ज्या २९ वयोहानौ ।

'ग्रहिज्या–' (२४१२) ।

29. √jyâ to grow old, to decay Thus ज्या + ना + ति = जि + ना + ति (vocalisation by S 2412.) Now the following sûtra lengthens the इ, which however again becomes short by S 2558.

२५५९ । हलः । ६ । ४ । २ ।

अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घे कृते । 'प्वादीनां ह्रस्वः' (२५५८) । जिनाति । जिज्यौ । जिज्यतुः ।

2559. The long vowel is substituted for a vocalised half-vowel ऋ, इ and उ at the end of a stem, when it is preceded by a consonant which is a portion of the stem

Thus जि + ना + ति = जी + ना + ति = जि + ना + ति (shortened by S 2558 as it belongs to Pvâdi class)

Pre. जिनाति । जिनीतः । जिनासि । जिनामि । जिनीवः । Per जिज्यौ । जिज्यतुः । जिज्यिथ or जिज्याथ । जिज्यिव । I Fut ज्याता । II Fut. ज्यास्यति । Impera. जिनातु । जिनीताम् । जिनीहि । जिनानि । जिनाव । Imper अजिनात् । अजिनीताम् । अजिनाः । अजिनाम् । अजिनीव । Poten. जिनीयात् । जिनीयाताम् । जिनीयाः । जिनीयाम् । Bene. जीयात् । जीयास्ताम् । Aor. अज्यासीत् । अज्यासिष्टाम् । Causa ज्यापयति । Aor अजिज्यपत् । Desid. जिज्यासति । Inten जेजीयते yaṅ luk जाज्याति । Past Parti. Pass. जीनः । Ger. जीत्वा । Nouns :—प्रज्याय । ज्यानिः ।

री ३० गतिरेषणयोः ।

रेषण वृकशब्द ।

30 √ri 1 to go 2 to howl. The word रेषण means the howling of a wolf

Pre. रिणाति । रिणीतः । रिणासि । रिणामि । Per. रिराय । रिरियुः । रिरयिथ or रिरेथ । रिरयिव । Impera रिणातु । रिणीहि । रिणानि । Imper अरिणात् । अरिणीताम् । अरिणाः । अरिणाम् । Poten. रिणीयाताम् । Bene. रीयात् । रीयास्ताम् । Aor. अरैषीत् । अरैष्टाम् । Causa रेपयति । Aor अरीरपत् । Desid. रिरीषति । Inten. रेरीयते ।

ली ३१ श्लेषणे ।

'विभाषा लीयतेः' । (२५०९) इत्येज्विषये आत्त्व वा । ललौ–लिलाय । लाता–लेता ।

31 √li to adhere, to melt The ली is optionally treated as ला under circumstances mentioned in S 2509 As First Fut लाता or लेता ॥ Per. ललौ (from ला), or लिलाय ।

Pre लिनाति । Per. ललौ or लिलाय । लिल्यतु' । ललाथ or लिलेथ or लिलयिथ लिल्यिव । I Fut. लाता or लेता । Impera. लिनातु । Imper. अलिनात् । Poten. लिनीयात् ।

व्ली ३२ वरणे ।

व्लिनाति ।

32 √vli, or √bli, 1 to go 2 to choose. 3. to support

Pre व्लिनाति । व्लिनीत । व्लिनासि । व्लिनामि । Per विव्लाय । विव्लियतुः । विव्लेथ or विव्लयिथ । विव्लियिव । I Fut व्लेता । II Fut व्लेष्यति । Impera. व्लिनातु । व्लिनीहि । व्लिनानि । Imper अव्लिनात् । Poten. व्लिनीयात् । Bene व्लीयात् । Aor अव्लैषीत् । अव्लैष्टाम् । Causa व्लेपयति । Aor. अविव्लिपत् । Desid विव्लीषति । Inten वेव्लीयते । Past Parti Pass व्लीनः । Ger व्लीत्वा ।

प्ली ३२ क । गतौ ।

वृत् । ल्वादयो वृत्ताः । प्वादयोऽपीत्येके ।

32(a) √pli to go

It is conjugated like √bli

Pre. प्लिनाति ।

Vrit—End Here end the Luâdi roots According to others Pvâdi also end here

व्री ३३ वरणे ।

33 √vri to select

Pre व्रीणाति । व्रीणीतः । व्रीणासि । व्रीणामि । Per. विव्राय । विव्रियतुः । विव्रेथ । विव्रियिव । I Fut व्रेता । II Fut व्रेष्यति । Impera व्रीणातु or व्रीणीतात् । व्रीणीहि । व्रीणानि । Imper अव्रीणात् । अव्रीणाताम् । अव्रीणाः । अव्रीणाम् । Poten व्रीणीयात् । Bene व्रीयात् । Aor अव्रैषीत् । अव्रैष्टाम् । Causa. व्रापयति । Aor अविव्रपत् । According to Swami व्रेपयति । Desid. विव्रीषति । Inten वेव्रीयते yañ luk वेव्रेति ।

भ्री ३४ भये ।

'भरे' इत्येके ।

34 √bhrî to fear, to support

It is conjugated like the last

Pre भ्रीणाति ।

क्षीष् ३५ हिंसायाम् ।

एषां त्रयाणां ह्रस्वः । केषांचिन्मते तु न ।

35. √kshîsh to injure, kill. The three roots व्री, भ्री and क्षीष् are shortened. According to the opinion of others they are not The root क्षीष् has an indicatory ष, and consequently takes the affix अङ्, as क्षीयः ।

Pre क्षीणाति । Per चिक्षाय । Act क्षीतवान् । Ger. क्षीत्वा । Adjct. क्षीयः ।

ज्ञा ३६ अवबोधने ।

'ज्ञाजनोर्जा' (२५११) । जानाति । दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः ।

36. √jñâ to know Thus ज्ञा + श्ना + ति = जा + ना + ति (S. 2511). As the substitute जा is taught with a long आ in the rule S 2511, it is not shortened by the Pvâdi rule VII. 3 80 S 2558.

Pre जानाति । जानीतः । जानन्ति । जानासि । जानामि । जानीवः । Per. जज्ञौ । जज्ञतुः । जज्ञिथ or जज्ञाथ । जज्ञिव । I Fut. ज्ञाता । II Fut ज्ञास्यति । Impera जानातु । जानीहि । जानानि । Imper अजानात् । अजानीताम् । अजानाम् । Poten जानीयात् । Bene ज्ञायात् or ज्ञेयात् । ज्ञायास्ताम् or ज्ञेयास्ताम् । Aor अज्ञासीत् । अज्ञासिष्टाम् । Causa ज्ञापयति । Aor. अजिज्ञपत् । Desid. जिज्ञासते । Inten जाज्ञायते । yañ luk जाज्ञाति । Past Parti. Pass. ज्ञप्तः or ज्ञापितः । Nouns —ज्ञा । प्राज्ञा ।

बन्ध ३७ बन्धने ।

बध्नाति । बबन्धिथ बबन्ध । बन्द्धा । बन्द्धारौ । भन्त्स्यति । बधान । अभान्त्सीत् । 'पूर्वत्रासिद्धम्' (१२) इति भष्भावात्पूर्वं 'झलो झलि' (२२८१) इति सिज्लोपः । प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात् । अबान्द्धाम् । अभान्त्सुः ।

37. √bandha to bind, fasten.

Pre बध्नाति । बध्नीतः । बध्नासि । बध्नामि । The root nasal is elided by VI 4 24 S 415 Per. बबन्ध । बबन्धतु । बबन्धिथ । बबन्ध । बबन्धिव । I Fut बन्द्धा । Thus बन्ध् + ता = बन्ध + धा (VIII 2. 40 S. 2280) = बन्द् + धा (VIII. 4. 53 S 52) = बन्द्धा or बन्धा (VIII. 4 65. S 71) D बन्द्धारौ । II Fut भन्त्स्यति । Thus बन्ध् + स्यति = भन्ध् + स्यति (VIII 2 37 S 326) = भन्त् + स्यति (VIII 4 55 S. 121) Impera बध्नातु । बध्नीतात् । बधान (III. 1. 83 S. 2557) बध्नाम । Imper अबध्नात् । अबध्नीताम् । अबध्नाः । अबध्नीतम् । अबध्नीत । अबध्नीव । Poten. बध्नीयात् । Bene बध्यात् । Aor अभान्त्सीत् । अबान्द्धाम् । अभान्त्सुः । The vriddhi is by VII. 2 3 S 2263 In the dual we have अबान्ध् + स् + ताम् । By the rule of पूर्वत्रासिद्धम् (S 12) before the भ change of ब, we apply 2281 the स् is elided as it is between two jhal letters (VIII 2 26 S 2281) = अबान्ध् + ताम् । Now we cannot consider ताम् as स्ताम् for the purposes of changing ब to भ by S. 326 The rule प्रत्ययलोपे प्रत्ययलक्षणम् । (I. 1 62. S 262) does not apply, for the elision of सिच् is asidha for the purposes of that rule of pratyaya lakshaṇa. Thus we get अबान्धाम् । Cause बन्धयति । Aor. अबबन्धत् । Desid. बिभन्त्सति । Inten.

बाबध्यते yaṅ luk बाबन्धि । Past Parti Pass. बद्धः । Nouns —बधिरः । बन्धुः । बन्धुरः बन्धः ।

वृङ् ३८ संभक्तौ ।

वृणीते । वव्रे । ववृषे । ववृढ्वे । वरिता-वरीता । अवरिष्ट-अवृत ।

38 √vriṅ to divide.

Compare Svâdi वृञ् ।

Pre. वृणीते । वृणाते । वृणीषे । वृणे । वृणीवहे । Per वव्रे । ववृषे । ववृढ्वे । वव्रे । ववृवहे । I Fut वरिता or वरीता । II Fut वरिष्यते or वरीष्यते । Impera वृणीताम् । वृणाताम् । वृणीष्व । वृणै । Imper अवृणीत । अवृणाताम् । अवृणीथाः । अवृणि । Poten वृणीत । वृणीयाताम् । Bene वृषीष्ट or वरिषीष्ट । Aor अवरिष्ट or अवरीष्ट or अवृत । अवृढ्वम् । (2) अवरिढ्वम् । (3) अवरीढ्वम् । (4) अवरिढ्वम् । (5) अवरीढ्वम् । Aor अवारि । (2) अवृत । (3) अवरिष्ट । (4) अवरीष्ट । (5) अवारिष्ट । In the dual the five forms of the Active, plus अवारिढ्वम् and अवारिष्वम् । In all seven Causa वारयति । Aor. अवीवरत् । Desid. वुवूर्षति or विवरिषति or विवरीषति । Inten वेव्रीयते yaṅ luk वर्वर्ति Nouns —वर्या । वार्या । वरेण्यः ।

श्रन्थ ३९ विमोचनप्रतिहर्षयोः ।

इतः परस्मैपदिनः । श्रथ्नाति । 'श्रन्थिग्रन्थि–' इत्यादिना कित्त्वपक्षे एत्वाभ्यासलोपावप्यत्र वक्तव्यौ इति हरदत्तादयः । श्रेथतुः–श्रेथुः । इदं कित्त्वं णित्यपीति सुधाकरमते । श्रेथिथ । अस्मिन्नपि पक्षे णलि । शश्राथ । उत्तमे तु शश्राथ-शश्रथेति माधवः । तत्र मूलं मृग्यम् ।

39 √sranth 1, to loosen, libera..., 2 to delight repeatedly. From this forward are Parasmaipada roots According to Haradatta, there is एत्व and elision of the reduplicate in the Perfect, when the affixes are treated as कित् under the *Rule* mentioned in S 2397 See Padamanjari on I 2 6, where Haradatta says "It must be stated that there is also एत्व and elision of the reduplicate" According to the opinion of Sudhâkara this कित्त्व applies to the णित् terminations of the Perfect also as श्रेथिथ In this view the णल् (3rd S and 1st S.) is also कित् । As शश्राथ । In the 1st S Mâdhava has given two forms शश्राथ and शश्रथ । The authority for it is questionable When कित्, the nasal is elided by VI 4 24 S. 415. According to Mâdhava the कित् rule is optional.

Pre, श्रथ्नाति । श्रथ्नासि । श्रथ्नीथः । श्रथ्नीमः । Per. शश्रन्थ or शश्राथ । श्रेथतुः or शश्रन्थतुः । श्रेथुः । शश्रन्थिथ or श्रेथिथ । श्रेथथुः । श्रेथ । शश्रन्थ or शश्राथ or शश्रथ । श्रेथिव । श्रेथिम । I Fut श्रन्थिता । II Fut. श्रन्थिष्यति । Impera श्रथ्नातु । श्रथ्नीतात् । श्रथान । (III 1 83 S. 2557) श्रथ्नानि । Imper. अश्रथ्नात् । अश्रथ्नीताम् । अश्रथ्नाः । अश्रथ्नीव । Poten श्रथ्नीयात् । श्रथ्नीयाताम् । Bene श्रथ्यात् । श्रथ्यास्ताम् । Aor. अश्रन्थीत् । अश्रन्थिष्टाम् । अश्रन्थिषुः । Pass श्रथ्नीते । (The न is elided by the vârtika under III 1 88 S. 2771). Aor अश्रन्थिष्ट । Causa श्रन्थयति । Aor अशश्रन्थत् । Desid. शिश्रन्थिषति । Inten शाश्रथ्यते yaṅ luk शाश्रन्थीति or शाश्रन्ति । Ger. श्रन्थित्वा or श्रथित्वा । Nouns —श्रन्थना । प्रश्रथः । हिमश्रथः ।

मन्थ ४० विलोडने ।

46. √kusha to tear, extract, pull or draw out

The इट् augment is optional, if the root is preceded by निर् by the following sûtra

२५६० । निरः कुषः । ७ । २ । ४६ ।

निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता-निष्कोष्टा । निरकोषीत्-निरकुक्षत् ।

2560 A valâdi-ârdhadhâtuka affix gets optionally the augment इट्, after कुष् when it is preceded by निर्।

As निष्कोष्टा or निष्कोषिता, निष्कोष्टुम् or निष्कोषितुम्, निष्कोष्टव्यम् or निष्कोषितव्यम्। But only कोषिता, कोषितुं, कोषितव्यम् without निर्।

Pre कुष्णाति । कुष्णासि । कुष्णामि । कुष्णीवः । Per चुकोष । चुकुषतुः । चुकोषिथ । चुकुषिव । Impera कुष्णातु । कुषाण । Imper अकुष्णात् । Poten कुष्णीयात् । Bene कुष्यात् । Pass कुष्यति or कुष्यते । Aor अकोषि । Nouns —कुषुः । कुषिः । कोषेयकः । कोषः । कोषेयः ।

46. √kusha, preceded by निर्

Pre निष्कुष्णाति । Per निश्चुकोष । I Fut निष्कोषिता or निष्कोष्टा । II Fut निष्कोषिष्यति or निष्कोक्ष्यति । Aor निरकोषीत् or निरकुक्षत् । Desid. निश्चुकोषिषति or निश्चुकुक्षति । Past Parti Pass निष्कुषितम् ।

क्षुभ ४७ संचलने ।

'क्षुभ्नादिषु च' (७९२) । क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभाण ।

47 √kshubha to shake, tremble The vikarana ना is not changed to णा because of the prohibition under VIII 4 39 S 792 This root is conjugated in the Bhvâdi and Divâdi also

Pre. क्षुभ्नाति । क्षुभ्नीतः । Per चुक्षोभ । चुक्षुभतुः । चुक्षोभिथ । चुक्षुभिव । I Fut. क्षोभिता । II Fut क्षोभिष्यति । Impera क्षुभ्नातु । क्षुभाण । क्षुभ्नानि । Imper. अक्षुभ्नात् । Poten क्षुभ्नीयात् । Bene. क्षुभ्यात् । Aor. अक्षोभीत् । अक्षोभिष्टाम् । Desid चुक्षुभिषति ।

णभ ४८ तुभ ४९ हिंसायाम् ।

नभ्नाति । तुभ्नाति । 'नभते' 'तोभते' इति शपि । 'नभ्यति' 'तुभ्यति' इति श्यनि ।

48 √nabha, 49 √tubha to hurt, injure. These two roots are conjugated in the Bhvâdi and Divâdi also

Pre नभ्नाति । With प्र, we have प्रणिनभ्नाति or प्रनिनभ्नाति । VIII. 4. 18. S 2232. Aor. अनभीत् or अनाभीत् ।

49 √tubha.

Pre तुभ्नाति ।

क्लिशू ५० विबाधने ।

'स्नात्' (११२) इति णत्वनिषेधः । क्लिश्नाति । क्लेशिता - क्लेष्टा । अक्लेशीत्-अक्लिक्षत् ।

50 √klisu to torment, afflict—Thus क्लिश्+ना+ति। Here न is not changed to a nasal homogenous with श namely ञ् because of the prohibition of VIII. 4. 44. S 112.

Pre क्लिश्नाति । क्लिश्नीतः । क्लिश्नासि । क्लिश्नामि । Per चिक्लेश । चिक्लिशतुः । चिक्लिशिथ or चिक्लेष्ठ । चिक्लिशिव or चिक्लिश्व । I Fut क्लेष्टा or क्लेशिता । II Fut. क्लेशिष्यति or क्लेक्ष्यति । Impera क्लिश्नातु ॥ क्लिशान । क्लिश्नानि । Imper. अक्लिश्नात् । Poten क्लिश्नीयात् । Bene क्लिश्यात् । Aor अक्लेशीत् or अक्लिक्षत् । अक्लेशिष्टाम् । Causa क्लेशयति Aor । अचिक्लिशत् । Desid चिक्लेशिषति, चिक्लिशिषति or चिक्लिक्षति । Inten चेक्लिश्यते . Past Parti Pass क्लिष्ट or क्लिशितः Ger । क्लिशित्वा or क्लिष्ट्वा ।

अश ५१ भोजने ।

अश्नाति । आश ।

51 √asa to eat.

Pre अश्नाति । अश्नीतः । अश्नासि । अश्नामि । Per आश । आशिथ । आशिव । I Fut अशिता । II Fut अशिष्यति । Impera अश्नातु । अशान । अश्नानि । Imper आश्नात् । आश्नाः । आश्नाम् । Poten अश्नीयात् । Bene अश्यात् । Aor. आशीत् । आशिष्टाम् । Causa आशयति । Aor आशशत् । Desid अशिशिषति । Inten अशाश्यते । yaṅ luk आशिष्ट । See vârtika under S 2630 Per Parti. Parasmai आश्वान् । (III 2 109 S 3098)

उध्रस ५२ उञ्छे ।

उकार इत् । ध्रस्नाति । उकारो धात्ववयव इत्येके । उध्रसांचकार ।

52 √udhrasa to throw or toss up. 2 to glean The उ is indicatory. Kshîraswâmi says the उ is part of the root Then the Perfect is उध्रसांचकार । Pre उध्रस्नाति । Aor औध्रस्नात् ।

Pre ध्रस्नाति । Per. दध्रास । दध्रसिथ । I Fut ध्रसिता । II Fut ध्रसिष्यति । Impera ध्रस्नातु । ध्रसान । Imper. अध्रस्नात् । Poten ध्रस्नीयात् । Bene ध्रस्यात् । Aor अध्रासीत् । or अध्रसीत् । Causa ध्रासयति । Aor अदिध्रसत् । Desid दिध्रसिषति । Inten दाध्रस्यते yaṅ luk दाध्रस्ति । Past Parti Pass ध्रस्तं । Ger. ध्रसित्वा । or ध्रस्त्वा ।

इष ५३ आभीक्ष्ण्ये ।

पौनः पुन्यं भृशार्थो वा आभीक्ष्ण्यम् । इष्णाति । 'तीषसह-' (२३४०) इत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः । एषिता । वस्तुतस्तु इष्णातेरपि इड्विकल्पो उचितः । तथा च वार्तिकम्— '* इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः *' इति ।

53 √isha to cause to move quickly, let fly, cast 2 to fly off, escape, 3 to strike, smite

The word âbhîkshṇyam means continued repetition or intensity. See III. 2 81. The continuity refers to the action in general The √isha mentioned in VII. 2. 48 S 2340 does not refer to the present root, because that root is recited there along with सह and therefore refers to the Tudâdi root इष whose vikarana is श and not to this root or to the √isha of the Divadi class. This is what the Achâryas say. Therefore the इट् augment is not optional in the case of the present root Thus the 1st Future is एषिता according to their opinion. But as a matter of fact, the present root also takes optionally इट् because of the following.

Vârtika The इट् is prohibited in the 3rd Singular after the √isha of the Divâdi class only (See Padamanjari on VII 2 48).

Pre. इष्णाति । इष्णीतः । Per इयेष । ईषतुः । ईषुः । इयेषिथ । इयेष । ईषिव । I Fut. एषिता or एष्टा । II Fut एषिष्यति । Impera इष्णातु । इषाण । इष्णानि । Imper. ऐष्णात् । ऐष्णीताम् । ऐष्णाः । Poten इष्णीयात् । Bene इष्यात् । Aor ऐषीत् । Condi. ऐषिष्यत् । Causa. एषयति । Aor. मा भवानिषिषत् । Desid. एषिषिषति । Past Parti. Pass इषितः । Ger एषित्वा ।

विष ५४ विप्रयोगे ।

विष्णाति । वेष्टा ।

54. √visha to separate, to disjoin

Pre विष्णाति । Per विवेष । विवेषिथ । विविषिव । I Fut. वेष्टा । Impera विष्णातु । विषाण । विष्णानि । Imper अविष्णात् ।

प्रुष ५५ प्लुष ५६ स्नेहनसेचनपूरणेषु ।

प्रुष्णाति । प्लुष्णाति ।

55 √prusha, 56 √plusha, 1 to become wet or moist, 2. to pour out, sprinkle, 3. to fill.

Pre प्रुष्णाति । Per पुप्रोष । पुप्रोषिथ । पुप्रुषिव । II Fut प्रोषिष्यति । Impera. प्रुष्णातु । प्रुषाण । प्रुष्णानि । Imper अप्रुष्णात् । Poten प्रुष्णीयात् । Bene. प्रुष्यात् । Aor अप्रोषीत् । Causa प्रोषयति । Aor अपुप्रुषत् । Desid पुप्रु (or प्रो) षिषति । Inten. पोप्रुष्यते yaṅ luk पोप्रोष्टि । Past Parti Pass प्रुषितः । Ger. प्रोषित्वा or प्रुषित्वा ।

56 √plusha. It is conjugated like the last

Pre. प्लुष्णाति ।

पुष ५७ पुष्टौ ।

पोषिता ।

57. √pusha, to nourish, to support

Pre. पुष्णाति । पुष्णीतः । Per पुपोष । पुपोषिथ । I Fut पोषिता । Impera पुषाण । Imper. अपुष्णात् । Poten पुष्णीयात् ।

मुष ५८ स्तेये ।

मोषिता ।

58. √musha to steal

Pre मुष्णाति । I Fut मोषिता । Desid. मुमुषिषति । Ger. मुषित्वा ।

खच ५९ भूतप्रादुर्भावे ।

भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खच्नाति । वान्तोऽयमित्येके ।

59 √khacha, to comeforth, appear, to be born again.

Some say the root is खव ।

Pre खच्नाति । Per. चखाच । चखचिथ । चखचिव । I Fut. खचिता । II Fut. खचिष्यति । Impera. खच्नातु । चखान । खच्नानि । Imper अखच्नात् । Poten. खच्नीयात् । Bene खच्यात् । Aor अखचीत् or अखाचीत् । Causa. खाचयति । Aor. अचीखचत् । Desid. चिखचिषति । Inten. चाखच्यते । yaṅ luk चाखक्ति । Past Parti. Pass. खचितः । Ger. खचित्वा ।

59*a*. /khava

Before कित् and ङित् affixes the व is changed to ऊ by the following sûtra.

२५६१ । छ्वोः शूडनुनासिके च । ६ । ४ । १९ ।

सतुक्कस्य छस्य वस्य च क्रमात् 'श' 'ऊठ्' इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । खौनाति । चखाव । खविता । श्नाभ्यः परत्वाद्धलि कृते हलन्तत्वाभावान्न शानच् । खौनीहि ।

2561. For छ् (including the augment तुक्) is substituted श्, and for व is substituted ऊठ्, before an affix beginning with a Nasal, as well as before क्वि and jhalâdi कित् and ङित् affixes (VI. 4. 15).

Thus खव्+ना+ति=ख+ऊठ्+ना+ति=खौनाति । Pre. खौनाति । Per चखाव । I Fut खविता । Impera. खौनातु । खौनीहि । The affix शानच् required by III. 1. 83 S. 2557 is not added here because when ऊठ् substitution takes place, the root no longer ends in a consonant Imper. अखौनात् । Poten खौनीयात् । Bene खूयात् ।

हेठ ६० च ।

हुत्वम् । हेठ्णाति ।

60 √hedha cha, to be born, &c.

Pre. हेठ्णाति । The ढ is changed to ठ् and न to ण.

ग्रह ६१ उपादाने ।

स्वरितेत् । 'ग्रहिज्या–' (२४१२) । गृह्णाति–गृह्णीते ।

61. √graha, to seize This root is svaritet The र is vocalised into ऋ by S 2412. Thus we have P गृह्णाति । A. गृह्णीते । The augment इट् is lengthened by the following sûtra

२५६२ । ग्रहोऽलिटि दीर्घः । ७ । २ । ३७ ।

एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि । ग्रहीता । लिटि तु जग्रहिथ । गृह्यात् । ग्रहीषीष्ट । 'ह्म्यन्त–' (२२९९) इति न वृद्धिः । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत ।

2562 The augment इट् added to the valâdi ârdhadhâtuka affixes, becomes lengthened, except in the Personal endings of the Perfect, after the root ग्रह ॥

As ग्रहीता, ग्रहीतुम्, ग्रहीतव्यम् ॥ Why not in the Perfect? Observe जगृहिव जगृहिम ॥ The lengthening takes place of the इट् taught in VII. 2. 35, and does not refer to the चिण्वद् इट् of VI. 4. 62, as ग्राहिता, ग्राहिष्यते ॥

61. √graha, to seize, take

Parasmai. Per. गृह्णाति । गृह्णीतः । गृह्णासि । गृह्णामि । Pre. जग्राह । जगृहतुः । जगृहुः । जग्रहिथ । जगृहथुः । जग्राह or जग्रह । जगृहिव । I Fut ग्रहीता (S. 2562) II Fut. ग्रहीष्यति (S. 2562) Impera. गृह्णातु । गृहाण । गृह्णानि । Imper अगृह्णात् । अगृह्णीताम् । Poten. गृह्णीयात् । गृह्णीयाताम् । गृह्णीयुः । Bene. गृह्यात् । गृह्यास्ताम् । Aor. अग्रहीत् । अग्रहीष्टाम् । The vridhi is prohibited because the root ends in ह.

See S. 2299 Desid जिघृक्षति । Inten जरीगृह्यते । yañ luk जाग्रहि । D जागृढः । Another form is जाग्रहीति । 2nd S जाग्रक्षि । 1st जाग्रह्मि । D जागृह्वः । Nouns — प्रगृह्यम् । गृहकाः । गृह्यः । ग्राहः । ग्रहः । गृहं ।

Atm. Pre गृह्णीते ।।गृह्णीषे । गृह्णे । गृह्णीवहे । Per. जगृहे । जगृहाते । जगृहिषे । जगृहिढ्वे or ध्वे जगृहिवहे । II Fut ग्रहीष्यते । Impera गृह्णीताम् । गृह्णाताम् । गृह्णीध्वम् । गृह्णै । Imper अगृह्णीत । अगृह्णाताम् । Poten गृह्णीत । गृह्णीयाताम् गृह्णीरन् । Bene. ग्रहीषीष्ट । ग्रहीषीयास्ताम् । Aor. अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत । Desid. जिघृक्षते ।

61. √graha, yañ luk

Pre जाग्रहीति or जाग्राढि । जागृढः । जाग्रक्षि । जाग्रह्मि । जागृह्वः । Per जाग्रहाञ्चकार । I Fut जाग्रहीता । II Fut जाग्रहीष्यति । Impera. जाग्राढु । जागृढाम् । जागृढि । Imper अजाग्रट् । अजागृढाम् । अजागृहुः । अजाग्रट् । अजाग्रहम् । Poten. जागृह्यात् । जागृह्याताम् । Bene जागृह्यात् । जागृह्यास्ताम् । Aor. अजाग्रहीत् । Condi. अजाग्रहीष्यत्।

Here end the Kryâdi roots.

इति तिङन्तक्र्यादिप्रकरणम् ।

अथ तिङन्त चुरादि प्रकरणम् ।

CHAPTER X.

THE CHURADI ROOTS.

चुर १ स्तेये ॥

This class contains roots which are conjugated almost like causatives The affix णिच् must be added, by the following sûtra, in order to *complete* the root.

२५६३ । सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् । ३ । १ । २५ ।

एभ्यो णिच्स्यात् । चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यस्तु स्वार्थे । 'पुगन्त–' (२१८९) इति गुणः । 'सनाद्यन्ताः–' (२३०४) इति धातुत्वम् । तिप्शबादि गुणायादेशौ । चोरयति ।

2563. The affix णिच् is employed after these words, *viz* — सत्य 'truth' (which then takes the form of सत्याप as exhibited in the sûtra), पाश 'a fetter', रूप 'form', वीणा 'a lute', तूल 'cotton', श्लोक 'celebration', सेना 'an army', लोम 'the hair of the body', त्वच 'the skin', वर्म 'mail', वर्ण 'celebration', चूर्ण 'powder' and the verb of the Churâdi class

Thus सत्यापयति 'he speaks truly', विपाशयति 'he unfetters or liberates, रूपयति 'he looks', उपवीणयति 'he sings with the lute', अनुतूलयति 'he makes a brush', उपश्लोकयति 'he praises in verse'; अभिषेणयति 'he advances with the army', अनुलोमयति 'he rubs over the hair', त्वचयति 'he feels of the skin', संवर्मयति । 'he puts on the mail armour', वर्णयति '*he* celebrates or colors', अवचूर्णयति he pulverises. The roots of the *Churâdi* class belong to the tenth conjugation, a list of which will be given hereafter After the verbs of the *Churâdi* class, the affix णिच् is employed without alteration of the sense, as चोरयति । 'he steals'. So also चिन्तयति ।

From सत्य upto चूर्ण are enumerated certain prâtipadikas that take णिच् । It was not necessary to have mentioned them separately. For they would, like every other noun, have taken णिच् to form verbs, under the General Rule given further on: namely the —

Gana-Sutra.—Diversely the affix णिच् is added to a pratipadika, with the force of the meaning of the root, and thereby the word undergoes the same modifications as before बहुल ।

This gana sûtra is taught further on, See root No 368. The mention of these special nouns in this sûtra is therefore illustrative only. While in the case of the Churâdi roots, the force of the affix is that of svârtha—*i.e.*, it does not change the meaning of the root

Thus चुर्+णिच्=चोर्+णिच् (The guna is by S 2189)=चोरि । Now the stem चोरि gets the designation of dhâtu or root by S 2304. Being a dhâtu, it takes शप् vikarana, the vikarana of the roots in general, and the terminations तिप् &c. Thus चोरि+शप्+तिप् (III 1 68. S 2167)=चोरे +अ+ति (VII 3 84 S. 2163)=चोरयति ।

The root चोरि like all other roots of this class may be conjugated in the Atmanepada also, when the fruit of the action accrues to the agent. The following sûtra states that rule

२५६४ । णिचश्च । १ । ३ । ७४ ।

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । 'णिश्रि—' (२३१२) इति चङ् । 'णौ चङि—' (२३१४) इति ह्रस्वः । द्वित्वम् । 'हलादिः शेषः' (२१७९) । 'दीर्घो लघोः' २३१८ इत्यभ्यासस्य दीर्घः । अचूचुरत्-अचूचुरत ।

2564, After a verb ending in affix ni (णिच्) when the fruit of the action accrues to the agent, the Atmanepada is employed.

Thus चोरयते. The Perfect is formed periphrastically, as चोरयामास । The First Future is चोरयिता । The Paras. Ben is चोर्यात् । The Atm. Benedictive is चोरयिषीष्ट ।

The aorist of णिजन्त roots is formed by चङ् under III. 1 48 S. 2312. Thus चोरि+चङ्+त=चोर्+चङ्+त (VI 4. 51 S. 2313)=चुर्+चङ्+त (the shortening takes place by VII 4, 1, S. 2314)=चुर्+चुर्+चङ्+त (VI. 1, 11.

S 2315)=चु+चुर्+चङ्+त (VII. 4. 60 S 2179)=चू+चुर्+चङ्+त (VII. 4. 94, S. 2318)=अचूचुरत् । The Atmanepada Aorist will be अचूचुरत ।

चुर १ स्तेये ।

1. √chura, to steal. The final अ in चुर is for the sake of utterance only as there is no other necessity of it The root चुर् &c. are incoate roots. to complete them, णिच् is added. The real root is चोरि । Sometimes, however, चुर &c are considered as independent roots

Parasmai. Pre. चोरयति । चोरयतः । चोरयन्ति । चोरयसि । चोरयथः । चोरयथ । चोरयामि । चोरयावः । चोरयामः । Per. चोरया चकार or चोरया बभूव or चोरयामास । I Fut. चोरयिता । II Fut चोरयिष्यति । Impera चोरयतु । Imper अचोरयत् । Poten. चोरयेत् । Bene चोर्यात् । Aor. अचूचुरत् । Desid. चुचोरयिषति । Nouns —चोरः । चौरः । चोरणा ।

Atmane. Pre. चोरयते । चोरयेते । चोरयन्ते । चोरयसे । चोरयेथे । चोरयध्वे । चोरये । चोरयावहे । चोरयामहे । Per. चोरयां चक्रे । I Fut. चोरयिता । II. Fut चोरयिष्यते । Impera. चोरयताम् । Imper. अचोरयत । Poten. चोरयेत । Bene. चोरयिषीष्ट । Aor. अचूचुरत । Desid चुचोरयिषते ।

चिति २ स्मृत्याम् ।

चिन्तयति । अचिचिन्तत् । 'चिन्त' इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । तेन 'चिन्त्यात्' 'चिन्त्यते' इत्यादौ नलोपो न । चिन्तति । चिन्तेत् । एतच्च ज्ञापकं सामान्यापेक्षमित्येके । 'अत एकहल्–' (२२६०) इत्यत्र वृत्तिकृता 'जगाण' 'जगणतुः' इत्युदाहृतत्वात् । विशेषापेक्षमित्यपरे । अत एव 'आधृषाद्वा' इत्यस्य न वैयर्थ्यम् ।

NOTE —The word वा "optionally" should be read into the sûtra Therefore टच् is optionally added as ब्रह्मसाम or ब्रह्मसामम्, देवच्छन्दः or देवच्छन्दसम् ॥

३५०६ । बहुप्रजाश्छन्दसि । ५ । ४ । १२३ ।

'बहुप्रजा निर्ऋतिमाविवेश'।

3506 The form bahuprajas is valid in the Vedas.

Thus बहुप्रजा निर्ऋतिमाविवेश ॥ Rig Ved I 164 32 In the classical literature, the form is बहुप्रज, as बहुप्रजो ब्राह्मणः ॥

३५०७ । छन्दसि च । ५ । ४ । १४२ ।

दन्तस्य दतृ स्याद्बहुव्रीहौ । 'उभयतोदतः प्रति गृह्णाति' ।

3507 For danta is substituted dat in the Vedas, when final in a Bahuvrîhi

Thus पत्रदन्तमालभेत, उभयदत आलभेत or उभयतो दतः प्रतिगृह्णाति ॥

३५०८ । ऋतश्छन्दसि । ५ । ४ । १५८ ।

ऋदन्ताद्बहुव्रीहेर्न कप् । हता माता यस्य हतमाता ।

इति पञ्चमोऽध्यायः ।

3508 The affix 'kap' does not come after a Bahuvrîhi ending in short 'ri' in the Vedas

Thus हता माताऽस्य = हतमाता, हतपिता, हतस्वसा, सुहोता ॥

CHAPTER VI

३५०९ । क । एकाचो द्वे प्रथमस्य । ६ । १ । १ ।

'* छन्दसि वेति वक्तव्यम् *' । 'यो जागार' । 'दाति प्रियाणि' ।

3509 A In the room of the first portion, containing a single vowel, there are two S 2175.

Vârt —In the Chhandas there is optionally reduplication of the root in the Perfect and other tenses As दाति प्रियाणि (Rig Ved VI 8 3) or ददाति प्रियाणि ॥ मघवा दातु or ददातु, नक्तिता दधातु or दधातु ॥

Vârt — The root जागृ is optionally reduplicated in the Perfect. As, यो जागार (or जजागार) Rig Ved X 11 11

३५०९ । तुजादीनां दीर्घोऽभ्यासस्य । ६ । १ । ७ ।

तुजादिराकृतिगणः । 'प्रभरा तूतुजान' 'सूर्यं मामहानम्' । 'दाधार यः पृथिवीम्' 'स तूताव' ।

3509 In the room of a short vowel of the reduplicate of the roots 'tuj' &c, a long is substituted

There is no list of तुजादि verbs given any where The word आदि in तुजादि therefore should be construed as "verbs *like* tuj" so that wherever we may find a word having a long vowel in the Reduplicate, we should consider it a valid form Thus प्रभरा तूतुजान तुज + कानच् III 2, 106 तूतुजान Rig I 61 12) सूर्यं मामहान । दाधार य पृथिवीम Rig Ved III 32 8 स तूताव Rig Ved I 94 2 Thus lengthening only takes place in the Vedas before some special affixes.

३५१० । बहुलं छन्दसि । ६ । १ । ३४ ।

ह्वः सम्प्रसारणं स्यात् । 'इन्द्रमा हुव ऊतये' ।

'+ ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि +' ऋच्छब्दे परे त्रेः सम्प्रसारणमुत्तरपदादेर्लोपश्चेति वक्तव्यम् । तृच सूक्तम । 'छन्दसि' किम । त्र्यृचानि ।

'+ रयेर्मतौबहुलम +' । रेवान् । रयिमान्पुष्टिवर्धन ।

3510 In the Chhandas, the semivowel of the root hve is diversely vocalised

Thus हुवे or हुवामि, as इन्द्रमाहुव ऊतये (Rig Ved I 111 4). देवी सरस्वतीं हुवे ॥ The form हुवे is Atmanepada, Present tense, 1st Pers sing the vikarana शप is elided, then there is vocalisation and substitution of उवङ् ॥ So also हुवामि मंरुत शिवान् । हुवामि विश्वान् देवान् ॥ So also हव as श्रुधीहवम (Rig I 2 1.) 'hear the invocation'

Vârt —There is vocalisation of the semivowel of त्रि when followed by ऋच्, and there is elision of the ऋ of ऋच when it refers to Metres As तिस्र ऋच यस्मिन् = तृच सूक्त ॥ तृच साम ॥ The word तृच् takes the samâsânta affix अ by V 4 74 Why do we say when referring to a metre ? Observe त्र्यृचानि ॥

Vârt —In the Chhandas there is diversely vocalisation of the semivowel of रयि followed by the affix मतुप्, as रयि + मत = रइ + मत = र + इ + मत्=र+इ + वत (VIII 2 15)=रेवत्, as, आ रेवानेतु नो विश. ॥ Sometimes it does not take place, as रयिमान् पुष्टिवर्द्धन. ॥ The म here is not changed to व as required by VIII 2, 15

३५११ । चायः की । ६ । १ । ३५ ।

चायतेर्बहुलं कीत्ययमादेशः. स्याच्छन्दसि । 'न्य १ न्यञ्चिच्युर्न निचिक्युरन्यम्' । लिट्युसि रूपम् । बहुलग्रहणानुवृत्तेर्नेह । 'अग्निं ज्योतिर्निचाय्य' ।

3511 For chây is diversely substituted kî in the Chhandas

Thus विधुना निचिक्यु', न्यन्य चिक्युर्न निचिक्युरन्यम् ॥ These are forms ending in the affix उस् of the Perfect Sometimes there is no substitution As अग्निं ज्योतिर्निचाय्य ॥ Thus चाय + उस् = की+उस् = चिकी+उस्=चिक्यु. । So also चाय्+ क्त्वा=चाय् + ल्यप् = चाय्य ।

३५१२ । अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्तः । ६ । १ । ३६ ।

एते छन्दसि निपात्यन्ते । 'इन्द्रश्च विष्णो यदपस्पृधेथाम' । स्पर्धेर्लङ्याथाम । 'अर्कमानृचु' । 'वसून्यानृहुः' । 'अर्चेरर्हेश्च लिट्युसि' । चिच्युषे । च्युङो लिटि थासि । 'यस्तित्याज' । त्यजेर्णलि । 'श्रातास्त इन्द्र सोमा' । 'श्रिता नो ग्रहाः' । 'श्रीञ् पाके निष्ठायाम्' । 'माशिर दुहे' । 'मध्यत आशीर्त्त.' । श्रीञ एव क्विपि निष्ठायां च ।

3512 In the Chhandas, the following irregular forms are met with —अपस्पृधेथाम्, आनृचु', आनृहुः, चिच्युषे, तित्याज, श्राताः, श्रितम्, आशीः and आशीर्त्तः ॥

The word छन्दसि is understood here From the root स्पर्द्ध 'to challenge', is formed अपस्पृधेथाम् being the Imperfect (लङ्), 2nd Pers Dual, Atmanepada · there is reduplication of the root, vocalisation of र, and the elision of अ irregularly As, इन्द्रश्चविष्णो यदपस्पृधेथाम् (Rig Ved VI 69 8) In the classical language

the form is अपत्यमंयाम ॥ Some say, it is derived from स्यम with the preposition अप, the vocalisation of र, the elision of अ, and the non prefixing of the augment अट् in the Imperfect (VI. 4 75) The counter example of this will be अपास्यमं-याम् ॥

From अर्चे and अर्हे 'to respect, to worship', are derived आनृचु: and आनृहु: in the Perfect before the 3rd per pl उस्, there being vocalisation of र and the elision of अ irregularly Then there is reduplication, then ऋ changed to अ, then the lengthening of this अ, then the addition of the augment न, as अर्च्+उस् = अच्+उस् = अ+अच्+उस् = अ+अच्+उस् (VII 4 66) = आ + अच् + उस् (VII 4. 70) = आ+न्+अच्+उस् (VII. 4 71)=आनृचु ॥ The irregularity consists in the samprasârana with the elision of अ ॥ Thus यथा अर्कमानृचु. (Rig Ved. I. 19 4), न बहून्यानृहु. ॥ The classical forms will be आनर्चु, आनर्हु ॥

The form चिच्युषे is the Perfect 2nd per sing of the root च्युङ् 'to go' there is vocalisation of the reduplicate, and the non addition of the augment इट् before the affix से ॥ This is the irregularity The regular form is चुच्युविषे ॥

The form तित्याज as in "यस्तित्याज" (Rig Ved X 71 6), is the Perfect of त्यज्, the vocalisation of the reduplicate is the irregularity. The regular form is तत्याज ॥

From the root श्रीञ् 'to cook', is derived श्राता before the Nishthâ affix, श्री changed to श्रा irregularly As श्रातास इन्द्रसोमाः ॥ The form श्रितं is also derived from the same root by shortening the vowel with the same affix As सोमो गौरी अधिश्रित, श्रिता नो ग्रहा. ॥ Some say the श्रा substitution of श्री takes place when the word refers to सोम, in the plural, and श्रि when it refers to other than सोम ॥ Sometimes the word श्रात. is seen in the singular, referring to objects other than सोम । Thus यदि श्राता जुहोतन ॥ In fact, the exhibition of the word श्राता in the plural in the sûtra is not absolutely necessary

The words आशीर and आशीर्त: are from the same root श्री, with the prefix आङ् and taking the affixes क्विप् and क्त respectively Before these श्री is replaced by शीर्, and the non addition of न in the Nishthâ is irregular, As, "आशिरं दुहे" (Rig Ved III. 53 14), सोमेमध्यत आशीर्त. ॥ (Rig Ved VIII 2. 9)

३५१३ । खिदेश्छन्दसि । ६ । १ । ५२ ।

'खिद दैन्ये' । अस्यैच आ स्यात । चिखाद । चिखेदेत्यर्थः ।

3513 There is optionally the substitution of â in the room of the diphthong of the verb khid 'to suffer pain,' in the Chhandas.

The word विभाषा is understood here. Thus चित्तं चिखाद or चिखेद ॥ In the classical literature we have चित्तं खेदयति ॥

३५१४ । शीर्षश्छन्दसि । ६ । १ । ६० ।

शिरःशब्दस्य शीर्षन् स्यात । 'शीर्ष्णो आननः' ॥

3514 The word śîrshan is found in the Chhandas

This word is another form of शिर. and means 'head' This is not a substitute of शिर in the Vedas, for both forms are found therein. Thus शीर्ष्णा

जानत· (Rg Ved VII. 66. 15) In the classical literature there is only one form कित. ॥

The Sûtras VI 1 104 and 105 declare "The substitution of a long vowel homogeneous with the first, does not take place when अ or आ is followed by a vowel other than अ of the case-affixes of the Nominative and the Accusative" "The substitution of a long vowel homogeneous with the first, does not take place when a long vowel is followed by a Nominative or Accusative case-affix beginning with a vowel other than अ or by the Nom Pl affix जस् ॥" The following sûtra makes an exception in the Vedas

३५१५ । वा छन्दसि । ६ । १ । १०६ ।

दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात । वाराही वाराह्यौ । 'मारुतीरीलते विश.' । उत्तरसूत्रद्वयेऽपीद वाक्यभेदेन सबध्यते । तेनामिपूर्वत्व वा स्यात । शमी च शम्य च । 'सूर्म्यं सुषिरामिव' । सम्प्रसारणाच्च ' (३३०) इति पूर्वरूपमपि वा । इज्यमान । यज्यमान ।

3515 In the Vedas, the long vowel may optionally be the single substitute of both vowels, in contravention to the prohibition mentioned in VI 1 104 and VI 1. 105

Thus मारुती. or मारुत्य, पिण्डी. or पिण्ड्यौ, वाराही or वाराह्यौ, उपानही or उपानह्यौ ॥

'मारुतीरीलते विशः' (Rig Ved. V 8 3)

The two sûtras subsequent to this in the Ashtâdhyâyi, namely VI 1 107 and VI 1 108 are also influenced by the present sûtra Thus sûtra VI 1 107 declares. "There is the single substitution of the first vowel, when a simple vowel is followed by the अ of the Accusative singular अम् ।" But this is optional in the Vedas Thus शमीम् or शम्यम्, and सूर्म्यं सुषिरामिव (Rig Ved, VIII 69 12).

Similarly VI 1 108 declares "There is the single substitution of the first vowel for the vocalised semi vowel and the subsequent vowel" In the Veda this rule is optional, as इज्यमानः or यज्यमान. ॥

३५१६ । शेश्छन्दसि बहुलम् । ६ । १ । ७० ।

लोपः स्यात् । 'या ते गात्राणाम' । 'ताता पिण्डानाम्' ।

'+ समानादिषु छन्दसि पररूप वक्तव्यम +' । अपात्स्वेमन् । अपा त्वोक्मन् ।

3516 In the Chhandas, the elision of case-ending i (śi) of the nominative and accusative plural neuter, is optional

Thus या ते गात्राणाम् (Rg Ved I 162 19) ताता पिण्डानाम् (Rig Ved I. 162 19).

Vârt —In the Vedas, the pararûpa substitution takes place when एमन् &c follow Thus अपा त्वा एमन् = अपा त्वेमन् ॥ So also अपा त्वा ओक्मन् अपा त्वोक्मन् ॥

३५१७ । भय्यप्रवय्ये च च्छन्दसि । ६ । १ । ८३ ।

बिभेत्यस्मादिति भय्य. । वेते प्रवय्या इति स्त्रियामेव निपातनम् । प्रवेयमित्यन्यत्र । 'छन्दसि' किम् । भेयम् । प्रवेयम् ।

'+ हृदय्या आप उपसख्यानम +' हृदे भवा हृदय्या आप । भवे छन्दसि यत ।

3517 The forms bhayya and pravayyâ are found in the Chhandas.

The word भय्य is derived from भी+यत्, and प्रवय्या from प्र+वी+यत् ॥ The guna ए is changed to अय् ॥ Thus भय्यं किमाशीत् ॥ वत्सतरी प्रवय्या ॥ The यत् is added to भी wi h the force of Ablative by virtue of the diversity allowed by कृत्यल्युटो बहुलं (III 3 113) ॥ Thus बिभेति अस्मात् = भय्यम् "frightening or fearable" The word प्रवय्या is always used in the feminine in other places प्रवेय is the proper form Why we do say 'in the Vedas'? Observe भेयम्, प्रवेयम् in the classical literature

Vârt —The word ह्रदय्या should also be enumerated when referring to water. As ह्रदे भवा = ह्रदय्या आपः ॥ The affix यत् is added by IV 4 110 (ह्रदे+य=ह्रदय्+य) ॥

३५१८ । प्रकृत्यान्तःपादमव्यपरे । ६ । १ । ११५ ।

ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादति परे न तु वकारयकारपरेऽति । 'उपप्रयन्तो अध्वरम्' । 'सुजाते अश्वसूनृते' । 'अन्तःपादम्' किम् । 'एतास एतेऽर्चन्ति' । 'अव्यपरे' किम् । 'तेऽवदन्' तेऽयजन् ।

3518 The final 'e' or 'o' and the following 'a' when occurring in the middle half of a foot of a Vaidic verse, retain their original forms, except when the 'a' is followed by 'v' or 'y' ॥

The word एङः is understood here, but it should be construed here in the nominative case and not in the Ablative. The word प्रकृति means 'original nature, cause' The word अन्तर् is an Indeclinable, used in the Locative case here and means 'in the middle' The word पादः 'the foot of a verse' refers to the verses of the Vedas, and not to the verses of the classical poetry The word अति is also understood here Thus उपप्रयन्तो अध्वरम् (Rig Ved. I, 74 1.), सुजाते अश्वसूनृते (Rig Veda V 79 1)

Why do we say 'in the inner half of a foot of a verse?' Observe एता अर्षन्ति (?) कुत एतास एतेऽर्चन्ति (Rig Ved I 165 1) ॥ Why do we say "when व or य does not follow अ?" Observe तेऽवदन् (Rig. X 109 1) ॥ Why do we say ए or ओ? Observe अग्निरत्र वसामवमव्यत् ॥ Some read this sûtra as प्रकृत्या. अन्तःपादमव्यपरे ॥ According to them, this sûtra supersedes the whole rule of juxtaposition or संहिता (VI 1 72)

३५१९ । अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च । ६ । १ । ११६ ।

एषु व्यपरेऽप्यति एङ् प्रकृत्या । 'वसुभिर्नो अव्यात्' । मित्रमहो अवद्यात्' । 'मा शिवासो अवक्रमुः' । 'ते नो अव्रताः' । 'शतधारो अयं मणिः' । 'ते नो अवन्तु' । 'कुशिकासो अवस्यवः' । यद्यपि । बहुचैस्तेनोऽवन्तु रथतूः' सो यमागात्' तेऽरुणेभिः' इत्यादौ प्रकृतिभावो न क्रियते तथापि बाहुलकात्समाधेयम् । प्रातिशाख्ये तु वाचनिक एवायमर्थः ।

3519 The 'e' or 'o' retain their original form in the middle of a Vaidic verse, when the following words come after them (though the 'a' in these has a 'v' and 'y' following it).—अव्यात्, अवद्यात्, अवक्रमुः, अव्रत, अयम्, अवन्तु, अवस्यु ॥

Thus अग्निः प्रथमो वसुभिर्नो अव्यात् ॥ मित्रमहो अवद्यात् (Rig IV. 4. 15), मा शिवासो अवक्रमुः (Rig VII. 32 27), ते नो अव्रता. (Not in the Rig Veda) Prof Bohtlingk gives the following examples from the Rig Veda —सोऽहमव्रतम् (VI 14. 3) मंदहन्तो अव्रतान् (IX. 73 5), वर्णं अव्रतान् (IX. 73 8), शतधारो अयं मणिः, ते नो अवन्तु,

(Not in the Rig Veda according to Prof Bohtlingk the अ of अवन्तु is generally elided in the Veda after ए or आ) कुशिकासो अवस्यव (Rig III 42 9)

Though in the Rig Veda we find examples like ते नोऽवन्तु रथतू (Rig Ved X 77 8), and सोऽयमागात and तेऽरुणेभि (Rig Ved I 88 2) &c where there is no Prakriti-bhâva, but *sandhi*, yet these are to be explained by bahulam i e as a Vaidic diversity But in the Prâtisâkhyas, the e is an express rule to this effect, and not left to mere inference as here

NOTE —1 अव्यात is Benedictive 3rd Per Sing of अव 'to protect'

2 अवद्यात is Ablative singular of अवद्य ॥

3 अवक्रमु is the Perfect, 3rd Per Plural of क्रम preceded by the Preposition अव । There is no reduplication as a Vaidic irregularity Some read अवचक्रमु (with reduplication) in the text, but no such word is found in the Rig Veda

4 अवत is the Aorist of वृङ् and वृञ, the 3rd Per Pl झि is replaced by अत । (The Aorist sign is elided by II 4 80 S 3402)

5 अयम is from इदम ।

6 अवन्तु is Imperative 3rd Per Pl of अव 'to protect'

7 अवस्यु is a Noun, from अव+असुन=अवस् । Then is added क्यच् as अवस्य । Then उ is added by III 2, 170, and we get अवस्यु. ॥

३५२० । यजुष्युरः । ६ । १ । ११७ ।

उर शब्द एङन्तोऽनि प्रकृत्या यजुषि । 'उरो अन्तरिक्षम्' । यजुषि पादाभावादनन्त.पादार्थ वचनम ।

3520 In the Yajur Veda, the word 'uras' when changed to 'uro' retains its original form when followed by a short 'a' which is also retained

Thus उरो अन्तरिक्षम (Yajur Veda Vajasan IV 7) Some read the sûtra as यजुष्युरो ॥ They take the word as उरु ending in उ, which in the Vocative case assumes the form उरो ॥ They give the following example उरो अन्तरिक्षं सजूर ॥ But in the Yajur Veda VI 11, the text reads उरोरन्तरिक्षत सजू. ॥

In the Yajur Veda, there being no stanzas, the condition of अन्त.पादं of VI 1 115 does not apply here, and hence the necessity of a separate sûtra, otherwise VI 1 115, would have covered this case also

३५२१ । आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे । ६ । १ । ११८ ।

यजुष्यति एङ प्रकृत्या । 'आपो अस्मान्मातर शुन्धयन्तु' । जुषाणो अग्निराज्यस्य' । 'वृष्णो अंशुभ्याम्' । 'वर्षिष्ठे अधि नाके' । 'अम्बे अम्बाले अम्बिके' । अस्मादेव वचनात् 'अम्बार्थ –' । (२६७) इति ह्रस्वो न ।

3521 In the Yajur Veda, the short 'a' is retained after आपो, जुषाणो, वृष्णो, वर्षिष्ठे, and also in and after 'ambe' or 'ambâle' when they stand before 'ambike'

Thus आपो अस्मान् मातर. शुन्धयन्तु (Yaj IV 2) जुषाणो अप्तुराज्यस्य (Yaj V 35), वृष्णो अंशुभ्या गभस्ति पूत (Yaj VII 1) वर्षिष्ठे अधिनाके ॥ The Vajasaneyi Sanhita has वर्षिष्ठेऽधि (V S I 22) The Taittariya Sanhita has वर्षिष्ठे अधि ॥ (I 1 8 1 4, 43, 2 5 5 4) अम्बे अम्बाले, अम्बिके (V S 23 18 where the reading is अम्बे अम्बिकेऽम्बालिके) but Tait S VII 4 19 1, and Tait Br. III 9 6.

3 has अम्बे अम्बाल्यम्बिके ॥ The words अम्बे &c. though in the Vocative, do not shorten their vowel by VII 3 107, because they have been so read here

३५२२ । अङ्ग इत्यादौ च । ६ । १ । ११९ ।

अङ्गशब्दे य एङ् तदादौ चाकारे य एङ्पूर्वः सोऽपि प्रकृत्या यजुषि । 'प्राणो अङ्गे अङ्गे अदीध्यत्' । 'अङ्गे अङ्गे अशोचिषम्' ।

3522 In the Yajur Veda, when the word 'ange' is followed by 'ange' the subsequent short *a* is retained, as well as the preceding 'e' or 'o'

Thus ऐन्द्रः प्राणो अङ्गे अङ्गे अदाध्यत्, ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यत्, ऐन्द्रः उदानो अङ्गे अङ्गे निधीत., ऐन्द्रः प्राणो अङ्गे अङ्गे अशोचिषम् (Yaj. 6. 20)

३५२३ । अनुदात्ते च कुधपरे । ६ । १ । १२० ।

कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । 'अयं सो अग्निः' । 'अयं सो अध्वरः' । 'अनुदात्ते' किम् । 'अधोऽग्ने रुद्रे' । अग्रशब्द आद्युदात्त । 'कुधपरे' किम । 'सोऽयमग्निमन्त' ।

3523 In the Yajur Veda, when an anudâtta *a* is followed by a Guttural or a *dh*, the antecedent 'e' or 'o' retains its form, as well as this subsequent *a*

Thus अय सो अग्निँ (Yaj 12 47), अयं सो अध्वरँ. ॥ Why do we say when अ is gravely accented? Observe अधोऽग्रे, here अग्रे has an acute accent on the first syllable Why do we say "when followed by a Guttural (कु) or a ध"? Observe सोऽयमग्नि मन्त ॥

३५२४ । अवपथासि च । ६ । १ । १२१ ।

अनुदात्त अकारादौ अवपथा:शब्दे परे यजुषि एङ् प्रकृत्या । 'त्रीरुद्रेभ्यो अवपथा' । थपिस्यासि लङि 'तिङ्ङतिङ' (३६३५) इत्यनुदात्तत्वम् । 'अनुदात्ते' किम् । 'यद्रुद्रेभ्योऽवपथा.' । निपातैर्यद्यदि-' (३'७७) इति निघातो न ।

3524 In the Yajur Veda, when the gravely accented *a* of *avapathâs* follows *e* or *o* the vowels retain their original form.

Thus त्रीरुद्रेभ्यो अवपथा ॥ The word अवपथाः is 2nd per Singular Imperfect of वप् in the Atmanepada. Thus अ+वप्+शप्+थास ॥ The अ is grave by VIII 1 28 When it is not gravely accented, the अ drops As यद्रुद्रेभ्योऽवपथा' ॥ Here अ in not grave by virtue of VIII. 1 30

३५२५ । आङोऽनुनासिकश्छन्दसि । ६ । १ । १२६ ।

आङोऽचि परेऽनुनासिक स्यात । स च प्रकृत्या । 'अभ्र आँ अप.' । 'गभीर आँ उग्रपुत्रे' । '+ ईषाद्वादीना छन्दसि प्रकृतिभावो वक्तव्यः +' । 'ईषा अक्षो हिरण्ययः' । 'ज्या इयम्' । 'पूषा अविष्टु' ।

3525. For the adverb 'â' is substituted in the Chhandas the nasalised 'añ' when a vowel follows it, and it retains its original form.

Thus अभ्र आँ अप. (Rig Veda V. 48. 1), गभीर आँ उग्रपुत्रे जिघांसतः (Rig Veda VIII. 67. 11.)

Várt —In the Vedas ईषा अक्ष॰ &c are found uncombined As, ईषा अक्षा का ईमिरे विश्वगिला, यथा अङ्गद, यथा अगमन् &c
ज्या इयम् (Rig Ved VI 75 3) पूषा अविष्टु (Rig Ved X 26 1)

३५२६ । स्यश्छन्दसि बहुलम् । ६ । १ । १३३ ।
स इत्यस्य सोर्लोप स्याद्धलि । 'एष स्य भानु '।

3526 In the Chhandas, the case-affix of the nominative singular is diversely elided after *sya*, when a consonant follows it

Thus उत स्य वाजी क्षिपणि तुरण्यति । ग्रीवायां बद्धो अपिकक्ष आसनि (Rig Veda IV 40 4), एष स्य ते मधुमाँ इन्द्र सोम (Rig Veda IX 87, 4) Sometimes it does not take place as यत्र स्यो निपतेत ॥ The स्य means 'he'

३५२७ । ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । ६ । १ । १५१ ।
ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागम स्यान्मन्त्रे । 'हरिश्चन्द्रो मरुद्गण' । सुश्चन्द्र स्य ।

3527 In a Mantra, the 'sut' is added to 'chandra,' when it is a second member in a compound and is preceded by a short vowel

Thus हरिश्चन्द्रो मरुद्गण. (Rig Ved IX 66 26) सुश्चन्द्रो युष्मान् ॥ Why do we say after a short vowel? Observe सूर्याचन्द्रमसाविव ॥ Why do we say 'in a Mantra'? Observe, सुचन्द्रा पौर्णमासी ॥ The उत्तरपद can only be in a compound (samâsa) as it is well known to all, and it does not mean, 'the second word,' as the literal meaning might convey Therefore the rule does not apply here सुश्रमसि चन्द्रमसि ॥

३५२८ । पितरामातरा च छन्दसि । ६ । ३ । ३३ ।
द्वन्द्वे निपात. । 'आ मा गन्ता पितरामातरा च' । चाद्विपरीतमपि । 'नमातरापितरा नू चिदिष्टौ' ।
'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' । समानस्यस स्यान्मूर्धादिभिन्न उत्तरपदे । सगर्भ्यः ।
'+ छन्दसि स्त्रिया बहुलम +' । विष्वग्देवयोरद्र्यादेश. । 'विश्वाची च घृताची च,' 'देवद्रीचीं नयत देवयन्त.', 'कद्रीची' ।

3528 In the Vedas the form 'Pitarâmâtarâ' is also valid.

In the ordinary language मातापितरौ is the proper form The Vaidic form is derived by adding अङ् to the first member, and आ is added to the second by VII. 1. 39 and then Guna by VII 3 110 Thus आ मा गन्ता पितरामातरा च ॥
By force of च 'also', the converse is also valid As न मातापितरा नू चिदिष्टौ ।

3528A स is the substitute of समान in the Chhandas, but not before मूर्धन्, प्रभृति and उदर्क ॥ (See VI 3 84 S 1012)

Thus सगर्भ्य. = समानो गर्भ "uterine brother"

Várt —In the Vedas, the finals of विश्व and देव are replaced by अद्रि diversely before the feminine nouns thus in "विश्वाची च घृताची च', there is no substitution in विश्वाची, but in कद्रीची there is this substitution कद्रीची is derived from किम+अच = कद्रि + अच ॥ Then is added ङीप् and then like अश्वाची ॥ This vartika is an exception to VI 3 92 S 418
देवद्रीचीं नयत देवयन्त (Rig Ved III 6. 1) कद्रीची (Rig Ved I 164 17).

३५२९ । सध मादस्थयोश्छन्दसि । ६ । ३ । ९६ ।

सहस्य सधादेशः स्यात । 'इन्द्र त्वास्मिन्सधमादे' । सोमः सधस्थम ।

3529. *Sadha* is substituted for *saha* in the Chhandas when *mada* and *stha* follow

Thus सधमादेद्युम्न्य एकास्ता' सधस्था ॥ Another example is आत्वा वृहन्तो हरयो युञ्जाना, अर्वागिन्द्र सधमादो वहन्तु (Rig III 3 7) सहमाद्यन्ति देवा अस्मिन् - यज्ञ ॥ 'इन्द्र त्वास्मिन्सधमादे' (Rig Ved VIII 2 3)

३५३० । पथि च च्छन्दसि । ६ । ३ । १०८ ।

पथिशब्द उत्तरपदे को कव कादेशश्च । कवपथ -कापथ'-कुपथ. ।

3530 The substitution of *ka*, and *kava* for *ku* takes place in the Chhandas before *patha*.

Thus कवपथ., कापथ' and कुपथः ॥

३५३१ । साढ्यै साढ्वा साढेति निगमे । ६ । ३ । ११३ ।

सहे क्त्वाप्रत्यये आद्य द्वय तृनि तृतीय निपात्यते । 'मरुद्भिरुग्रः पृतनासु साळ्हा' अचोर्मध्यस्थस्य डस्य ल ढस्य ळ्हश्च प्रातिशाख्ये विहित. । आह हि ।

'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सपद्यते स डकारो लकार ।

ळ्हकारतामेति स एव चास्य ढकार' सन्नूष्मणा सप्रयुक्त ॥' इति ।

3531 'Sâdhyai' 'sâdhwâ' and 'sâdhâ' are irregularly formed in the Vedas

Thus साढ्यै समन्तात, साढ्वा शत्रून् ॥ The words साढ्यै and साढ्वा are both formed by क्त्वा affix added to सह the ओ substitution not taking place. In the first, क्त्वा is changed to ध्यै ॥ The third word साढा is formed by तृन् affix added to सह ॥ In the classical literature सोढा and सोढ्वा are the proper forms.

'मरुद्भिरुग्र पृतनासु साळ्हा (Rig Ved VII 56 23)

In the Pratisâkhya it is ordained that a ड situated between two vowels is changed to ल, and a ढ so situated becomes ळ्ह ॥ As says the kârikâ.

Kârikâ —The letter ड falling between two vowels has become ळ in the pronunciation of this Professor

So also ढ similarly situated is pronounced by him as an Ushman letter e, lh ळ्ह " ॥

३५३२ । छन्दसि च । ६ । ३ । १२६ ।

अष्टन आत्व स्यादुत्तरपदे । अष्टापदी ।

3532. In the Chhandas also, the long vowel is substituted for the final of 'ashtan' before a second member.

Thus अष्टापदी ॥ The form अष्टापदी is the feminine in ङीप् (IV 1, 8) of अष्टपात् (V 4 138 the अ of पाद being elided in a Bahuvrihi), पद being substituted for पात् by VI 4, 130

३५३३ । मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ । ६ । ३ । १३१ ।

दीर्घ स्यान्मन्त्रे । 'अश्वावतीं सोमावतीम्' । इन्द्रियावान्मदिन्तम । 'विश्वकर्मणा विश्वदेव्यावता' ।

3533 In a Mantra, the final vowels of सोम, अश्व, इन्द्रिय and विश्वदेव्य are lengthened when the affix 'matup' follows

Thus सोमावती, अश्वावती इन्द्रियावती, विश्वदेव्यावती ॥
अश्वावतीं सोमवतीम (Rig Ved X 97 7)
विश्वकर्मणा विश्वदेव्यावता (Rig Ved X 170 4)

३५३४ । ओषधेश्च विभक्तावप्रथमायाम् । ६ । ३ । १३२ ।
दीर्घ स्यान्मन्त्रे । 'यदोषधीभ्य अदधात्योषधीषु' ।

3534 In a Mantra, the final of 'oshadhi' is lengthened before the case-endings, but not in the Nominative

Thus यद ओषधीभ्य अदधात्योषधीषु ॥

३५३५ । ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् । ६ । ३ । १३३ ।
दीर्घ स्यात । 'आ तू न इन्द्र' । 'नू मर्त' । 'उत वा घा स्यालात' । मक्षू गोमन्तमीमहे । 'भरता जातवेदसम' । तङिति थादेशस्य ङित्वपक्षे ग्रहणम । तेनेह न । 'शृणोत ग्रावाणा' । 'कूमना' । 'अत्रा ते भद्रा' । 'यत्रा नश्चक्रा' । 'उरुष्याणा' ।

3535 In the Rig Veda, the finals of the particles तु, नु, घ, मक्षु, the tense-affix तङ्, कु, the ending 'tra' and the word उरुष्य are lengthened

Thus तु —आ तू न इन्द्र वृत्रहन् (Rig IV 32 1) नु—नू मर्त ॥ घ —उत वा घा स्यालात ॥ मक्षु —मक्षू गोमन्तमीमहे ॥ तङ —भरता जातवेदसम (Rig X 176 2) तङ is the त substitute of था, when it is treated as ङित्, therefore it does not apply here, शृणोत ग्रावाणा (I 2 4) कु—कूमनस , त्र—'अत्रा ते भद्रा । ' यत्रानश्चक्रा' उरुष्या णो अग्ने ॥

NOTE :—The घ in the sûtra is the sound घ and not the technical घ (तरप् and तमप) स्याल means "the wife's brother" भरत is Imperative Second Person Plural शृणोत is the Imperative Second Person Plural formed by the affix तप् (VII 1 46 S 3568) Since this affix is पित the present rule does not apply to it उरुष्य is Imperative 2nd Per Singular and is derived from the Kandwâdi root उरुष्य (formed by यक्) The affix हि is elided by VI 4 105 S 2202 The न of the Pronoun नस् is changed to ण after उरुष्य by VIII 4 27 S 3649.

३५३६ । इकः सुञि । ६ । ३ । १३४ ।
ऋचि दीर्घ इत्येव । 'अभीषुण' सखीनाम्' । 'सुञ' (३६४४) इति ष' । 'नश्च धातुस्थोरुषुभ्य' (३६४६) इति ण. ।

3536 In a Mantra, the finals of the preceding member ending in 'i' or 'u' are lengthened before the particle 'su'

Thus अभी षु णा सखीनाम् (Rig IV 31 3) ऊर्ध्व ऊ षुणा ऊतये (Rig I 36 13). The स is changed to ष by VIII 3. 107 S 3644, and न changed to ण by VIII 4 27 S 3649

३५३७ । द्व्यचोऽतस्तिङः । ६ । ३ । १३५ ।
मन्त्रे दीर्घ. । 'विद्मा हि चक्राजरसम्' ।

3537. A tense affix ending in 'a' is lengthened in the Rig Veda, when the Verb consists of two syllables

Thus विद्मा हि त्वा सत्पतिं शूर गोनाम &c See Rig. III 42 6, विद्मा हि चक्रा जरसम । &c But not here देवा भवत वाजिन', as the verb consists of more than two syllables not also here आ देवान् वक्षि यक्षि च as the verbs do not end in अ ॥

NOTE — विद्म is Present First Person Plural. म replaces मस् by III 4 82. चक्र is 2nd Person Plural of the Perfect of कृ ॥

३५३८ । निपातस्य च । ६ । ३ । १३६ ।

'एवा हि ते'।

3538 In the Rig Veda the final of a particle is lengthenod

Thus एवा हि ते, अच्छाते, अच्छा जरितार (Rig Ved I 2, 2).

३५३९ । अन्येषामपि दृश्यते । ६ । ३ । १३७ ।

अन्येषामपि पूर्वपदस्थानां दीर्घं स्यात् । पूरुषः । दण्डादण्डि ।

3539 The elongation of the final is to be found in other words also.

Here we must follow the usage of the Śishthas. Where the lengthening is not ordained by any rules of Grammar, but occurs in the writing of standard authors, there we should accept such lengthening as valid Thus पूरुष. दण्डादण्डि ।

३५४० । छन्दस्युभयथा । ६ । ४ । ५ ।

नामि दीर्घो वा । 'धाता धातॄणाम' इति बह्वृचा. । तैत्तिरीयास्तु ह्रस्वमेव पठन्ति ।

3540 In the Chhandas, the finals are optionally lengthened before the Genitive plural 'nâm'

In some places they are seen as lengthened, in others not. As धाता धातॄणाम् (Rig Ved X 128 7) So also चतसृणाम and चतसॄणाम् ॥

The Rig Vedins read with long ॠ, the Taittariyas read it with short ऋ ॥

३५४१ । वा षपूर्वस्य निगमे । ६ । ४ । ९ ।

षपूर्वस्यान्तो नोपधाया वा दीर्घोऽसंबुद्धौ सर्वनामस्थाने परे । ऋभुक्षाणम् । ऋभुक्षणम् । 'निगमे' किम् । तक्षा । तक्षाणौ ।

3541. The lengthening of the penultimate vowel of a stem ending in 'n' before the affixes of the strong-case, is optional in the Nigama, when 'sh' precedes such a vowel.

Thus ऋभुक्षाणं or ऋभुक्षणमिन्द्रम् ॥

Why do we say 'in the Nigama'? In the classical literature we have तक्षा, तक्षाणौ, तक्षाण. always.

३५४२ । जनिता मन्त्रे । ६ । ४ । ५३ ।

इडादौ तृचि णिलोपो निपात्यते । 'यो नः पिता जनिता' ।

3542 In a Mantra, the word 'janitâ' is formed irregularly by the elision of 'ṇi' before the affix 'tri' with the augment 'iṭ'

Thus यो न. पिता जनिता (Rig Veda X 82 3) ॥ Otherwise जनयिता in the classical literature It is an exception to VI 4 51

३५४३ । शमिता यज्ञे । ६ । ४ । ५४ ।

शमयितेत्यर्थः ।

3543 'S'amitâ' is formed irregularly by the elision of 'ni' before an 'it' augmented affix, when meaning a sacrificial act

Thus शृत हवि शमित. ॥ It is formed by तृच and is in the Vocative case Why do we say 'when referring to a sacrificial act'? See शृतं हवि शमयित. ॥ See Satpatha Br III 8 3, 4 and 5

३५४४ । युप्लुवोर्दीर्घश्छन्दसि । ६ । ४ । ५८

ल्यपीत्यनुवर्तते । वियूय । विप्लूय ।

'आडजादीनाम' (२२५४) ।

3544 In 'yu' and 'plu,' long is substituted for 'u' before 'lyap' in the Chhandas

Thus दान्यनुपूर्वं वियूय, यत्रा यो दक्षिणा परिप्लूय ॥ Why do we say, in the Chhandas'? Observe सयुत्य, आप्लुत्य in the classical literature

By VI 4 72 the augment आट् is added to verbs beginning with a vowel, in the Aorist, the Imperfect and the Conditional In the Vedas, it comes before verbs beginning with consonants also

३५४५ । छन्दस्यपि दृश्यते । ६ । ४ । ७३ ।

अनजादीनामित्यर्थ । आनट् । आव' । 'न माङ्योगे' (२२२८) ।

3545 The 'ât' augment is found in the Chhandas also

It is found there before the roots beginning with a vowel as well as before consonant roots Thus आनट्, from नश् in the Aorist The च्लि is elided by II 4 80, when VIII 2 63 does not apply, then श् is changed to ष् by VIII 2 36 which becomes ड् and finally ट् ॥ आनक्, from नश् when VIII 2 63 applies and आयुनक् ॥ आव is Aorist of वृञ्, the affix being elided by II 4 80 आनक् from नश (II 4 80) and आयुनक् is the Imperfect of युज ॥

The augments अट् and आट् are elided when the Particle मा is added. See VI 4 74. But not necessarily so in the Vedas as taught below

३५४६ । बहुलं छन्दस्यमाङ्योगेऽपि । ६ । ४ । ७५ ।

अडाटौ न स्त. माङ्योगेऽपि स्त ।'जनिष्ठा उग्र सहसे तुराय.।' 'मा व' क्षेत्रे परबीजान्यवाप्सुः'

3546 There is diversity in the Chhandas · the augment 'at' or 'ât' is added even with 'mâ,' and sometimes not added even when there is no 'mâ'

Thus in जनिष्ठा उग्र (Rig X 73 1), कामसूयेत् (Rig I 53 3) and काममर्दयेत् the augment is not added though there is no मा ॥ In मा व. क्षेत्रे परबीजान्यवाप्सुः, मा अभित्था, मा आव, the augment is not elided, though the particle मा is added.

३५४७ । इरयो रे । ६ । ४ । ७६ ।

'गर्भं प्रथम दध्रे आप'। रेभावस्याभीयत्वेनासिद्धत्वादालोप. । अत्र रेशब्दस्येटि कृते पुनरपि रेभावः । तदर्थं च सूत्रे द्विवचनान्त निर्दिष्टमिरयोरिति ।

3547 'Re' is diversely substituted for 'ire' in the Veda

Thus क स्विद्गर्भं प्रथमं दध्र आपः (Rig X 82 5) या स्य परिदध्रे ॥ In दध्रे the आ of धा is elided, before the affix इरे by VI 4 64, the र substitution being considered as asiddha (VI 4 22) for the purposes of the elision of आ ॥

Here इट् augment is first added to रे after the सेट् roots and the affix thus becomes इरे, then रे is substituted again for this इरे by this sutra, thus the affix is brought back to its original condition To show this repetition—रे—इरे—रे the sûtra has exhibited the word इरयोः in the dual number

३५४८ । छन्दस्युभयथा । ६ । ४ । ८६ ।

भूसुधियोर्यण्स्यादियङुवङौ च । 'वनेषु चित्रं विभ्वम्' । विभुवं वा । 'सुध्यो हव्यमग्ने,' सुधियो वा ।

'+ तन्वादीनां छन्दसि बहुलम् +' । 'तन्वं पुषेम' । तनुवं वा । त्र्यम्बकम्-त्रियम्बकं वा ।

3548 In the Chhandas, in the case of a stem in 'bhû' and 'sudhî' are found sometimes the इयङ्, उवङ्, and sometimes the semi-vowel substitution

As विभ्वं, विभुवम्, सुध्य and सुधिय ॥ वनेषु चित्रं विभ्वं विशे (Rig Veda IV 7 1) विभुवम् ॥ सुध्यो हव्यमग्ने for सुधियो हव्यमग्ने ॥

Vârtika —There is diversely the substitution of इयङ् and उवङ् in the Chhandas, after तनु &c and the rest This ordains substitution even after words which are not roots

As, तन्वं पुषेम (Rig Ved X. 128 1) or तनुवं ॥ त्र्यम्बकम् or त्रियम्बकम् "Three-eyed"

तनिपत्योश्छन्दसि । ६ । ४ । ९९ ।

एतयोरुपधालोपः क्ङिति प्रत्यये । 'वितत्निरे कवयः' । 'शकुना इव पप्तिम' । भाषायां वितेनिरे । पेतिम ।

3549. In the Chhandas, the root-vowel of 'tan' 'to stretch' and 'pat' to fall, is elided before an affix beginning with a vowel, when it has an indicatory 'k' or 'ṅ'

As वितत्निरे कवयः ॥ It is the 3rd Person Plural Perfect of तन् ॥ The vowel अ of तन् is elided Though the elision is *asiddha* yet the rule VI 4 120 requiring the substitution of ए and the elision of the reduplicate त does not apply because then the present sûtra would be nullified शकुना इव पप्तिम (Rig Ved IX. 107 20) This is also लिट् ॥ In the classical language we have वितेनिरे, पेतिम् ॥

३५५० । घसिभसोर्हलि च । ६ । ४ । १०० ।

'सग्धिश्च मे' । 'बब्धां ते हरी धानाः' । 'शुक्रसुग्भ्यां हेर्धि' (३४२५) ।

3550. The root-vowel of 'ghas' and 'bhas' is elided in the Chhandas, before any affix, whether beginning with a vowel or a consonant, which has an indicatory 'k' or 'ṅ'.

Thus सग्धिश्च मे सपीतिश्च मे बब्धां ते हरी धानाः ॥ सग्धिः is thus derived क्तिन् is added to the root अद्, then by II 4 39, घस् is substituted for अद्, thus घस् + ति = घ्स् + ति (अ being elided by the present sûtra) = घ् + ति (स् being elided by

VIII 2 26), then न is changed to ष, and ष to म and we have शिष ॥ Then समाना' शिष.=सशिष (समान changed to स VI 3 84) The word बभ्धाम is the Imperative of भस्. thus भस्+श्लु+ताम = भ भस + ताम = ब भस्+ताम (VI 4 100) = बभ + ताम (VIII 2 26) = ब ब्+ धाम= बब्धाम ॥ This rule of elision being a nitya, and a subsequent rule, ought to have operated first, but, as a Vaidic anomaly, the reduplication takes place first See VII 2 67

Why do we read "before an affix beginning *also* with a consonant"? Because the elision takes place before a vowel affix also, as बप्सति = भस् + श्लु + झि = ब भस्+अति (VII 1 4) = बप्सति (VIII 4 55)

Why having an indicatory क or ङ? Observe भ्रसून् बभस्ति ॥ The च has been added into the aphorism by the Vartikakâra

३५५१ । श्रुशृणुपृकृवृभ्यश्छन्दसि । ६ । ४ । १०२ ।

'श्रुधी हवम्' । 'शृणुधी गिरः' । 'रायस्पूर्धि' । 'उरुणस्कृधि' । अपावृधि ।

3551 धि is substituted for हि in the Vedas, after श्रु, शृणु, पृ, कृ and वृ ॥

As श्रुधी हवम (Rig Ved I 2, 1) शृणुधि गिरः (Rig Ved VIII 84 3) रायस्पूर्धि (Rig Ved I 36 12) उरुणस्कृधि and अपावृधि ॥

In शृणुधी, the हि is not elided after the उ or णु, as it was required by VI 4 106, since the present aphorism specifically mentions it The lengthening takes place by VI 3 137 The forms other than शृणुधि are irregular, श्नु being added *diversely* by III 1 85, and then elided diversely by बहुलंछन्दसि II 4 73

NOTE:—पूर्धि is from पृ 'to protect' The शप is elided, for the final ऋ there is उर by VII. I 102 S. 2495 and it is lengthened by VIII 2 77 S 354 उरुणस्कृधि from कृ, the न of नस is changed to ण by VIII 4. 27 S 3649 and the visarjaniya is changed to स by VIII 3. 50. S. 3635

३५५२ । वा छन्दसि । ३ । ४ । ८८ ।

हिरपिद्वा ।

3552 In the Chhandas the substitute 'hi' is optionally treated as not having an indicatory 'p'

The result is that in the Chhandas, the second person singular of लोट् has two forms, as प्रीणाहि or प्रीणीहि, युयुधि or युयोधि, धि being substituted for हि in the Vedas (by VI 4 103 S 3553) as in the following verse

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥
Rig Veda I 189 1 Yajur Veda, 40 16.

३५५३ । अङितश्च । ६ । ४ । १०३ ।

हेर्धिः स्यात् । रारन्धि । रमेर्व्यत्ययेन परस्मैपदम । शप' श्लुरभ्यासदीर्घश्च । 'अस्मे प्रयन्धि' 'युयोधि जातवेद' । यमे शपो लुक् । यौते शप श्लु । 'अङित ' किम् । प्रणीहि ।

3553 'Dhi' is substituted for 'hi' when the tense affix is not 'NIT'.

Under III 4 88 S 3552 हि is also पित् in the Vedas and when it is पित् it is not ङित् by 1 2 4 Thus रारन्धि, प्रयन्धि and युयोधि in the following सोमरारन्धि, श्रीमभ्य तद्वर्यंग्रव प्रयन्धि, युयोध्यस्मज् जुहुराणमेन ॥

Why do we say 'when it is not ङित्'? Observe प्रीणीहि ॥

(1) रारन्धि is irregularly formed Parasmaipada of रम, the शप being replaced by श्लु, and the reduplicate lengthened as a Vedic form. The म् is not elided, by VI 4 37 as the affix is not ङित् ॥ (2) प्रयन्धि is from यम the शप् is elided (3) युयोधि from यु (यौति), the शप् being replaced by श्लु, युयोधि जातवेद: (Rig Ved. VIII 11. 4)

३५५४ । मन्त्रेष्वाङ्यादेरात्मनः । ६ । ४ । १४१ ।

आत्मन्शब्दस्यादेर्लोपः स्यादाङि । 'त्मना देवेषु' ।

3554 In the Mantras, the beginning of 'âtman' is elided, when the affix of the Instrumental Singular follows

आङ् is the name of the Instrumental singular affix, given by ancient Grammarians Thus त्मना देवेषु (Rig Ved VII 7 1)

३५५५ । विभाषर्जोश्छन्दसि । ६ । ४ १६२ ॥

ऋजुशब्दस्यर्तः स्थाने र, स्याद्वा इष्ठेमेयस्सु । 'त्वं रजिष्ठमनुनेषि' । ऋजिष्ठं वा ।

3555. Before the affixes ishtha, iman and îyas, the 'ri' of 'riju' may optionally be changed to 'ra' in the Chhandas

As रजिष्ठ. and ऋजिष्ठः, in त्वं रजिष्ठमनुनेषि (Rig Ved I. 91 1).

३५५६ । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि । ६ । ४ । १७५ ।

ऋतौ भवमृत्व्यम् । वास्तुनि भव वास्तव्यम् । वास्त्व च । मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते । 'माध्वीर्नः सन्त्वोषधी' । हिरण्यशब्दात्परस्य मयटो मशब्दस्य लोपो निपात्यते । 'हिरण्ययेन सविता रथेन' ।

इति षष्ठोऽध्यायः ।

3556 In the Chhandas the following are irregularly formed: Ritvya, Vâstvya, Vâstva, Mâdhvî, and Hiranyaya.

The word ऋत्व्य is derived from ऋतु, and वास्तव्य from वास्तु with the affix यत, उ being changed to व ॥ ऋतौ भवम् = ऋत्व्यम्, वास्तौ भवम् = वास्त्व्यम ॥ वास्त्व is from वस्तु, as वस्तुनि भव = वास्त्व with the affix अण् ॥ माध्वी from मधु with the affix अण in the feminine as 'माध्वीर्नं सन्त्वोषधी' Rig Ved I 90 6 हिरण्यय is from हिरण्य with the affix मयट्, the म being elided, as 'हिरण्ययेन सविता रथेन' (Rig Ved. I 35 2.)

CHAPTER VII.

'शीङो रुट्' (२४४२) ।

By VII. 1 6 S 2442, the augment रुट् is added to the -tense affix झ the 3rd Person Plural Atmanepada. But in the Vedas the augment is added to other affixes also.

३५५७ । बहुलं छन्दसि । ७ । १ । ८ ।

रुडागमः स्यात् । 'लोपस्त आत्मनेपदेषु' (३५६३) इति पक्षे तलोपः । 'धेनवो दुह्रे' । लोपाभावे घृत दुह्रते' । 'अदृश्रमस्य' । 'अतो भिस ऐस्' (२०३) ।

3557. The augment 'rut' is diversely applied in the Chhandas.

The त of अत is elided by VII 1 41 S 3563, in one alternative Thus धेनवो दुह्रे ॥ When then there is no elision, we have घृत दुह्रते । So also अदृश्रमस्य ॥ देवा अदुह्र, गन्धर्वा अप्सरसो अदुह्र ॥ Here अदुह्र is the Imperfect (लङ्) plural of दुह् ॥ Thus दुह + झ = दुह् + रत = अदुह्र, the त being elided by VII 1 41 Sometimes, the augment does not take place, as अदुह्रत ॥ Owing to the word बहुल, 'diversely', the augment र is added to other affixes also, than झ ॥ As अदृश्रम in अदृश्रमस्य केतवः ॥ This is the aorist in अङ् of the root दृश by III 1 57. the guna ordained by VII 4 16, does not take place

By VII 1 9 S. 203, ऐस् is substituted for भिस् in the Instrumental Plural after nouns ending in अ But not always so, in the Vedas

३५५८ । बहुलं छन्दसि । ७ । १ । १० ।

'अग्निर्देवेभि' ।

3558. In the Chhandas the substitution takes place diversely

That is ऐस् is substituted for भिस् even after stems which do not end in short अ, as नद्यै, and some times the substitution does not take place even after stems ending in short अ, as, देवेभि., in देवोदेवेभिरागमत् (Rig Veda I 1, 4)

३५५९ । नेतराच्छन्दसि । ७ । १ । २६ ।

स्वमोरदड् न । 'वार्त्रघ्नमितरम्' । 'छन्दसि' किम । इतरत्काष्ठम् । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (३३३२) ।

3559 In the Chhandas, *āt* (or *ad*) is not the substitute of *su* and *am* (Nom and Acc Sg) endings, after *itar*

As इतरमितरमण्डमजायत, वार्त्रघ्नमितरम् ॥ Why in the Vedas ? See इतरत् काष्ठम, इतरत् कुडम ॥

By VII 1 37 S 3332, ल्यप् is substituted for *ktvá* in a compound the first member of which is an Indeclinable but not नञ् ॥ In the Vedas, this is optional.

३५६० । क्त्वापि च्छन्दसि । ७ । १ । ३८ ।

यजमानं परिधापयित्वा ।

3560 In the Chhandas the 'ktvâ' also, as well as lyap, is substituted for ktvâ, after an Indeclinable compound, other than one preceded by the Negative 'nañ'

Thus कृष्णं वासो यजमान परिधापयित्वा ॥

३५६१ । सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । ७ । १ । ३९ ।

'ऋजव सन्तु पन्था.' । पन्थान इति प्राप्ते सुः । 'परमे व्योमन्' । 'व्योमनि' इति प्राप्ते लुक् । धीती । मती । सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घ । 'या सुरथा रथीतमा दिविस्पृशा अश्विना' । 'यौ सुरथौ दिविस्पृशौ' इत्यादौ प्राप्ते आ । 'नताद्ब्राह्मणम' । नतमिति प्राप्ते आत । 'यादेव विद्म तात्वा' । यमिति प्राप्ते । 'न युष्मे वाजबन्धवः' । 'अस्मे इन्द्राबृहस्पती' । युष्मास्वस्मभ्यमिति प्राप्ते शे । उरुया । धृष्णुया । उरुणा धृष्णुनेति प्राप्ते या ।

'नाभा पृथिव्याः' । नाभाविति प्राप्ते डा । 'ता अनुष्ठ्योच्यावयतात्' । अनुष्ठानमनुष्ठा । व्यवस्थावदङ् । आङो ड्या । साधुया । साध्विति प्राप्ते याच् । 'वसन्ता यजेत' । वसन्त इति प्राप्ते आल् । '+इयाडियाजीकाराणामुपसंख्यानम्+' । उर्विया । दार्विया । उरुणा दारुणेति प्राप्ते इया । सुक्षेत्रियेति प्राप्ते डियाच् । 'दृतिं न शुष्कं सरसी शयानम्' । ङेरीकार इत्याहुः । तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु ङीषन्तान्ङेर्लुक् । ईकारादेशस्य सूत्रादरणान्तर मृग्यम् । '+आङयाजयारामुपसंख्यानम्+' । 'प्रबाहवा सिसृतम्' । बाहुनेति प्राप्ते आङादेशः । 'घेर्ङिति' (२४५) इति गुणः । स्वप्नया । स्वप्नेनेति प्राप्तेऽयाच् । 'स नः सिन्धुमिव नावया' । नावेति प्राप्तेऽयार् । रित्स्वरः ।

3561 The following irregular endings are substituted for the various case endings in the Chhandas: (1) 's' of the Nom Sg for 'as' of the Plural, (2) the *luk*-elision of the case endings, (3) the single substitution of the homogeneous long vowel for the end vowel of the stem, (4) â, (5) ât, (6) e (śe) for the ending of the Nom Plural, (7) yâ, (8) â (ḍâ), with the elision of the last vowel and the consonant, if any, that follows it in the stem, (9) yâ (ḍyâ) with the similar shortening of the stem, (10) yâ, (yâch) and (11) 'â' (accent of 'la').

Thus (1) अनृक्षरा ऋजवः सन्तु पन्था (for पन्थानः) Rig Veda X 85 23.

Vârt —It should be stated that case endings replace case-endings promiscuously, as धुरि दक्षिणायाः (for दक्षिणायाम् Rig I 164. 9).

Vârt —One personal ending replaces another personal ending in the Vedas चषालं ये अश्वयूपाय तक्षति (for तक्षन्ति) Rig I. 162 6.

(2) लुक्-elision :—As परमे व्योमन् (Tait-up. II. 1. 1) for व्योमनि । Here is elision of ङि ॥

(3) Lengthening —धीती, मती, सुष्टुती for धीत्या, मत्या and सुष्टुत्या ॥

(4) आ substitute :—As ता सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना ता हवामहे ॥ (Rig Ved. I. 22. 2). Instead of तौ, सुरथौ, दिविस्पृशौ, उभौ, &c. we have ता, सुरथा, &c.

(5) आत्—न ताद् ब्राह्मणम् for न तम् ॥ [illegible] here आ is for अम् ॥

(6) शे—न युष्मे (for युष्मासु) वाजबन्धवः, Rig. VIII. 68. 19. अस्मे (for अस्मासु) इन्द्राबृहस्पती, Rig IV 49 4

(7) या—उरुया, धृष्णुया for उरुणा and धृष्णुना ॥

(8) डा—नाभा (for नाभौ) पृथिव्याः Rig I 143 4.

(9) ड्या—अनुष्ठ्या उच्यावयतात् for अनुष्ठया Ait Br. II. 6. 15. अनुष्ठानेन क्रमेण विशसनं करोतु । The word अनुष्ठा (feminine) is derived from स्था with the affix अङ् (III. 3. 106) and the preposition अनु । In the Instrumental Singular, the टा is replaced by ड्या ॥ But is not the affix अङ् of III. 3 106 set aside in the case of स्था by the specific affix क्तिन् of III 3 95? Not always, for Pâṇini himself has used forms like व्यवस्था (I 1 35) showing that स्था takes the affix अङ् also.

(10) याच्—साधुया for साधु, the elision of सु which was otherwise required does not take place

(11) आल्—वसन्ता यजेत for वसन्ते ॥

Vârt —The following substitutes should also be enumerated, (*a*) ड्या, (*b*) डियाच with the elision of the final vowel and the consonant, if any, that follows it, and (*c*) long ई ॥ As (*a*) उर्विया परिधानम्, for उरुणा so also दार्विया for दारुणा ॥ (*b*) सुक्षेत्रिया for सुक्षेत्रिणा, and सुगात्रिया for सुगात्रिणा ॥ (*c*) दृति न शुष्क सरसी शयानम् (Rig Ved VII 103 2) for सरसि ॥

The word सरसी however may be otherwise explained The ordinary explanation is that ङि (Loc Sing) is replaced by long ई of this Vârtika The word ought to have udâtta on the first syllable, but anomalously the accent falls on the last Thus say those who give this example But as a matter of fact सरसी here is the feminine in ङीष् of सरस ॥ The Loc Sing ङि is elided after it by clause (2) of this sûtra, and it is not an example of the addition of long ई to सरस् ॥ Well, what is then the example of ई substitution of this vârtika ? That must be found out

NOTE —Sâyana also explains सरसी in this way दृतिं न ॥ दृतिमिव शुष्कं नीरसं सरसी महत्सर, सरसी गौरादिलक्षणो ङीष्, सरस्या "सुपां सुलुक" इति सप्तम्या लुक । महति सरसि निर्जले घर्मकाले शयान निवसन्त मण्डूकगण ॥

Vârt —So also (*a*) आङ् (*b*) अयाच and (*c*) अयार as प्रबाहवा सिसृतम् (Rig Ved VII. 62 5), for प्रबाहुना । The उ is gunated to ओ by VII 3 111, and ओ is changed to अव before आ (*b*) स्वप्नया सच सेवनम for स्वप्नेन, (*c*) सिन्धुमिव नावया (Rig Ved I, 97, 8) for नावा ॥ The र् in अयार् regulates the accent

The word आच्छे in the sûtra is compounded of three words आ + आत् + शे, the word आत् = आ + आत् ॥

३५६२ । अमो मश् । ७ । १ । ४० ।

मिबादेशस्यामो मश् स्यात् । मकार उच्चारणार्थः । शित्वात्सर्वादेशः । 'अस्तिसिच –' (२२२५) इति ईट् । वधी वृत्रम्' । अवधिषमिति प्राप्ते ।

3562 For the Personal ending *am* of the First Person Singular (in the Aorist) *ma* (I 1 55) is substituted in the Chhandas.

The अम् here is the substitute of मिप्, and not the accusative singular affix. The म in मश् is for the sake of pronunciation only. As वधी वृत्रम (for अवधिषम्) Rig. I. 165 8 ॥ The इट् augment is diversely elided (VI 4 75). The indicatory श of मश shows that the *whole* of the affix अम is to be replaced The long ई is added by VII 3 96 The substitution of म् for म् is to prevent the change of म् into anusvâra as in VIII. 3 25

NOTE —Thus हन् + च्लि + मिप् = वध + च्लि + मिप् (II 4 43) = वध + सिच + मिप् (III 1. 44) = वध् + इ + सिच् + मिप् = वध् + इट + सिच + अम् (III. 4 101) = वध + इट + सिच् + म् (Present Sûtra) – वध् + इट् + सिच + ईट् + म् (VII 3 96) = वध् + इट + ईट् + म् (VIII 2. 28) = वधीम् (VI 1 101)

३५६३ । लोपस्त आत्मनेपदेषु । ७ । १ । ४१ ।

छन्दसि । 'देवा अदुह्र' । अदुह्रतेति प्राप्ते । 'दक्षिणत. शये' । शेत इति प्राप्ते । 'आत्मने-' इति किम् । 'उत्सं दुहन्ति' ।

3563 In the Chhandas the *ta* of the Atmanepada Personal ending is elided.

As देवा अदुह्र for अदुहत (see VII 1. 8), दक्षिणतः शये for शेते ॥ Owing to the anuvritti of अपि from VII 1. 38, this substitution sometimes does not take place, as आत्मानमनृतं कुरुते ॥ Why in the Atmanepada ? Observe वत्सं दुहन्ति कलशं चतुर्बिलम् ॥

३५६४ । ध्वमो ध्वात् । ७ । १ । ४२ ।

ध्वमो ध्वादित्यादेशः स्याच्छन्दसि । 'अन्तरेवोष्माणं वारयध्वात्' । वारयध्वमिति प्राप्ते ।

3564 In the Chhandas, 'dhvât' is substituted for the Personal ending 'dhvam'

As अन्तरेवोष्माणं वारयध्वात् for वारयध्वम् ॥ Ait Br II 6. 14

३५६५ । यजध्वैनमिति च । ७ । १ । ४३ ।

एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते । 'यजध्वैनं प्रियमेधाः' । 'वकारस्य यकारो निपात्यते' इति वृत्तिकारोक्तिः प्रामादिकी ।

3565 यजध्वैनम् is irregularly formed in the Vedas for यजध्वमेनम् ॥

The word यजध्वम् followed by एनम् loses its final म् in the Vedas As यजध्वैनं प्रियमेधाः (Rig VIII 2 37). The Kâśika adds "that व is also irregularly changed into य", the form would then be यजध्यैनम् ॥ This is, however, a mistake.

३५६६ । तस्य तात् । ७ । १ । ४४ ।

लोटो मध्यमपुरुषबहुवचनस्य स्थाने तात् स्यात् । 'गात्रमस्यानूनं कृणुतात्' । कृणुतेति प्राप्ते । 'सूर्यं चक्षुर्गमयतात्' । गमयतेति प्राप्ते ।

3566 For the ending *ta* of the 2nd Pers. Pl Imperative is substituted 'tât' in the Chhandas.

As गात्रं गात्रमस्या नूनं कृणुतात् (for कृणुत), and ऊवध्यं गोहं पार्थिवं खनतात् (for खनत) Ait Br. II 6 15, 16 अस्मा रक्षः संसृजतात् (= संसृजत), सूर्यं चक्षुर्गमयतात् (= गमयत).

३५६७ । तप्तनप्तनथनाश्च । ७ । १ । ४५ ।

तस्येत्येव । शृणोत ग्रावाणः । शृणुतेति प्राप्ते तप् । 'सुनोतन पचत ब्रह्मवाहसे' । 'दधातन द्रविणं चित्रमस्मे' । तनप् । 'मरुतस्तज्जुजुष्टन' । जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च । 'विश्वे देवासो मरुतो यतिष्ठन' । यत्संख्याकाः स्थेत्यर्थः । यच्छब्दाच्छान्दसो डतिः । अस्तेस्तस्य थनादेशः ।

3567. Also *ta* and *tana* (before both, on account of the indicatory *p* the preceding vowel of the verbal stem is strengthened, or if weak, not shortened), *tana* and *thana* are substituted for the *ta* of the 2nd Pers Pl. Imperative in the Chhandas

Thus (1) शृणोत ग्रावाणः (for शृणुत)

(2) सुनोतन पचत ब्रह्मवाहसे (Rig. Ved V 34. 1) सुनोतन = सुनुत ॥ दधातन द्रविणं चित्रमस्मे (Rig Ved. X. 36 13) The indicatory प् makes तप् and तनप् non-ङित् affixes (I 2. 4)

(3) तन :—मरुतः तज्जुजुष्टन (Rig Ved. VII. 59 9). for जुषध्वम्, the Parasmaipada and Ślu are anomalous

(4) थन :—विश्वेदेवासो मरुतो यतिष्ठन ॥ The pronoun यत् becomes यति by taking the affix डति, and अस 'to be.' अस + त = अस + थन = स्थन ॥ Padamanjari says

"The Rig Vedins read यतिष्ठन instead of यतिष्टन in Samhitâ Pâṭha, of कोधस्तो मरुतो यतिष्टन, and in Pada Pâtha they read it as यतिस्थन ॥ In this case, it is derived from अस् "to be" Kâsikâ derives it from इष् "to wish"

३५६८ । इदन्तो मसि । ७ । १ । ४६ ॥

मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । मसित्ययमिकाररूपचरमावयवविशिष्टः स्यात । मस इगागम स्यादिति यावत् । 'नमो भरन्त एमसि'। 'त्वमस्माक तव स्मसि'। इम. स्म इति प्राप्ते ।

3568 The Personal ending *mas* becomes in the Chhandas *masi* ending with an *i*

Thus नमो भरन्त एमसि (Rig Ved I 1 7), for इम. । त्वमस्माक तव स्मसि (Rig Ved. VIII 92 32) for स्म ॥

The word मसि in the Sûtra is read without any case ending The इ in it is for the sake of utterance only. "मस्" assumes in the Vedas a form which ends in इ । In other words the augment इक् is added to the affix मस् ॥ The sûtra might have been मस इक् ॥

३५६९ । क्त्वो यक् । ७ । १ । ४७ ।

'दिव सुपर्णो गत्वाय' ।

3569 In the Chhandas the Absolutive affix 'ktvâ' gets at the end, the augment 'ya.'

Thus दिवं सुपर्णो गत्वाय (Rig Ved VIII 100 8)

३५७० । इष्ट्वीनमिति च । ७ । १ । ४८ ।

क्त्वाप्रत्ययस्य ईनमन्तादेशो निपात्यते । 'इष्ट्वीनं देवान्' । इष्ट्वेति प्राप्ते ।

3570. In the Chhandas the Absolutive 'ishtvînam' is irregularly used for 'ishtvâ'

To the root यज् is added क्त्वा, and the final आ is replaced by ईनम् ॥ As इष्ट्वीनम् देवान् for इष्ट्वा देवान ॥ The च in the sûtra indicates that there are other forms like this, as पीत्वीनम् for पीत्वा ॥

३५७१ । स्नात्व्यादयश्च । ७ । १ । ४९ ।

आदिशब्दः प्रकारार्थः । आकारस्येकारो निपात्यते । 'स्नात्वी मलादिव' । 'पीत्वी सोमस्य वावृधे' । स्नात्वा पीत्वेति प्राप्ते ।

3571. 'Snâtvî' &c are irregularly formed in the Chhandas.

Thus स्नात्वी मलादिव, for स्नात्वा, पीत्वी सोमस्य वावृधे for पीत्वा ॥ The word आदि 'et cetera' means "of the form of," namely words having the form like 'स्नात्वी, as पीत्वी &c

३५७२ । आज्जसेरसुक् । ७ । १ । ५० ।

अवर्णान्तादङ्गात्परस्य जसोऽसुक्स्यात । देवासः । ब्राह्मणासः ।

3572 After a stem ending in *a* long or short, the affix *as* of the Nom. Pl gets, in the Chhandas the augment *as* (*asuk*) at the end.

Thus ब्राह्मणास पितरः सोम्यासः for ब्राह्मणाः and सोम्याः ॥ Rig VI, 75, 10. ये पूर्वासो य उपरासः (Rig X. 15 2) for पूर्वे and उपरे ॥ So also सुतासः (R I 3. 4).

NOTE:—The form जसेः instead of जसः is out of respect for ancient grammarians

३५७३। श्रीग्रामण्योश्छन्दसि। ७।१।५६।

आमो नुट्। 'श्रीणामुदारो धरुणो रयीणाम्'। 'सूत ग्रामणीनाम्'।

3573 In the Chhandas after the words 'śrî' and 'grâmaṇî' Gen Pl 'âm' gets the augment 'n'

As श्रीणामुदारो धरुणो रयीणाम् (Rig Ved X 45 ᴠ)

NOTE —This sûtra could be well dispensed with by I 4 5 श्री is optionally a Nadi word in the Genitive plural We make the option of that sûtra a vyavasthita vibhâsha, by saying श्री is *always* Nadi in the Vedas, and *optionally* everywhere else As regards सूत ग्रामणीनाम we have सूताश्च ग्रामण्यश्च सूतग्रामण्यः, the Genitive Pl. of which by VII 1 54 will be सूतग्रामणीनाम्, ॥

The necessity of this sûtra will, however, arise if the compound be सूताश्च ते ग्रामण्यश्च सूतग्रामण्यः ॥

३५७४। गोः पादान्ते। ७।१।५७।

'विद्मा हि त्वा गोपतिं शूर गोनाम्'। 'पादान्ते' किम्। 'गवां शता पृक्षयामेषु'। पादान्तेऽपि क्वचिन्न। छन्दसि सर्वेषां वैकल्पिकत्वात्। 'विराजं गोपतिं गवाम्'।

3574 After *go*, when standing at the end of a Rik verse, the augment *na* comes before the Gen Pl âm

As विद्मा हि त्वा गोपतिं शूर गोनाम् (Rig Ved X 47 1), but गवां गोत्रमुदसृजो यदङ्गिरः in the beginning of a Pâda. "All rules have exceptions in the Vedas" is an established maxim, so at the end of a Pâda, sometimes this rule does not apply, as क्षत्राय अजमा अधि विराजं गोपतिं गवाम्। गवां शता पृक्षयामेषु (Rig Ved. I. 122. 7).

३५७५। छन्दस्यपि दृश्यते। ७।१।७६।

अस्थ्यादीनामनङ्। 'इन्द्रो दधीचो अस्थभिः'।

3575 In the Chhandas also, the stems asthi, dadhi, *sakthi* and *akshi* are found to take the substitute *anan* before endings other than those mentioned in VII 1 75 S 322.

Thus the substitute is ordained before endings beginning with a vowel. In the Vedas it comes before affixes beginning with a consonant. As इन्द्रो दधीचो अस्थभिः (Rig Ved I. 84. 13).

३५७६। ई च द्विवचने। ७।१।७७।

अस्थ्यादीनामित्येव। 'अक्षीभ्यां ते नासिकाभ्याम्'।

3576. The acutely accented 'î' is substituted for the final of asthi, dadhi, sakthi and akshi, in the Chhandas, when the case-affixes of the dual follow.

As अर्वं॑ऽश्यान् ते नासिकाभ्याम् ॥ (Rig ved X 163 1) In अर्वौ the augment नुम् is not added to the stem before the vowel beginning ending, because VII 1 73, which ordained नुम, is superseded by the present sûtra, and being once superseded, it is superseded for good (सकृद् गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव) ॥

३५७७ । दृक्स्ववःस्वतवसां छन्दसि । ७ । १ । ८३ ॥

एषां नुम्स्यात्सौ । 'कीदृङ्ङिन्द्र' । स्ववान् । स्वतवान् । उदोष्ठ्यपूर्वस्य' (२४९४) ।

3577 दृश्, स्ववस् and स्वतवस् take the augment *num* before the affix su (Nominative and Vocative Singular) in the Vedas

Thus ईदृङ्, तादृङ् यादृङ्, अदृङ्, स्ववान् स्वतवान्, The स् of ईदृश् (formed by III 2 60), is elided by VIII 2 23, and ङ् substituted for न् by VIII 2 62 The lengthening in स्ववान् and स्वतवान् is through VI 4 14

कीदृङ्ङिन्द्र (Rig Ved X 108 3)

For स्ववान् see Rig, Ved I 35 10, III 54, 12, VI 47 12,

For स्वतवान् see Rig Ved IV 2 6

By VII 1 102 S 2494 उर् is substituted for the final long ॠ of a root when it is preceded by a labial consonant belonging to the root In the Vedas however, there is diversity

३५७८ । बहुलं छन्दसि । ७ । १ । १०३ ।

ततुरिः । जगुरिः । पपुरिः ॥

3578 In the Chhandas, the *ur* substitution for 'ṛi' of a root-stem is diverse.

That is, it takes place even when the preceding letter is not labial, and does not take place even when the letter is labial Thus ततुरि (Rig Ved I 145 3) दूरे ह्यध्वा जगुरिः, and पपुरिः from तॄ गॄ and पॄ ॥ All these words ततुरि, जगुरि and पपुरिः are formed by the affix किन् (III. 1 171)

३५७९ । हु ह्वरेश्छन्दसि । ७ । २ । ३१ ।

ह्वरेर्निष्ठायां, 'ह्रु'आदेशः स्यात । 'अह्रुतमसि हविर्धानम्' ।

3579. *Hru* is substituted for *hvar* (Bhvâdi 978) in the Chhandas before the Participial-affix

As अह्रुतस्य चाह्रुतस्य च, अह्रुतमसि हविर्धानम (Vaj San 1 9) But ह्वृतम् in the classical literature

३५८० । अपरिह्वृताश्च । ७ । २ । ३२ ।

पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते । 'अपरिह्वृताः सनुयाम वाजम्' ।

3580 The word 'aparihvṛitâh is irregularly formed in the Chhandas.

The ह्रु substitution required by the last sûtra, does not take place here As अपरिह्वृताः सनुयाम वाजम (Rig I 100 19). The word being found in the plural number in the Vedas, it is so shown in the sûtra also

३५८१ । सोमे ह्वरितः । ७ । २ । ३३ ।

र्गुणेटौ निपात्येते । 'मा नः सोमो ह्वरितः' ।

3581. *Hwaritah* is irregularly formed from *hvri* in the Chhandas, by guna substitution and 'it' augment, when it refers to Soma.

As मा नः सोमो ह्वरितो, विह्वरितस्त्वम् ।

३५८२ । ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरिति(क्षमिति)वमित्यमितीति च । ७ । २ । ३४ ।

अष्टादश निपात्यन्ते । तत्र 'ग्रसु' 'स्कम्भु' 'स्तम्भु' एषामुदित्त्वान्निष्ठायामिट् प्रतिषेधे प्राप्त इण्निपात्यते । 'युवं शचीभिर्ग्रसितामुञ्चतम्' । 'विष्कभिते अजरे' । 'येन स्वः स्तभितम्' । सत्येनोत्तभिता भूमिः' । स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति ।

'चते याचने' । 'कस गतौ' । आभ्यां क्त इडभाव ।'चत्ता वर्तयन्त्यापः' । 'त्रिधा ह श्यावमश्विना विकस्तम्' 'उत्तानाया हृदयं यद्विकस्तम्' । निपातनबहुत्वापेक्षया सूत्रे बहुवचनं विकस्ता इति तेनैकवचनान्तोऽपि प्रयोगः साधुरेव ।

'शसु' 'शंसु' 'शासु' एभ्यस्तृच इडभाव । 'एकस्त्वष्टुरश्वस्याविशस्ता' । ग्रावग्राभ उत शंस्ता' । 'प्रशास्ता पोता' ।

तरतेर्वृङ्वृञोश्च तृच 'उट्' ऊट्' एतावागमौ निपात्येते । 'तरुतारं रथानाम्' । तरूतारम् । वरुतारम्–वरूतारम् । 'वरूत्रीभि सुशरणो नो अस्तु' । अत्र ङीबन्तनिपातनं प्रपंचार्थम् । वरूतृशब्दो हि निपातितः । ततो ङीपा गतार्थत्वात् ।

उज्ज्वलादिभ्यश्चतुर्भ्यः श्तिप इकारादेशो निपात्यते । 'ज्वल दीप्तौ' । 'क्षर सञ्चलने' । 'टुवमु उद्गिरणे' । 'अम गत्यादिषु' । इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति । तत्र 'क्षमूष् सहने' इति धातुर्बोध्यः । भाषायां तु 'ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिता' । विशसिता–शंसिता–शासिता । तरीता–तरिता । वरीता–वरिता । उज्ज्वलति ॥ क्षरति । पाठान्तरे क्षमति । वमति । अमति ।

3582 In the Chhandas, the following irregular forms are found, some with, and some without the augment 'it'—1 grasita, 2 skabhita, 3 stabhita, 4 uttabhita, 5 chatta, 6 vikastâh, 7 viśastri, 8 śanstri, 9 śâstri, 10 tarutri, 11 tarûtri, 12 varutri, 13 varûtri, 14 varûtrih, 15 ujjvaliti, 16 kshariti, (17 kshamiti,) 18 vamiti and 19 amiti

Of the above nineteen words, 1, 2, 3, and 4 are from roots ग्रसु 'to swallow' (I 661) स्कम्भु 'to stop' (I 414) and स्तम्भु (I 413) all having an indicatory उ, and therefore by VII 2 56 read with VII 2 15, then Nishtha would not have taken इट् ॥ Thus युवंशचीभि र्ग्रसिता (ver ग्रस्त) ममुञ्चतम Rig Ved X 39 13 विष्कभिते अजरे (Rig Veda VI 70 1) (विष्कब्धः), येन स्वस्तभितम् (Rig Ved X 121 5) (= स्तब्धम्), ॥ सत्येनोत्तभिता भूमि. (= उत्तब्ध.) Rig Ved X 85 1. the irregularity is only with the preposition उत्, with other prepositions, the form स्तभित is not employed.

Similarly (5) चत्ता (= चतिता) as in चत्तो इतश्चत्तामुतः (Rig Ved X. 155. 2,) from चते याचने । (6) त्रिधाहश्यावमश्विना विकस्तम् (Rig Veda I. 117 24) उत्तानाया 'हृदयं यद् विकस्तम् । (=विकसितम्) The word vikastâh generally occurs in the plural and is therefore so shown in the Sûtra But the singular is also valid

The forms, 7, 8, and 9 are from the roots शसु हिंसायाम and शंसु स्तुतौ, and शासु अनुशिष्टौ with the affix तृच and no augment, as एकस्त्वष्टुरश्वस्याविशस्ता (Rig

Veda I 162 19) (=विशसिता), उत शम्ता सुविप्रः (Rig Veda I 162 5) (=शंसिता) प्रशास्ता पोता (Rig Veda I 94 6) (=प्रशासितम्) ॥

The forms 10, 11, 12, 13 and 14 are from the roots तृ and वृ (वृङ् and वृञ्) with the affix तृच and the augment उट and ऊट ॥ As तरुतारं or तरूतारं रथानाम् Rig Veda X 178 1 (=तरितारम or तरीतारम), वरुतारम् or वरूतारम् रथानाम् (=वरितारम् or वरीतारम्), वरूत्रीभि सुशरणो नो अस्तु (Rig Veda VII 34 22) वरूत्री. is exhibited in this form of Nom pl of the feminine वरूत्री merely for the sake of showing one form in which it is found another form is अहोरात्राणि वैवरूत्रय । Here the plural is formed irregularly, by taking the word as वरूत्रि ॥ The feminine form could have been easily obtained from वरुतृ, by adding ङीप्, the special mention is explanatory. The rest 15, 16 17, 18 and 19 are from उत-ज्वल, चर् क्षम, वम and अम्, formed with the vikarana शप and the affix of the 3rd Per Sing तिप् इ being substituted for अ of शप्, or शप is elided and the augment इट् is added ॥ As अग्निरुज्ज्वलिति (=उज्ज्वलति), स्तोम क्षमिति (=क्षमति), स्तोक चरिति (=चरति), वः सोमं वमिति (=वमति), अभ्यमिति वरुणः (=अभ्यमति) ॥ Sometimes we have अभ्यमीति, as रायमभ्यमीति ॥

We should read here again VII 2 64 S 2527

३५८२ क ॥ बभूथाततन्थजगृभ्मववर्थेति निगमे । ७ । २ । ६४ ।

विद्मा तमुत्स यत आबभूथ' । 'येनान्तरिक्षमुर्वाततन्थ' । 'जगृभ्मा ते दक्षिणमिन्द्र हस्तम्' । त्वं ज्योतिषा वितमो ववथ । भाषायां तु । बभूविथ । आतेनिथ । जगृहिम । ववरिथेति ।

3582A In the Nigama (Veda) are found the irregular forms बभूथ, आततन्थ, जगृभ्म and ववर्थ ॥

As, विद्मा तमुत्स यत आ बभूथ । येनान्तरिक्षमुर्वा ततन्थ (Rig Veda III. 22 2), जगृभ्माते दक्षिणमिन्द्र हस्तम (Rig Veda X 47 1) त्वं ज्योतिषा वितमो ववर्थ ।

In the classical literature, we have बभूविथ, आतेनिथ, जगृहिम and ववरिथ respectively

३५८३ । सनिससनिवांसम् । ७ । २ । ६९ ।

सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसौ इट । एत्वाभ्यासलोपाभावश्च निपात्यते ।

'+ पावकादीनां छन्दसि +' प्रत्ययस्थात्कादित्व नेति वाच्यम् । 'हिरण्यवर्णाः शुचयः पावकाः' ।

3583 The form *sasanivānsam* with *sanim* is irregularly formed

This is derived from सनोति or सनति root with the affix Kvasu As अग्निं त्वाग्ने सनि ससनिवांसम ॥ The augment इट् is added, there is no change of अ of सन् to ए, nor the elision of the reduplicate before वस ॥ The other form is सेनिवांसम् when not preceded by सनिम् ॥ This form ससनिवांसम् is Vedic, in the classical literature we have सेनिवांसम् ॥

Vārt —The feminine of पावक &c in the Vedas does not take इ for अ ॥ As हिरण्यवर्णाः शुचयः पावकाः, यासु अ लोमकाः, अलकाः &c But पाविकाः, अलोमिकाः in the classical literature (See VII 3 45 S 461)

३५८४ । घोर्लोपो लेटि वा । ७ । ३ । ७० ।

'दधद्रत्नानि दाशुषे' । 'सोमो ददद्गन्धर्वाय' । 'यदग्निरग्नये ददात्' ।

3584 The final of 'dâ' and 'dhâ' ('ghû roots) may optionally be elided in the Subjunctive 'leṭ'

As दधद्रत्ना दाशुषे (Rig I 35 8) सोमो ददद् गन्धर्वाय (Rig X 85 41) But also यदग्निरग्नये ददात् ॥

३५८५ । मीनातेर्निगमे । ७ । ३ । ८१ ।

शिति ह्रस्वः । 'प्रमिणन्ति व्रतानि' । लोके प्रमीणाति । 'अस्तिसिचोऽपृक्ते' (२२२५) ।

3585 In the Chhandas 'mî' is shortened before a 'śit' affix

As प्रमिनन्ति व्रतानि (Rig X 10 5) The न becomes ण (प्रमिणन्ति according to Kâśika) by VIII 4 15 Why in the Chhandas ? Observe प्रमीणाति ॥

By VII. 3 96 S 2225 a single consonantal sârvadhâtuka affix gets the augment ईट्, after अस् (अस्ति) and after the Aorist character सिच् ॥ But in the Chhandas, there is diversity.

३५८६ । बहुलं छन्दसि । ७ । ३ । ९७ ।

'सर्वमा इदम्' ।

अस्तेर्लङ्, तिप्, ईडभाव अपृक्तत्वाद्धल्ङ्यादिलोपः । रुत्वविसर्गौ । 'भोभगो –' (१६७) इति यत्वम् । 'लोपः शाकल्यस्य' (६७) इति यलोपः । गोभिरक्षा रक्षपालने लुङ्, 'अतो ल्रान्तस्य' (२३३०) इति वृद्धिः । इडभावश्छान्दसः । अट शेषं पूर्ववत् ॥

'ह्रस्वस्य गुणः' (२४२) । 'जसि च' (२४१) । '* जसादिषु छन्दसि वा वचनं प्राक् णौ चङ्युपधायाः *' । 'अधा शतक्रत्वो यूयम्' शतक्रतवः । 'पश्वे नृभ्यो यथा गवे' । पशवे । 'नाभ्यस्तस्याचि–' (२५०३) इति निषेधे । '* बहुलं छन्दसीति वक्तव्यम् *' । 'आनुषग्जुजोषत्' ।

3586 In the Chhandas, a single consonantal Sârvadhâtuka affix gets diversely the augment 'it' after *as* and *sich* ॥

As आप एवेदं सलिलं सर्वमाः ॥ Here आः is used instead of आसीत् ॥

NOTE —आः is thus evolved अ+अस+लङ्+तिप । The ई that would have come by S 2225 does not come So we have अ+अस्+त = आस् (the final consonant त् is elided by VI 1 68 S 252) Then the स् is changed to रु and then रु to visarga: and we have आः । Then in sanhita, the visarga or रु is changed to य by VIII 3 17 S 167 and we get आय् ॥ Then this य् is elided by VIII. 3. 19 S, 67, and so we have सर्वम् आ इदम् ॥

Similarly in गोभिरक्षा । It is the aorist (लुङ्) of रक्ष् 'to protect' The Vṛiddhi takes place by S 2330 The absence of इट् is the Vaidic irregularity

By VII 3 108, a guna is substituted for short इ and उ in the Vocative Singular, and also in the Nominative Plural by VII 3 109 The following Vârtika makes an exception to these as well as the other rules of the third chapter of the Seventh Book from sûtra 108 downwards

Vârt —All these rules up to the end of this (7th Book, 3rd) chapter are of optional application in the Vedas. As अम्बे or अम्ब, पूर्वीं अर्विं or पूर्वीं अर्वीं, अधा शतक्रत्वः (Rig Veda X 97. 2) or शतक्रतवः पश्वे नृभ्यो यथा गवे (Rig Veda I. 43 2) or पशवे, नृभ्यः, किकिदीव्या, किकिदीविना ॥

By VII 3 87 the guna is not substituted for the penultimate short इ, उ ऋ in the reduplicated form of a root, before a Sârvadhâtuka affix beginning with

a vowel and having an indicatory ङ ॥ The following Vârtika makes an exception

Vârt.—There is diversity in the Vedas As अनुषक् जुजोषत (Rig Veda III. 4 10) the लेट् of जुष् ॥

३५८७ । नित्यं छन्दसि । ७ । ४ । ८ ।

छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋन्नित्यम् । अवीवृधत् ।

3587 Short ऋ is invariably substituted in the Chhandas for the penultimate ऋ or ॠ of a Causative stem, in the Reduplicated Aorist

As अवीवृधत् (Rig Veda VIII 8 8) अवीवृधताम्, अवीवृधन ॥

३५८८ । न च्छन्दस्यपुत्रस्य । ७ । ४ । ३५ ।

पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न । मित्रयु । 'क्याच्छन्दसि' (३१५०) इति उः । 'अपुत्रस्य' किम् । 'पुत्रीयन्तः सुदानवः ।

'+ अपुत्रादीनामिति वाच्यम् +' । 'जनीयन्तोऽन्वग्रवः' । जनमिच्छन्तीत्यर्थः ।

3588 In the Chhandas the rules causing lengthening, or the substitution of long 'î' for the final vowel of the stem before the affix kyach, do not apply, except in the case of *putra*

Thus मित्रयु, सखेयु, देवाञ् जिगाति सुम्नयुः ॥ But पुत्रीयन्तः सुदानवः (Rig VII 96 4)

Vârt.—It should be rather stated पुत्र and the rest as जनीयन्तोऽन्वग्रवः ॥ See III 2 170, for the affix उ ॥

३५८९ । दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति । ७ । ४ । ३६ ।

एते क्यचि निपात्यन्ते । भाषाया तु उप्रत्ययाभावाद्दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति ।

3589 In the Chhandas दुरस्यु, द्रविणस्यु, वृषण्यति and रिषण्यति are irregularly formed

As अविषेना दुरस्युः, (= दुष्टीयति with the affix क्यच् added to दुष्ट), द्रविणस्यु विपन्यया (द्रविणीयति, here द्रविणस् is substituted for द्रविण similarly) वृषण्यति = वृषीयति (वृषण् substituted for वृष) ॥ रिषण्यति = रिष्टीयति (रिषण् substituted for रिष्ट)॥

३५९० । अश्वाघस्यात् । ७ । ४ । ३७ ।

'अश्व' 'अघ' एतयो क्यच्यात्स्याच्छन्दसि । 'अश्वायन्तो मघवन्' । 'मा त्वा वृका अघायवः' । 'न च्छन्दसि-' (३५८८) इति निषेधो नेत्वमात्रस्य । किंतु दीर्घस्यापीति । अत एव सूत्रं ज्ञापकम् ।

3590 In the Chhandas, long 'â' is substituted for the final of aśva and *agha*, before the Denominative *kyach*

As अश्वायन्तो मघवन् (Rig VII 32 23), मा त्वा वृका अघायवो विदन् ॥ This also indicates that other words do not lengthen their vowel in the Vedas before क्यच्, as taught in VII 4 35 S. 3588 See Vârtika to III 1 8 The word अघायु occurs in Rig I 120 7, 27; 3.

३५९१ । देवसुम्नयोर्यजुषि काठके । ७ । ४ । ३८ ।

अनयो' क्यचि आतस्याद्यजुषि कठशाखायाम । 'देवायन्तो यजमाना:' । 'सुम्नायन्तो हवामहे' । इह यजु:शब्दो न मन्त्रमात्रपर, किं तु वेदोपलक्षक । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति । किं च ऋग्वेदेऽपि भवति । यद्येन्मन्त्रो यजुषि कठशाखायां दृष्ट' । 'यजुषि' इति किम् । 'देवाञ्जिगाति सुम्नयु.' । बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्त' ।

3591 The long 'â' is substituted for the final of *deva* and *sumna* before the Denominative *kyach* in the Yajush Kâthaka.

As देवायन्तो यजमान' सुम्नायन्तो हवामहे । Why in the Yajus ? Observe देवाञ्जिगाति सुम्नयु. । According to Haradatta the author of Padamanjari, this counter example is taken from the Katha Shâkhâ of the Rig Veda, for the Rig Veda also has a Katha Shâkha Why do we say in the Kâthaka ? Observe सुम्नयुरिदमासात् ।

In this sûtra, Yajush is not confined merely to the Mantra, but means the Veda in general. Therefore the rule will apply to a Mantra of the Rig Veda also, if it is found in the Yajur Veda That is, the rule will apply to a Mantra of the Rig Veda also, in the Rig Veda, if it be such a Mantra which is common to the Rig and Yajur Veda Katha Shâkhâ.

३५९२ । कव्यध्वरपृतनस्यर्चि लोपः । ७ । ४ । ३९ ।

'कवि' 'अध्वर' 'पृतना' एषामन्त्यस्य लोप स्यात्क्यचि परे ऋचिविषये । 'स पूर्वया निविदा कव्यतायो' । 'अध्वर्युं वा मधुपाणिम्' । 'दमयन्त पृतन्यून्' । 'दधातेर्हि' (३०७८) । जहातेश्च क्त्वि (३३३१) ।

3592 In the Rig Veda, the final of कवि, अध्वर and पृतना is dropped before the Denominative क्यच् ।

स पूर्वया निविदा कव्यतायो: (Rig I 96 2) अध्वर्युं वा मधुपाणिम् (Rig Veda X. 41 3), दमयन्तमपृतन्यून् (Rig Veda X 74 5)

By VII 4. 42 S 3076 हि is substituted for the धा of दधाति before an affix beginning with त् and having an indicatory क् । By VII 4. 43, S. 3331 हि is substituted for the हा of जहाति before क्त्वा । But in the Vedas there is diversity

३५९३ । विभाषा छन्दसि । ७ । ४ । ४४ ।

'हित्वा शरीरम्' । हीत्वा वा ।

3593 *Hi* is optionally substituted for 'hi' before 'ktvâ' in the Chhandas

As हित्वा शरीर यातव्य, or हीत्वा also The long ई of VI. 4 62 deos not take place also as a Vedic irregularity

३५९४ । सुधितवसुधितनेमधितधिष्वधिषीय च । ७ । ४ । ४५ ।

'सु' 'वसु' 'नेम' एतत्पूर्वस्य दधातेः क्ते प्रत्यय इत्व' निपात्यते । 'गर्भे माता सुधितं वक्ष- णासु' । वसुधितमग्नौ । नेमधिता न पौंस्या । 'त्विम्यपि दृश्यते' । 'उत श्वेतं वसुधितं निरेके । धिष्वावज्रं दक्षिण इन्द्र हस्ते' । धत्स्वेति प्राप्ते । 'सुरेता रेतो धिषीय' । आशीर्लिङ् । इट् । 'इटोऽत्' (२२५७) धासीयेति प्राप्ते । 'अपो भि' (४४२) ।

'* मासश्छन्दसीति वक्तव्यम् *' । माद्भि. शरद्भि' । 'स्ववः स्वतवसोरुषसश्चेष्यते' । स्वतवद्भिः । अवतेरसुन् । शोभनमवो येषां ते स्ववसस्तैः । 'तु' इति सौत्रो धातुस्तस्मादसुन् । स्वं

तवो येषा ते स्वतवद्भि. । 'समुषद्भिरजायथा.' । 'मिथुनेऽसि । 'वसे किच्च इत्यसिप्रत्यय इति हरदत्त. । पञ्चपादीरीत्या तु 'उष कित्' इति प्राग्व्याख्यातम । 'न कवतेर्यङि' (२६४१) ।

3594 The following five Vedic forms are irregularly formed, namely सुधित, वसुधित, नेमधित, धिष्व and धिषीय ॥

Of these five, सुधित, वसुधित and नेमधित are formed from the root धा with the affix क्त, preceded by सु, वसु and नेम ॥ As गर्भं माता सुधितम (Rig Veda X 27 16) (= सुहितम), ॥ वसुधितमग्नौ जुहोति (=वसुहित) The word वसुधित is a Karmadhâraya compound, according to Haradatta In the Veda Bhâsya it is explained as वसूना धातारं प्रदातारम ॥ The form वसुधिति with क्तिन् is also found in the Vedas As —उतश्वेतं वसुधिति निरेके (Rig Veda VII 90 3) नेमधिता न पौंस्या (Rig Veda X 93 13) (= नेमहिता) ॥ नेम means 'half' धिष्व is Imperative 2nd Per. Sg of धा, there is no reduplication, as धिष्व सोमम् = धत्स्व ॥ धिष्व वज्रम् हस्त आदक्षिणत्राभि. (Rig Veda VI 18 9) धिषीय is Benedictive Atmanepada 1st Per Sg of धा, the regular form being धासीय ॥ See III 4 106

By VII 4 48 S 442, त् is substituted for the final of the stem अप before a case ending beginning with भ ॥ In the Vedas this substitution takes place in the case of मास &c

Vârtika —The त substitution takes place in the Chhandas for the final of मास &c Thus माद्भिः, अद्भि ॥ मास becomes मास् by VI 1 63

Ishti .—The त् substitution should take place, according to Patanjali, after स्ववस्, स्वतवस् and उषस् also As स्ववद्भि· । स्ववस is derived from अव् 'to protect,' with the affix असुन् and the prefix सु ॥ It means 'he whose protection is good' See Rig Veda I. 35, 10, &c

The word स्वतवस is derived from the root तु with the affix असुन् and Prefix स्व॥ It means धनवान् or wealthy As स्वतवद्भि. । See S 3633 Similarly उषद्भि. as in समुषद्भि अजायथा. (Rig Veda I 6 3)

This word is formed by the affix असि which is treated as कित् after वस् (See Unâdi IV 222 and 233) This is according to the opinion of Haradatta, who follows evidently the lost Unadi Sûtras which consisted of Ten Padas In the present Unâdi Sûtra of Five Padas we have उष· कित् and not वसे कित ॥ वसति सूर्येण सह इति उषा ॥

By VII 4 63 S 2641, the Palatal is not substituted for the Guttural of the reduplicate of कु (कवते) in the Intensive In the Vedas this prohibition applies to the root कृष् also

३५९५ । कृषेश्छन्दसि । ७ । ४ । ६४

यङ्यभ्यासस्य चुत्व न । करीकृष्यते ।

3595 The Palatal is not substituted for the Guttural of the reduplicate of 'krish' in the Chhandas, when in the Intensive

As करीकृष्यते यज्ञकुणप , otherwise चरीकृष्यते कर्षोत्रल ॥

३५९६ । दाधर्ति दर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतवरीवृजन्मर्मृज्यागनीगन्तीति च । ७ । ४ । ६५ ।

एतेऽष्टादश निपात्यन्ते। आद्यास्त्रयो धृङो धारयतेर्वा।

भवतेर्यङ्लुगन्तस्य गुणाभावः। तेन भाषायां गुणो लभ्यते।

तिजेर्यङ्लुगन्तात्तङ्। इयर्तेर्लटि हलादि शेषापवादो रेफस्य लत्वमित्त्वाभावश्च निपात्यते। 'अलर्षि युध्म खजकृत्पुरन्दर'। सिपा निर्देशो न तन्त्रम्। 'अलर्ति दक्ष उत'।

फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीगागमो निपात्यते। 'अनुवापनीफणत्'।

स्यन्देः सम्पूर्वस्य यङ्लुकि शतर्यभ्यासस्य निक्। धातुसकारस्य षत्वम्।

करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः। 'करिक्रत्'।

क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च। 'कनिक्रदज्जनुषम्'। अक्रन्दीदित्यर्थः।

'बिभर्तेरभ्यासस्य जश्त्वाभावः। 'वि यो भरिभ्रदोषधीषु'।

ध्वरतेर्यङ्लुगन्तस्य शतर्यभ्यासस्य विगागमो धातोरृकारलोपश्च। 'दविध्वतो रश्मयः सूर्यस्य'।

द्युतेर्यङ्लुगन्तस्य सम्प्रसारणाभावोऽत्त्वं विगागमश्च। 'दविद्युतद्दीद्यच्छोशुचानः'।

तरतेः शतरि श्लावभ्यासस्य रिगागमः। 'सहोर्जा तरित्रतः'। सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य।

वृजे शतरि श्लावभ्यासस्य रीक्।

मृजेर्लिटि णलभ्यासस्य रुक धातोश्च युक्। गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च। 'वशीयन्ती वेदा गनीगन्ति कर्णम्'।

3596. In the Chhandas are found the following eighteen irregularly reduplicated forms —1 dâdharti, 2 dardharti, 3 dardharshi, 4 bobhûtu 5 tetikte, 6 alarshi, 7 â panîphanat, 8 sam sanishyadat 9 karikrat' 10 kanikradat, 11 bharibhrat, 12 davidhvatah, 13 davidyutat, 14 taritratah, 15 sarîsrpatam, 16 varîvrjat, 17 marmrjya and 18 â ganîganti.

The word छन्दसि is drawn in to this sûtra, by force of च ॥ The form दाधर्ति, is either from the Causative of the root धृङ् अवस्थाने or from धृञ् in the श्लु or यङ् लुक there is lengthening of the abhyâsa and elision of णिच् ॥ (2) So also दर्धर्ति is the form in ślu, with रुक् augment of the abhyâsa. (3) दर्धर्षि if it be a form of यङ् लुक there is no irregularity. (4) बोभूतु is from भू in the Intensive (यङ् लुक्) Imperative, irregularly without guṇa (6) अलर्षि is form the root ऋ (इयर्ति) in Present, 2nd Person, the र् of abhyâsa is not elided, though required by VII 4 60, and this र् is changed to ल irregularly This form is found in the 3rd Person also as अलर्ति दक्ष ॥ अलर्षि युध्म खजकृत्पुरन्दरः (Rig Veda VIII 1 7). अलर्ति दक्ष उत (Rig Veda VIII 18 8) (7) आ पनीफणत् is from फण् with आ augment and शतृ affix is added to यङ् लुक, and in the reduplicate नी is added (8) संसनिष्यदत् is from स्यन्द with the Preposition सम्, in the Intensive yan luk, with शतृ affix, निक् being added in the abhyâsa, the root स is changed to ष ॥ The Preposition सं is not absolutely necessary, with other Prepositions also we have this form as आ सनिष्यदत् ॥ (9) करिक्रत् is from कृ (करोति), in the Intensive yań luk, with शतृ, in the abhyâsa there is no palatal change (VII. 4 62) and रि is added to the reduplicate (10) कनिक्रदत् from क्रन्द in the Aorist with अङ् reduplication, there is no chutva (VII 4 62) of the reduplicate, and the augment नि is added. In the classical literature, the form is अक्रन्दीत् ॥ कनिक्रदज्जनुषं (Rig Veda II. 4. 4). (11) भरिभ्रत् from भृ (बिभर्ति) in yań luk with शतृ, without ज of VII. 4. 76,

without jaśtva, and चि is added to the reduplicate चिवेर भरिभ्रोचषीषु (Rig Veda II 4 4) (12) दोष्वत from ध्वृ (ध्वरते) in the yañ luk, śatri, plural number Nominative T'e चि is added to the reduplicate, the ऋ is elided, दविध्वत रश्मय सूर्यस्य ॥ (Rig Veda IV 13 4) (13) दविद्युतम् is from dyut, yan luk with śati, there is no vocalisation of the reduplicate, with अ change and चि augment (14) तरित्रत from तृ (तरति) with slu śati, genitive singular and रि added to abhyâsa सहोर्जा तरित्रत (Rig Veda IV, 40 3) (15) सरीसृपत from सृप् with slu śati, Accusative with रो added to abhyâsa (16) वरीवृजत from वृज with slu, śata and री augment (17) मर्मृज from मृज with लिट् (Perfect) णल, म added to abhyâsa, and ष added to the root, and there is no vriddhi, because there is no short penultimate now In fact VII 2 114 is to be qualified by the words लघूपध from VII 3 86 (18) आ गनीगन्ति is from गम with the Preposition आ, in the Perfect, with slu, there is no chutva (VII 4 62), and augment नी is added वदयन्ती वेदा गनीगन्ति कर्णम् ॥ (Rig Veda VI 75 3)

The word इति in the aphorism indicates that other forms, similar to these, are also to be included

३५९७ । ससूवेति निगमे । ७ । ४ । ७४ ॥

सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते । 'गृष्टिः ससूव स्थविरम्' । सुषुवे इति भाषायाम् ।

3597 In the Chhandas sasûva is irregularly formed in the Perfect.

It is derived from सू । Thus गृष्टि ससूव स्थविर otherwise सुषुवे । Rig Veda IV. 18 10.

३५९८ । बहुलं छन्दसि । ७ । ४ । ७८ ।

अभ्यासस्येकारः स्याच्छन्दसि । 'पूर्णा विवष्टि' । वशेरेतद्रूपम् ।

3598 'I' is diversely substituted in the Chhandas for the vowel of the reduplicate, in the Reduplicated Present-form.

As पूर्णा विवष्टि (from वश्)

इति सप्तमोऽध्याय ।

CHAPTER VIII.

३५९९ । प्रसमुपोदः पादपूरणे । ८ । १ । ६ ॥

एषां द्वे स्तः पादपूरणे । 'प्रप्रायमग्निः' । 'संसमिद्युवसे' । 'उपोप मे परामृश' । 'किं नोदुदु हर्षसे' ।

3599. *Pra, sam, upa*, and *ut* are repeated, when by so doubling, the foot of a verse is completed

As प्र प्रायमग्निर्भरतस्य शृण्वे (Rig VII 8 4), संसमिद्युवसे वृषन् । (Rig Veda X 191 1) उपोप मे परामृश (Rig Veda I 126 7), किं नोदुदु हर्षसे दातवाउ (Rig Veda IV, 21. 9).

३६०० । छन्दसीरः । ८ । २ । १५ ॥

इवर्णान्तादिरेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । 'हरिवते हर्यश्वाय' । गीर्वान् ॥

3600 In the Chhandas *v* is substituted for the *m* of *mat*, when the stem ends in *i*, î or *r*.

As, हरिवते हर्यश्वाय (Rig Veda III 52. 7). Of the stems ending in र we have गीर्वान् &c

३६०१ । अनो नुट् । ८ । २ । १६ ॥

अन्नन्तान्मतोर्नुट् स्यात् । 'अक्षण्वन्त' कर्णवन्त' । 'अस्थन्वन्तं यदनस्था बिभर्ति' ।

3601. The affix *mat* gets the augment 'nut' in the Chhandas, after a stem ending in *an*

As अक्षण्वन्त. कर्णवन्तः सखाय (Rig Veda X 71. 7) अस्थन्वन्तंयदनस्था बिभर्ति (Rig Veda I 164 4)

३६०२ । नाद्घस्य । ८ । २ । १७ ॥

नान्तात्परस्य घस्य नुट । 'सुपथिन्तर' ।

'+भूरिदाव्नस्तुड्वाच्य +' । 'भूरिदावत्तरो जन' ।

'+ ईद्रथिन. + । 'रथीतर' । 'रथीतम रथीनाम्' ।

3602 In the Chhandas, the affixes *tar* and *tam* receive the augment nut after a stem in *n*.

The affixes तरप् and तमप are called घ। Thus सुपथिन् + तर = सुपथि + तर (VIII. 2 7) = सुपथि + न्तर (VIII. 2 17) = सुपथिन्तर· ।

Vârt —The augment तुट् is added to these affixes after भूरिदावन्; as भूरिदावत्तर (III 2 74, the affix is वनिप्) जन (Rig Veda VIII 5 39)

Vârt —Long ई is the substitute of the final of रथिन् before तर and तम । The word रथिन् is formed by the affix इनि in the sense of मतुप् । The final न् is first elided by VIII 2 7, and then for the short इ of रथि the long ई is substituted by the present vârtika If the long ई were substituted for the final न् of रथिन् as रथिई + तर, then this long ई being asiddha, it could not be compounded by ekâdeśa with the preceding इ into ई and the form would always remain रथिईतरः । As रथीतरः, and रथीतम रथीनाम् (Rig Veda I 11 1). Or this ई may be considered to have come after रथ in the sense of मतुप् ।

३६०३ । नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि । ८ । २ । ६१ ॥

सदेर्नञ्पूर्वात्रि पूर्वाच्च निष्ठाया नत्वाभावो निपात्यते । 'नसत्तमञ्जसा' । निषत्तमस्य चरतः' । असन्न निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तम् । प्रतूर्तमिति त्वरतेः । तुर्वीत्यस्य वा । सूर्तमिति सृ' इत्यस्य । गूर्तमिति गूरी' इत्यस्य ।

3603 In the Chhandas we have the following irregular Participles · nasatta, nishatta, anutta, pratûrtta, sûrtta and gûrtta.

The words नसत्त and निषत्त are derived from the root सद preceded by न and नि, and there is not the न change of VIII 2 42. Thus नसत्तमञ्जसा ॥ In the classical literature we have असन्नम् ॥ So also निषत्त· in the Vedas, as in निषत्तमस्य चरतः (Rig Ved 1 146 1) but निषण्ण in the classical literature The word अनुत्त is from उन्द with the negative नञ् ॥ The option of VIII 2 56 does not apply here As अनुत्तमा ते मघवन् (= अनुन्नम) ॥ प्रतूर्तम् is from त्वर् or तुर्व, as प्रतूर्तं वाजिनम् (= प्रतूर्णम) ॥ When it is derived from त्वर् then ऊट् is added by VI 4 20, and when from

सुर्वं, then VI 4 21 is applied सूर्त्त is from स्, the ऋ is changed to उ irregularly, as सूर्त्तागाव: = सृतागाव: ॥ गूर्त्त is from गॄ as गूर्त्तं अमतस्य (= गूर्णी) ॥

३६०४ । अम्नरूधरवरित्युभयथा छन्दसि । ८ । २ । ७० ॥

रुर्वा रेफो वा । अम्नएव–अम्न रेव । ऊध एव–ऊधरेव । अव एव–अवरेव ।

3604 In the Chhandas, both *ru* and *ra* are substituted for the final of amnas, ûdhas, and avas

Thus अम्न एव or अम्नरेव, ऊध एव or ऊधरेव, अव एव or अवरेव ॥ When रु is substituted for the finals, this रु is replaced by य by VIII, 3. 17, which is elided by VIII 3 19 The word अम्नस means 'a little', and अव, 'protection'

३६०५ । भुवश्च महाव्याहृतेः । ८ । २ । ७१ ॥

भुव इति–भुवरिति ।

3605 In the Chhandas, *ru* and *ra* may replace the final of the word 'bhuvas' when used as a mahâ vyâhriti

Thus भुवरित्यन्तरिक्षम् or भुव इत्यन्तरिक्षम् ॥ The mahâ vyâhritis are three भूः, भुव and स्व ॥

३६०६ । ओमभ्यादाने । ८ । २ । ८७ ॥

ओमश्प्लुतः स्यादारम्भे । 'ओ३म अग्निमीले पुरोहितम । अभ्यादाने किम् । ओमित्येकाक्षरं ब्रह्म ।

3606 The vowel in *om* is pluta in the beginning of a sacred text

The word अभ्यादानं means the commencement of a sacred mantra or vedic text Thus ओ३म् अग्निमीळे पुरोहित यज्ञस्य देवमृत्विज ॥ (Rig I 1 1)

Why do we say "in the beginning"? Observe ओमित्येतदक्षरमुद्गीथमुपासीत (Chhândogya Upanishad I 1 1) Here ओम is not used to indicate the commencement of a Text or Mantra, but is itself the subject of comment

३६०७ । ये यज्ञकर्मणि । ८ । २ । ८८ ॥

ये३ यजामहे । 'यज्ञ–' इति किम् । ये यजामहे ।

3607 The vowel of *ye* becomes pluta in a sacred text, when it is employed in a sacrificial work.

Thus ये३यजामहे ॥ Why do we say when employed in a sacrificial work? Observe ये यजामह इति पञ्चाक्षरम्. "Ye yajimahe" consists of five syllables Here it is a simple recitation

३६०८ । प्रणवष्टेः । ८ । २ । ८९ ॥

यज्ञकर्मणि टेरोमित्यादेश स्यात । 'अपां रेतांसि जिन्वतो३म' । 'टे.' किम् । हलन्तेऽन्त्यस्य मा भूत् ।

3608. In a sacrificial work, ओ३म् is substituted for the final vowel, with the consonant, if any, that may follow it, of a sentence

The word यज्ञकर्मणि is understood here also The word प्रणव means ओम ॥ It is the name given to this syllable. This ओम् is substituted for the final letter.

(टि) of that word which stands either at the end of a Pâda of a sacred hymn or at the end of a hemistich of such Rik Thus for अपा रेतांसि जिन्वति (Rig. VIII 44 16), we may have अपा रेतांसि जिन्वतो३म् ॥ So also for देवान् जिगाति सुम्नयुः (Rig III 27 1), we may have देवान् जिगाति सुम्नयो३म् ॥

The word टि is repeated in this aphorism in spite of its anuvritti from VIII. 2 82, to indicate that ओम् replaces the *whole* of the last syllable, with its vowel and consonant Had टि not been repeated, then by the rule of अलोऽन्त्यस्य, the final *letter* only of the टि portion of a sentence would have been replaced. Thus in सुम्नयुः the visarjaniya alone would have been replaced

When not employed in connection with sacrificial works, there is no such substitution Thus in the simple reading of the Vedas, we should always recite अपा रेतांसि जिन्वति ॥

३६०९ । याज्यान्तः । ८ । २ । ९० ॥

ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । 'जिह्वामग्ने चकृषे हव्यवाहा३ म्' ॥ 'अन्त' किम् । 'याज्यानामृचा वाक्यसमुदायरूपाणां प्रति वाक्यं टेः स्यात् । सर्वान्त्यस्य चेष्यते ।

3609 The last vowel at the end of Mantras called Yâjya, when employed in sacrificial works, is pluta and has the Acute.

Thus स्तोमैर्विधेमाग्नये३ (Rig VIII 43 11), जिह्वामग्ने चकृषे हव्यवाहा३म् (Rig. X, 8 6).

Why do we say 'at the end'? There are some Yâjya hymns, consisting of several sentences The final vowel (टि) of every sentence would have become pluta, in such a hymn. To prevent it, the word "anta" is used, so that the final vowel of the hymn at the end of all, becomes pluta.

३६१० । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । ८ । २ । ९१ ॥

एषामादेः प्लुतो यज्ञकर्मणि । 'अग्नयेऽनुब्रू३हि' । 'अग्नये गोमयानि प्रे३ष्य' । 'अस्तु श्रौ३षट्' । 'सोमस्याग्ने वीही वौ३षट्' । 'अग्निमा३वह' ।

3610 In a sacrificial work, the first syllable of ब्रूहि, प्रेष्य, श्रौषट् वौषट् and आवह is pluta.

Thus अग्नयेऽनुब्रू३हि (Maitr S I 4 11), अग्नये गोमयानि (or नि) प्रे३ष्य, अस्तु श्रौ३षट्, सोमस्याग्ने वीहीः वौ३षट् अग्निमा३वह ॥

So also in पित्र्यायामनुस्व३धा on the analogy of ब्रूहि, so also अस्तुस्व३धा ॥ The word वौषट् is illustrative of the six forms वषट्, वौषट्, वाषट्, वौट्, वाट् वट् ॥

But there is no prolation in आवह देवान् यजमानाय, आवह जात वेदः ॥

३६११ । अग्नीत्प्रेषणे परस्य च । ८ । २ । ९२ ॥

अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात्परस्य च । 'ओ३श्रा३वय' । नेह । 'अग्नीदग्नीन्विहर । बर्हि स्तृणीहि' ।

3611. In an order given to Âgnîdhra priest, the first syllable as well as the succeeding syllable is pluta.

In a Yajña, the principal priests (ritvij) are four, Adhvaryu, Udgâtâ, Hotâ and Brahmâ, Every one of these has three subordinate priests (ritvij) under him.

The duty of Âgnidhra is to kindle the sacrificial fire. In a summons or call (प्रेषण) made by the Adhvaryu, who is the Director of ceremonies, to the Âgnîdhra to perform the functions of Âgnidh, both syllables become pluta.

The word अग्नीत् प्रेषण is a compound = अग्नीधः प्रेषणम् "a call or summons relating to Agnidh duty"

Thus आ ३ श्रा ३ वय, औ३ श्रा ३ वय । The pluta takes place only in these examples, therefore, not here, as अग्नीदग्नीन् विहर, बर्हिः स्तृणीहि ।

३६१२ । विभाषा पृष्ट प्रतिवचने हेः । ८ । २ । ९३ ॥

प्लुत । अकार्षीः कटम् । अकार्षं ही३ । अकार्षं हि । 'पृष्ट-'इति किम् । 'कट करिष्यति हि' । हे' किम् । करोमि ननु ।

3612 'Hi' at the end of an answer to a question may optionally be pluta

Thus Q अकार्षीः कट देवदत्त ? Ans अकार्षं हीँ ३ or अकार्षं हि ।

Why do we say "in answer to a question" ? Observe कट करिष्यति हि ।

Why do we say हे. 'of हि' ? Observe करोमि ननु ।

३६१३ । निगृह्यानुयोगे च । ८ । २ । ९४ ॥

अत्र यद्वाक्यं तस्य टेः प्लुतो वा । 'अद्यामावास्येत्यात्थ३' । अमावास्येत्येवं वादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते ।

3613. The end syllable of that sentence is optionally pluta, when it asserts something which has been refuted, and is employed by the victor by the way of censure

The word निगृह्य means the refutation of another's opinion. निगृह्य is a gerund, and means having refuted'. अनुयोगः is the expression of the same proposition which has been refuted When a person has demonstrated the untenableness of another's assertion, and then employs the said assertion by way of taunt, reproach or reprimand, then the final syllable of such a sentence becomes pluta The sûtra literally means "Having refuted (it) when asserting (the same by way of censure)."

Thus an opponent asserts that 'The word is not eternal" (अनित्यः शब्दः) । Proving by arguments the untenableness of this position, and after refuting it, the victor says by way of reprimand:—अनित्यः शब्द इत्यात्थाँ ३ or अनित्य शब्द इत्यात्थ 'This is then your assertion—that the word is not eternal' Similarly अद्य श्राद्धमित्यात्थाँ ३ or अद्य श्राद्धमित्यात्थ । अद्यामावास्येत्यात्थाँ ३ or अद्यामावास्येत्यात्थ ।

३६१४ । आम्रेडितं भर्त्सने । ८ । २ । ९५ ॥

'दस्योदस्यो३ घातयिष्यामि त्वाम्' । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । 'चौर चौर३' ।

3614 The final syllable of an âmredita vocative is pluta when a threat is expressed

A Vocative is reiterated when a threat is meant (VIII 1 8 S. 2143). Its final syllable becomes pluta. Thus दस्यो दस्यो ३ घातयिष्यामि त्वा ।

Though the anuvṛtti of the sûtra VIII 2. 82, is current here, yet the final of the *sentence* is not pluta, but of the âmreḍita.

It should be rather stated that any one of the repeated words may be pluta by alternation Thus चौर३ चौर or चौर चौर३ । The word âmreḍita is employed in the sûtra as illustrative of the doubling, for the threat is expressed by *both* words, so that pluta may be of *both* words in turn and not of the second word only, though that is technically called âmreḍita.

३६१५ । अङ्गयुक्तं तिङाकाङ्क्षम् । ८ । २ । ९६ ॥

अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । 'अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म' । 'तिङ्' किम् । 'अङ्ग देवदत्त मिथ्या वदसि' । 'आकाङ्क्षम्' किम् । 'अङ्ग पच' । नैतदपरमाकाङ्क्षति । भर्त्सने इत्येव 'अङ्गाधीष्व भक्तं तव दास्यामि' ।

3615 The final syllable of a finite verb, used as a threat becomes pluta, when the word *anga* is joined with it, and it demands another sentence to complete the conclusion

Thus अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म । अङ्ग व्याहर३ इदानीं ज्ञास्यसि जाल्म ।
Why do we say 'a verb' ? Observe अङ्ग देवदत्त मिथ्या वदसि ।

Why do we say 'when this calls for a conclusion' ? Observe अङ्ग पच । Here it is a complete sentence and does not demand another to complete the sense

The word भर्त्सने of the last sûtra is understood here also. Therefore not in अङ्ग अधीष्व, ओदनं ते दास्यामि । Here अङ्ग has the force of solicitation. (VIII. 1, 33 S 3940).

३६१६ । विचार्यमाणानाम् । ८ । २ । ९७ ॥

वाक्यानां टे प्लुतः । 'होतव्यं दीक्षितस्य गृहा३इ' । 'न होतव्या३मिति' । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः ।

3616. The final syllable of those sentences is pluta, which denote acts of reflection (or balancing between two alternatives).

To determine a thing by weighing all arguments *pro* and *con* is called vichâra or judgment Thus होतव्यं दीक्षितस्य गृहा३इ न होतव्या३म् 'should one perform a sacrifice in the house of an initiated person.' Similarly तिष्ठेद्यूपा३इ, अनुप्रहरे३त् ॥ Here also it is being reflected upon whether यूपं तिष्ठेत् or यूपं अनुप्रहरेत् ॥ i. e. should the stake remain upright or should it be put flat by the yajamâna. किं यूपस्तिष्ठेत्, किं वा यूपं यजमानः शाययेत् ॥

३६१७ । पूर्वं तु भाषायाम् । ८ । २ । ९८ ॥

विचार्यमाणानां पूर्वमेव प्लवते । 'अहिर्नु३ रज्जुर्नु' । प्रयोगापेक्षं पूर्वत्वम् । इह भाषाग्रहणात्पूर्वयोगश्छन्दसीति ज्ञायते ।

3617. In common speech, the final vowel of the first alternative is only pluta.

This makes a niyama or restriction The previous sûtra, is thus confined to the Vedic literature, and not to the classical तु here has the force of 'only.' Thus अहिर्नु३ रज्जुर्नु. 'Is it a snake or a rope' ? लोष्टो नु३ कपोतो नु 'Is it a clod of earth or a pigeon ?'

The priority, of course, depends upon employment. The order of words depends upon one's choice

३६१८ । प्रतिश्रवणे च । ८ । २ । ९९ ॥

वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । 'गां मे देहि भोः३' । 'हन्त ते ददामि३' । 'नित्यः शब्दो' भवितुमर्हति३' । 'दत्त किमात्थ३' ।

3618. The final syllable of the sentence which expresses assent or promise, or listening to, is pluta

The word प्रतिश्रवण means 'agreement, assent or promise' It also means 'listening to' All these senses are to be taken here, as there is nothing in the sûtra to restrict its scope Thus it has three senses, 1 to promise something to a petitioner, 2 to acknowledge the truth of some proposition, 3 to listen to another's words Thus गा मे देहि भो, 1 हन्त ते ददामिँ ३ ॥ 2 नित्य. शब्दो भवितमर्हतिँ ३ ॥ 3 देवदत्त भो, किमात्थाँ ३ ॥

३६१९ । अनुदात्तं प्रश्नान्ताभिपूजितयोः । ८ । २ । १०० ॥

अनुदात्तं प्लुतः स्यात् । दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते : अग्निभूत३ इ । पट ३ उ । 'अग्निभूते' 'पटो' एतयो प्रश्नान्ते टेरनुदात्त प्लुत. । शोभन खल्वसि माणवक ३ ।

3619 The final vowel at the end of a question or of a praise is pluta, but unaccented

That which is employed at the end of an interrogative sentence is called प्रश्नान्त. । According to some, this rule does not ordain pluta, but only ordains the anudâtta-ness of those syllables which become pluta by the previous rules VIII 2 84 &c The meaning of the sûtra then is —That pluta which comes at the end of an Interrogative sentence or a sentence denoting admiration, is anudâtta.

Thus अगमा ँ३ पूर्वा ँ३न् ग्रामा ँ३न् अग्निभूता३इ or अगमं३ पूर्वां ३न् ग्रामां३ पटा ३ उ (i e अगम पूर्वान् ग्रामान् अग्निभूते or पटो) । The words अग्निभूते, and पटो being finals in a question, become anudâtta as well as pluta The other words अगमः &c become svarita and pluta by VIII 2 105 See VIII 2 107

As regards अभिपूजिते we have शोभन खल्वसि माणवका ३ ॥ Here the final of माणवक becomes anudâtta and pluta

३६२० । चिदिति चोपमार्थे प्रयुज्यमाने । ८ । २ । १०१ ॥

वाक्यस्य टेरनुदात्त प्लुतः । 'अग्निचिद्भाया३ त' । अग्निरिव भायात् । 'उपमार्थे' किम् । कथंचिदाहु. । 'प्रयुज्यमाने' किम् । अग्निर्माणवको भायात् ।

3620 The end-vowel at the end of a sentence becomes anudâtta and pluta, when the particle *chit* is employed, denoting comparison

The word अनुदात्तं is understood here This sûtra ordains pluta as well, and not merely accent.

Thus अग्निचिद् भाया३त् 'may he shine as fire' So also राजचिद् भाया३त् 'may he shine as a King'

Why do we say 'when the sense is that of comparison'? Observe कथं चिद् आहुः । Here चिद् has the force of 'littleness or difficulty'

Why do we say प्रयुज्यमाने 'when expressly employed'? Observe अग्नि माणवको भायात् 'Let the boy shine like fire' Here चित् is understood, hence the rule does not apply

३६२१ । उपरिस्विदासीदिति च । ८ । २ । १०२ ॥

टे प्लुतोऽनुदात्तः स्यात् । 'उपरि स्विदासी३त्' । 'अधः स्विदासी३त्' इत्यत्र तु 'विचार्यमाणानाम्' (३६१६) इत्युदात्तः प्लुतः ।

3621 In उपरि स्विद् आसीद् the end-vowel is anudâtta and pluta

The word anudatta is understood here also. The end vowel would have been pluta here by VIII 2 97 . S. 3616, the present sûtra really ordains accentlessness of this pluta

Thus अध स्विदासी३त्, उपरि स्विदासी३त् (Rig X 129 5) In the first portion आसीत् is pluta and udâtta by VIII. 2, 97, in the second it is anudâtta by the present sûtra

३६२२ । स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु । ८ । २ । १०३ ॥

स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । असूयायाम् । अभिरूपक३ अभिरूपक रिक्तं ते आभिरूप्यम् । संमतौ । अभिरूपक३ अभिरूपक शोभनोऽसि । कोपे । अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सने । शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः ।

3622 Of the [illegible] atives of the same form standing at the beginning [illegible], the end-vowel of the first becomes pluta and svarita [illegible] praise, anger, or blame is expressed

The Vocative [illegible] III 1 8 S 2143 This sûtra ordains pluta there Thus Envy [illegible] माणवक, अभिरूपक३ अभिरूपक, रिक्त स अभिरूप्यम् । Praise —माणवक३ माणवक अभिरूपक३ अभिरूपक शोभन, खल्वसि ॥ Anger — माणवक३ माणवक, अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म ॥ Blame —शाक्तीक३ शाक्तीक याष्टीक३ याष्टीक रिक्ता ते शक्तिः ॥

३६२३ । क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् । ८ । २ । १०४ ॥

आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् । आचारभेदे । स्वयं ह रथेन याति३ । उपाध्यायं पदातिं गमयति । प्रार्थनायाम् । पुत्रांश्च लप्सीष्ट३ धनं च तात । आज्ञायाम् । कटं कुरु३ ग्रामं गच्छ । 'आकाङ्क्षम्' किम् दीर्घायुरसि अग्निचिन्नित्यत्र ।

3623 When an error against polite usage is censured, or when a benediction or a bidding is intended, the end syllable of a finite verb becomes pluta and svarita, if this requires another sentence to complete the sense

The word 'svarita' is understood here The word क्षिया means 'the error in usage' or 'want of good breeding' (VIII I 60) आशीः means 'benediction.' प्रैषः means 'order' or 'commanding by words.'

Thus स्वय रथेन याँति३, उपाध्याय पदाति गमयति ॥ स्वय ओदन भुङ्क्ते३, उपाध्याय सक्तून् पाययति ॥ In both these, the first sentence requires the second as its complement, and hence there is साकाङ्क्षा ।

Benediction —सुतांश्च लप्सीष्टा३ धनं च तात छन्दोऽध्येषीष्टा३ व्याकरण च, भद्र ॥
Order :—कट कुरु३ ग्राम च गच्छ, यवान् लुनीहि३, सक्तूश्च पिब ॥

Why do we say 'when it requires another sentence as its complement' Observe दीर्घायुरसि अग्नीदग्नीन् विहर । There cannot be any counter-example of भिधा, for there two sentences are absolutely necessary to express the sense of censure.

३६२४ । अनन्त्यस्यापि प्रश्नाख्यानयोः । ८ । २ । १०५ ॥

अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरित प्लुत स्यातयोः । प्रश्ने । अगमः३ पूर्वा३ न् ग्रामा३ न् । सर्वपदानामयम् । आख्याने । अगमः३ म् पूर्वा३ न् ग्रामा३ न् ।

3624 In a question or narration, the end-vowel of a word, though not final in a sentence, becomes svarita and pluta, as well as of the word which is final in a sentence

The word 'padasya' is understood here and so also the word 'svarita' The end-vowel of a word which is not the last word in a sentence, as well as of the last word, becomes svarita and pluta, when a question is asked, or a fact is narrated In fact, *all* the words of a sentence become svarita and pluta hereby

Thus in questioning we have '—अगमां३ पूर्वा३न् ग्रामा३न् अग्नि भूता३इ or पटा३उ ॥ Thus all words have become svarita and pluta The final word would in one alternative, become anudâtta also, by VIII 2 100, as shown under that sûtra The force of the word अपि in the sûtra, is to make the final word also svarita, and thus this sûtra makes VIII 2 100 an *optional* sûtra with regard to question

In *âkhyâna* or narration, there is no other rule, which is debarred by this Therefore there, *all* words become svarita and pluta *necessarily*, by the force of this sûtra Thus अगमा३म पूर्वा३न् ग्रामा३ न भे३इ ॥

३६२५ । प्लुतावैच इदुतौ । ८ । २ । १०६ ॥

दूराद्धूतादिषु प्लुतो विहितस्तत्रैवैच. प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते । ऐ३ तिकायन । औ३ पगव । चतुर्मात्रावत्रैचौ सपद्येते ।

3625. In forming the pluta of the diphthongs *ai* and *au* their last element *i* and *u* get the pluta.

The pluta ordained by VIII 2 84 &c when applied to ऐ or औ cause the prolation of the last element of these diphthongs namely of इ or उ । The word प्लुतौ in the sûtra is Nominative dual of प्लुत, and the aphorism literally means 'इ and उ are pluta of the diphthongs ऐ and औ' ॥

Thus ऐ३तिकायन, औ३पगव ॥

This pluta of ऐ and औ has *four* mâtras Thus अ+इ and अ+उ each has *one* mâtra The pluta of इ and उ will have *three* mâtrâs Thus अ+इ३ and अ+उ३, or the *whole* has *four* matrâs

other rule, the Vocative would have become prolated.

३६२७ । तयोर्य्वावचि संहितायाम् । ८ । २ । १०८ ॥

इदुतोर्यकारवकारौ स्तोऽचि संहितायाम । अग्नइयाशा । पटउवाशा । अग्नइयिन्द्रम । पटउ वुदकम । 'अचि' किम । अग्नाइवरुणौ । 'संहितायाम्' किम् । अग्नइइ इन्द्र । संहितायामित्यध्यायसमाप्तेरधिकार । इदुतोरसिद्धत्वादयमारम्भ सवर्णदीर्घत्वस्य शाकलस्य च निवृत्त्यर्थं । यवयोरसिद्धत्वात 'उदात्तस्वरितयोर्यण. स्वरितोऽनुदात्तस्य' (३६५७) इत्यस्य बाधनार्थो वा ॥

3627 For these vowels *i* and *u*, are substituted *y* and *v*, when a vowel follows them in a samhita (in an unbroken flow of speech)

